CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 668 Subject: ~~Puranic lit.~~ Kāvya.

Title: Mahābhārata - virāṭaparva & Bhāratārthapradipikā

Author: Veda vyāsa & Arjunamiśra. ~~Sanskrit lit.~~ Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 13.8" by 5.5" Extent: 89 foll.

Language: Sanskrit Script: Devanagarī

Remarks: —

वाय
र्मिकः स
पदं प्राप्य
वरो [illegible] मेप्राप्यगङ्गां तं पु

विराटपर्व

॥ॐ॥ ॐ नमः श्रीगुरुगोपालगौरीगणपतिभ्यः॥ ॥अथ गुणोपहितः सगुणः। तत्स्वतन्त्र[illegible]
पि मे स्वयं तमहं महद्यमीश्वरमाश्रये॥१॥ विराटपर्वतात्पर्यप्रकाशनप्रदीपसौ। श्रीचतुर्धुर[illegible] श्रीग[illegible]
इदानीं क्रमप्राप्तमज्ञातवासं वर्णयितुं तावद्विनेव तुर्यपर्वोपक्रमते॥ कथमिति॥ तथा॥ आरणे[illegible]द्विप्रतिवेना[illegible]

॥ॐ॥ ॐ नमः श्रीगुरुगोपालगौरीगणपतिभ्यः॥ ॥नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देवीं सरस्वतीं चैव ततो ज[illegible]
येत्॥ जनमेजय उवाच॥ कथं विराटनगरे मम पूर्वपितामहाः। अज्ञातवासमुषिता दुर्योधनभयार्दिताः॥ वैशं[illegible]
न उवाच॥ यथा विराटनगरे तव पूर्वपितामहाः। अज्ञातवासमुषितास्तच्छृणुष्व नराधिप। तथा तु स वरान् लब्ध्वा धर्माद्धर्मभृ
तां वरः। गत्वाश्रमं ब्राह्मणेभ्य आचख्यौ सर्वमेव तत्। कथयित्वा तु तत्सर्वं ब्राह्मणेभ्यो युधिष्ठिरः। अरणीसहितं तस्मै ब्राह्मणाय
स्त्रीपाद: न्यवेदयत्। ततो युधिष्ठिरो राजा धर्मपुत्रो महामनाः। संनिवर्त्यानुजान्सर्वानिति होवाच भारत। द्वादशेमानि वर्षाणि स्व
राष्ट्राद्विप्रोषिता वयं। त्रयोदशोयं संप्राप्तः कृच्छ्रः परमदुर्वसः। स साधु कौन्तेय इतो वासमर्जुन रोचय। यत्र मा वसतीः सर्वा वस्य
मो विदिताः परैः॥ अर्जुन उवाच॥ ॥तस्यैव वरदानेन धर्मस्य मनुजाधिप। अज्ञाता विचरिष्यामो नराणां भरतर्षभ॥

अत्र[illegible]ष्ट्राणि तस्मिंश्चैव रणानि स्वामिनि। मन्ति वर्ण्यश्च यतिराज्याद्यस्य संनिकर्षमानीय तिथिः॥ इति वक्ष्यमा[illegible]षिताः अप्रस २
ता[illegible]राणपचालकेतत्तराद्रुमाः अज्ञातवाससंबंधिनीः वसतीः रात्रीः संवत्सरमिमं यत्र विवाप्स्यथ॥ ॥श्रीरामायतन

स धर्म्मा[illegible]वदान्यो ह्रीमान्। दक्षिणश्च वदान्यो महात्मा। मत्स्यं सम्यग्रोद्धृष्टप्रतिज्ञः॥ उचितमनुवृत्तं। स राजा त्वां। मन्ता सात्विकमुख्य
किं चैव सायराष्ट्राणि कीर्तयिष्यामि कानिचित्। रमणीयानि गुप्तानि तेषां किंचित्स्म रोचय। सन्ति रम्या जनपदा बह्व
न्नाः परितः कुरून्। पांचालाश्चेदिमत्स्याश्च शूरसेनाः पटच्चराः। दशार्णा नवराष्ट्रं च मल्लाः शाल्वा युगंधराः। कुंतिराष्ट्रं सु
विस्तीर्णं सुराष्ट्रावंतयस्तथा। एतेषां कतमो राजन्निवासस्तव रोचते। वत्स्यामो यत्र राजेंद्र संवत्सरमिमं वयं॥ ॥युधिष्ठिर उ
वाच॥ ॥एवमेतन्महाबाहो यथा स भगवान्प्रभुः। अब्रवीत्सर्वभूतेशस्तत्तथा न तदन्यथा। अवश्यं त्वेव वासार्थं रमणीयं
शिवं सुखं। संमंत्र्य सहितैः सर्वैर्द्रष्टव्यमकुतोभयं। यस्य यस्य च चोदितं समहर्षितपांडवान्। मत्स्यो विराटो बलवानभिर
क्षेत्स पांडवान्। धर्मशीलो वदान्यश्च वृद्धश्च सुमहाधनः। विराटनगरे तात संवत्सरमिमं वयं। कुर्वंतस्तस्य कर्माणि विह
रिष्याम भारत। यानि यानि च कर्माणि तस्य वक्ष्यामहे वयं। कर्तुं योग्याः सत्कर्म ब्रवीत कुरुनंदनाः॥ ॥अर्जुन उवाच
॥नरदेव कथं तस्य राष्ट्रे त्वं विचरिष्यसि। विराटनृपतेः साधो रंस्यसे केन कर्मणा। मृदुर्वदान्यो ह्रीमांश्च धार्मिकः स
त्यसंगरः। राजंस्त्वमापदा क्लिष्टः किं करिष्यसि पांडव। न दुःखमुचितं किंचिद्राजा वेद यथा जनः। स इमामापदं प्राप्य
कथं घोरां तरिष्यसि॥ ॥युधिष्ठिर उवाच॥ ॥शृणुध्वं यत्करिष्यामि कर्म वै कुरुनंदनाः। विराटमनुसंप्राप्य राजानं पु
रुषर्षभाः। सभास्तारो भविष्यामि तस्य राज्ञो महात्मनः। कंको नाम द्विजो भूत्वा

अविशेषित्प्ररूपेण कंक इत्यभिधीयते। नामप्रसिद्धौ॥

विराट

मतामे घा ज्ञाता सुहृदयः॥ प्रियदेवनो द्यूतप्रियः॥ वैडूर्याणि वैडूर्यमणिमयान्। कांचनान् कनकोपस्कृतान्। इस्त्रनयोर्विशेष
णं। कृष्णाक्षान् कृष्णलोहितवर्णान् दविकान् नियमेन संख्यां। फलितः ज्योतीरसैः मणिविशेषमयैः समनरागेवी

मताक्षः प्रियदेवनः॥ वैडूर्यान् कांचनान् दांतान् फलैर्ज्योतीरसैः सह। कृष्णाक्षाल्लोहिताक्षांश्च निवर्त्स्यामि मनोरमान्॥
विराटराजं रमयन्सामात्यं सहबांधवं। न च मां वेत्स्यते कश्चित्तोषयिष्ये च तं नृपं। आसं युधिष्ठिरस्याहं पुरा प्राणसमः सखा। इति व
क्ष्यामि नृपतिं यदि मामनुयोक्ष्यते। इत्येतद्वो मयाख्यातं विहरिष्याम्यहं यथा। वृकोदर विराटे त्वं रंस्यसे केन कर्मणा॥
इति महाभारते विराटपर्वणि मंत्रणो प्रथमोध्यायः॥१॥ भीमसेन उवाच॥ पौरोगवो ब्रुवाणोऽहं बल्लवो नाम नामतः। उपस्था
स्यामि राजानं विराटमिति मे मतिः। सूपानस्य करिष्यामि कुशलोस्मि महानसे। कृतपूर्वाणि यैरस्य व्यंजनानि सुशिक्षितैः। तान
प्यभिभविष्यामि प्रीतिं संजनयन्नहं। आहरिष्यामि दारूणां निचयान्महतोपि च। तत्प्रेक्ष्य विपुलं कर्म राजा प्रीतो भविष्यति
। अमानुषाणि कुर्वाणस्तानि कर्माणि भारत। राजस्तस्य परिप्रेष्या मंस्यंते मां यथा नृपं। भक्ष्यान्नरसपानानां भविष्यामि तथे
श्वरः। द्विपा वा बलिनो राजन्वृषभा वा महाबलाः। विनिग्राह्या यदि मया निग्रहीष्यामि तानपि। ये च केचिन्नियोत्स्यंति समाजे

। नि[...]मिय यथा कोष्ठं निवेशयिष्यामि। अत्र यो दूपे पचति। पचति मंस्यत इति पावेभ्यो बवनो स्पतः इत्यर्थः। पौरोगवः सूदाध्यक्षः २
। सूपा[...] पंजनानि। महानसे पाककर्मणि। अमानुषाणि मानुषेष्वसंभावितानि। परि मर्वतः सर्व इत्यर्थः। भक्ष्यं मोदकादि॥ ॥

नियोधकाः बाहुयोधिनः। आरालिकाः अन्नसंस्कर्तारः। अयं वादमकः द्विपानां गवां वृषाणां विकर्ता विग्रहीता। गयपद्या
ध्यन्वंशा दाना मध्यतो यं यत्स कर्ता वयो गनिपुणाः। यदाद्यपंडिता नाम रंगाजनी मामनमरिंदम इति॥ वासुकिः स्वसारं उन्द्र

मां नियोधकाः। न तानहं निहनिष्यामि रतिं तस्य विवर्धयन्। न त्वेतान्युध्यमानान्वै निहनिष्यामि कर्हिचित्। एवं तान्पातयिष्यामि
यथा यास्यंति न क्षयं। आरालिको गोविकर्ता सूपकर्ता नियोधकः। आसं युधिष्ठिरस्याहमिति वक्ष्यामि पृच्छतः। आत्मानमा
त्मना रक्षंश्चरिष्यामि विशांपते। इत्येतत्प्रतिजानामि विहरिष्याम्यहं यथा॥ युधिष्ठिर उवाच॥ यमग्निर्ब्राह्मणो भूत्वा स
मागच्छन्नृणां वरं। दिधक्षुः खांडवं दावं दाशार्हसहितं पुरा। महाबलं महाबाहुमजितं कुरुनंदनं। सोयं किं कर्म कौंतेयः करिष्यति धनं
जयः। योयमासाद्य तं दावं तर्पयामास पावकं। विजित्यैकरथेनेंद्रं हत्वा पन्नगराक्षसान्। वासुकेः सर्पराजस्य स्वसारं हृतवांश्च य
ः। श्रेष्ठो यः प्रतियोधानां सोर्जुनः किं करिष्यति। सूर्यः प्रतपतां श्रेष्ठो द्विपदां ब्राह्मणो वरः। आशीविषश्च सर्पाणामग्निस्तेजस्वि
॥श्री श्च नां वरः। आयुधानां वरो वज्रः ककुद्मी च गवां वरः। ह्रदानामुदधिः श्रेष्ठः पर्जन्यो वर्षतां वरः। धृतराष्ट्रश्च नागानां हस्तिष्वैराव
णो वरः। पुत्रः प्रियाणामधिको भार्या च सुहृदां वरा। यथैतानि विशिष्टानि जात्यां जात्यां वृकोदर। एवं युवा गुडाकेशः श्रेष्ठः सर्वधनु

पी। हृतवान् समीति हृतवान्। प्रतियुध्यन्ते नाम शेषयोधानां नाम एकं। आशीविषो अनंतः। सर्पाणां काद्रवेयानां। ककुद्मी वृषः। ना
गानां सो रसयानां॥

अनवाप्तं हातः ॥ वत्सोऽप्येष वर्षाणां बहूव ॥ किणान्यतानां पक्षिणां । शक्रस्यापि समो देवेः ज्याघातकिणावंतौ पाणी वर्षाणां किमालिनौ । ज्या

विराट् स्मृतं । सोऽयमिंद्रादनवरो वासुदेवाद्भारत । गांडीवधन्वा बीभत्सुः श्वेताश्वः किं करिष्यति । उषित्वा पंच वर्षाणि सहस्राक्षस्य वे
श्मनि । अस्त्रयोगं समाज्ञाय स्ववीर्यान्मानुषाद्भुतं । दिव्यान्यस्त्राणि चाप्तानि देवरूपेण भास्वता । यं मन्ये द्वादशं रुद्रमादित्यानां
त्रयोदशं । यस्य बाहू समौ दीर्घौ ज्याघातकठिनत्वचौ । दक्षिणे चैव सव्ये च गवामिव वहः कृतः । हिमवानिव शैलानां समु योस्त्रा एषम्य
द्रः सरितामिव । त्रिदशानां यथा शक्रो वसूनामिव हव्यवाट् । मृगाणामिव शार्दूलो गरुत्मान्पततामिव । वरः संनह्यमानानामर तिमयुगे पाव
८ र्जुनः किं करिष्यति ॥ ॥अर्जुन उवाच॥ प्रतिज्ञां षंढकोस्मीति करिष्यामि विशांपते । ज्याघातौ हि महांतौ मे संवर्त्तुं नृप
दुष्करौ । वलयैश्छादयिष्यामि बाहू कृतकिणाविमौ । कर्णयोः प्रतिमुच्याहं कुंडले ज्वलनोपमे । पिनद्धकंबुः पाणिभ्यां
तृतीयां प्रकृतिं गतः । वेणीकृतशिरा राजन्नाम्ना चैव बृहन्नला । पठन्नाख्यायिकां चैव स्त्रीभावेन पुनः पुनः । रमयिष्ये महीपा
दित्रं लमन्यांश्चांतःपुरजनान् । गीतं नृत्यं विचित्रं च वादित्रं विविधं तथा । शिक्षयिष्याम्यहं राजन्विराटभवने स्त्रियः । प्रजानां समुदाचारं
बहुकर्मकृतं वदन् । छादयिष्यामि कौंतेय माययात्मानमात्मना । युधिष्ठिरस्य गेहेऽहं द्रौपद्याः परिचारिका । उषितास्मीति व
स्या ३

घातौ हि महांतौ विहितावश्यं सिंवर्त्तुं छादयित्वं । प्रतिमुच्य अपि द्वयं । तृतीयां प्रकृतिं नपुंसकत्वं । एवं च कल्पना गधतिरिहाख्यायि
कोच्यते । समुदाचारं व्यवहारं । मायया छद्मना ॥

कृतकेन तस्मिना । अश्वबंधोऽश्वाधिकृतः । मंत्रयिष्यंति मंत्रं करिष्यंति । प्रतिषेद्धा नियामकः । प्रलंतो नियुक्तः । अश्वबंधं संप
निगृह्णीयां राजानं ततस्तारयेनेन विधिना छन्नः कृतकेन यथानलः । विहरिष्यामि राजेंद्र विराटनगरे सुखं ॥ ॥महाभारते
विराटपर्वण्यर्जुनवाक्यं ॥ ॥युधिष्ठिर उवाच॥ ॥किं त्वं नकुल कर्माणि तत्र तात चरिष्यसि । कर्म तत्त्वं समाचक्ष्व
मही राज्ये तस्य परंतप । सुकुमारश्च शूरश्च सुदर्शनीयः सुखोचितः ॥ ॥नकुल उवाच॥ ॥अश्वबंधो भविष्यामि विराटनृप
तेरहं । सर्वथा ज्ञानसंपन्नः कुशलः परिरक्षणे । ग्रंथिको नाम नाम्नाहं कर्मैतत्सुप्रियं मम । कुशलोस्म्यश्वशिक्षायां त
थैवाश्वचिकित्सिते । प्रियाश्च सततं मेश्वाः कुरुराज यथा तव । पुरा युधिष्ठिरस्याहं हयज्ञो नरर्षभ । न दुष्टाश्वानचि
ष्यंति किशोरा वडवाश्च यि । दुष्टाश्च न विष्येति पृष्ठे धुर ये सुचा । ये च मां मंत्रयिष्यंति विराटनगरे जनाः । तेभ्य
एवं वक्ष्यामि विहरिष्याम्यहं यथा । विराटनगरे छन्नश्चरिष्यामि महीपते । न च मां वेत्स्यते कश्चित्तोषयिष्ये च तं
नृपं ॥ ॥युधिष्ठिर उवाच॥ ॥सहदेव कथं तस्य समीपे विहरिष्यसि । किं वा त्वं तात कुर्वाणः प्रच्छन्नो विचरिष्यसि
॥ ॥सहदेव उवाच॥ ॥गोसंख्याता भविष्यामि विराटस्य महीपतेः । प्रतिषेद्धा च दोग्धा च संख्याने कुशलो गवां ।
तंत्रिपाल इति ख्यातो नाम्ना विदितमस्तु ते । निपुणं च चरिष्यामि व्येतु ते मानसो ज्वरः । अहं हि भवतो गोषु सततं
प्रकृतं पुरा । तत्र मे कौशलं कर्म अवबुद्धं विशांपते । लक्षणं चरितं चापि गवां यच्चापि मंगलं । तत्सर्वं मे सुविदि

तं स्तुतिलक्षणं । गोर्महिषीच ॥

विरा० ८

माता जननीव परिपाल्या। असंत्याज्या स्वसा भगिनी वधुर्ज्या अपरिहरणीया॥ यद्वा॥ माता एकादशी स्वसा द्वादशी॥
माता एकादशी विद्यात् स्वसा च द्वादशी विदुरित्यभिधानात् परिपाल्या पूज्या इति विशेषः॥ किरकादशी उपवसेद्वाद

ते

तमन्यथापि महीपते। कस्मान्न विजानामि राजन् श्रितलक्षणान्॥ येषां मूत्रं पुरीषं वा प्राय अपि वध्याः प्रकृत्यते। सोऽहमेवं च
रिष्यामि प्रीतिरत्र हि मे सदा। न च मां वेत्स्यति कश्चित्तो वधिष्ये च पार्थिवं॥ ॥युधिष्ठिर उवाच॥ ॥इयं हि नः प्रिया भार्या प्राण
भ्योपि गरीयसी। मातेव परिपाल्या च पूज्या ज्येष्ठेव च स्वसा। केन स्म कर्मणा कृष्णा द्रौपदी विचरिष्यति। न हि किंचिद्वि
जानाति कर्म कर्तुं यथा स्त्रियः। सुकुमारी च बाला च राजपुत्री यशस्विनी। पतिव्रता महाभागा कथं नु विचरिष्यति। मा
ल्यगंधानलंकारान् वस्त्राणि विविधानि च। एतान्येवाभिजानाति यतो जाता हि भामिनी॥ ॥द्रौपद्युवाच॥ ॥सैरिंध्र्योऽरक्षिता
लोके भुजिष्याः संति भारत। नैवमन्याः स्त्रियो यांति इति लोकस्य निश्चयः। एकपत्नीव्रता श्रेता इति लोकस्य निश्चयः। साहं
ब्रुवाणा सैरिंध्री कुशला केशकर्मणि। युधिष्ठिरस्य गेहे हि द्रौपद्याः परिचारिका। उषितास्मीति वक्ष्यामि पृष्टा राज्ञा च भारत।

इ

श्यामर्ह्ये देहरिमितिस्मृत्य धर्ममनुरुध्यते। स्त्रियो अन्याः सुकुमारी मृदुस्वना चा बाला नूतनवयो वस्था। सैरिंध्र्यास्तु भुजिष्या
दास्यपि सत्यो मान्याः अतिगम्याः ता नियंतिता ति गच्छंति। पुमांसो वर्ण्यता। विहेतो। अनन्ता चेहिता एवेत्यवयः। सैरिंध्रीय ४

आत्मगुप्ता स्वयं रक्षिता। दुर्हृदो विपक्षाः। लक्षायपुंजानीषु। काकवलान् सन्या... पाकार्थ विहाय। सर्वं कृत्स्नं जातं। याने प्रय

आत्मगुप्ता चरिष्यामि यन्मां त्वं परिपृच्छसि। सुदेष्णां प्रत्युपस्थास्ये राजभार्यां यशस्विनीं। सा रक्षिष्यति मां प्राप्तां मा भूत्ते दुःख
मीदृशं॥ युधिष्ठिर उवाच॥ ॥कल्याणं भाषसे कृष्णे कुले जाता यथा वदेत्। न पापमभिजानासि साधु साध्वी व्रते स्थिता। य
था न दुर्हृदः पापा भवंति सुखिनः पुनः। कुर्यास्तथा त्वं कल्याणि लक्षयेयुर्न ते यथा॥ ॥इति महाभारते विराटपर्वणि॥
युधिष्ठिर उवाच॥ ॥कर्माण्युक्तानि युष्माभिर्यानि तानि करिष्यथ। मम चापि यथा बुद्ध्या रुचितानि विनिश्चयात्। पु
रोहितो यमस्माकमग्निहोत्राणि रक्षतु। सूतपौरोगवैः सार्धं द्रुपदस्य निवेशने। इंद्रसेनादयश्चेमे रथानादाय केव
लान्। यांतु द्वारवतीं शीघ्रमिति मे वर्तते मतिः। इमाश्च नार्यो द्रौपद्याः सर्वाश्च परिचारिकाः। पंचालानेव गच्छंतु सूत
पौरोगवैः सह। सर्वैरपि च वक्तव्यं न प्रज्ञायंत पांडवाः। गता ह्यस्मानपाकीर्य सर्वे द्वैतवनादिति॥ ॥वैशंपायन उ
वाच॥ ॥एवं तेऽन्योन्यमामंत्र्य कर्माण्युक्त्वा पृथक् पृथक्। धौम्यमामंत्रयामासुः स च तान्मंत्रमब्रवीत्॥ ॥धौम्य उवा
ता:पा ७: च॥ ॥विदितं पांडवाः सर्वं ब्राह्मणेषु सुहृत्सु च। याने प्रहरणे चैव तथैवाग्निषु भारत। त्वया रक्ष्या विधातव्या कृष्णा
फाल्गुनेन च। विदितो वो यथा सर्वो लोकवृत्तमिदं तथा। विदिते चापि वक्तव्यं सुहृद्भिरनुरागतः। एष धर्मश्च काम
श्चार्थश्चैव सनातनः। अतोऽहमपि वक्ष्यामि हेतुमत्र निबोधत॥ ...प्रहरणे संग्रामे प्रवर्हणे ... यानरथादौ प्रवहणे शक

विराट

अत्र राजकुलवासे हंतेत्यनुकंपायां। राजवसतिं राजोपासनोपयुक्तां नीतिं। दुर्वसं त्वेणवक्तव्यो कौरव्याः हे जानतां जानंत
ता। ज्ञानतामपि निवायाग्वः। अमानितैर्मानितैर्वा वस्तव्यमिति शेषः। परिसमंताद् दिष्टद्वारे अनुमत प्रवेशः। रहस्ये गुप्तोपे
गुप्तानविश्वसेत्। नाविशद्यीस्या द्वा। नात्ति पक्केरामदीयमिदंत्वया ख्यापितं अतिपरान्नवेदा। यानं दोलादि। पर्यंकं शयना

छात्वगुणावरिष्यामि यथमार्त्त्वं परिरक्षसि। सुदेला पुत्रयुक्त्यामेत राजना यशस्विनी। मारकिस्पतिमं गुणं मामपेवलेदुःखे
सीदती॥ ॥युधिष्ठिर उवाच॥ ॥कल्याणं भाषसेकेन कुले जाताः सिनाविनि। वयापयमतिजानासि हंतेमां राजवसतिं राजपुत्र
ब्रवीमि वः। यथाराजकुलं प्राप्य सर्वाणोषां तरिष्यथ। दुर्वसं त्वेव कौरव्या जानता राजवेश्मनि। अमानितैर्मानितैर्वा अज्ञातैः परिवत्सरं। पांड
वा ग्निरयं लोकमर्वशास्त्रमयोमहा। मन्नागो गाद्वनान्ता नराजा तुरूपविग्रहः। ततस्तुर्दशे वर्षे चरिष्यथ यथा सुखं। दिष्टद्वारो नते द्रष्टुं रह
स्येषु न विश्वसेत्। तदेवासनमन्विच्छेद्यत्र नाभिषजेत्परः। यो न यानं न पर्यंकं न पीठं न गजं रथं। आरोहेत्संमतोस्मीति सराजवसतिं वसे
त्। अत्र यत्रैनमासीनं शंकेरन्दुष्टचारिणः। न तत्रोपविशेद्योवै सराजवसतिं वसेत्। न चानुशिष्याद्राजानमपृच्छंतं कदाचन। तूष्णीं त्वेन
मुपासीत काले समभिपूजयन्। असूयंति हि राजानो जनाननृतवादिनः। तथैव चावमन्यंते मंत्रिणं वादि
नं। तथैव चावमन्यंते मंत्रिणं वादिनं मृषा। नैषां दारेषु कुर्वीत मैत्रीं प्राज्ञः कथंचन। अंतःपुरचरा ये च द्वेष्टि यानहिताश्च ये। विदिते चास्य कु ५

दिपर्यंकं शयनासि। संमतः सम्मानवान्। राजवसतिं राजकुलं। अनुशिष्यात् शिक्षयेत्। काले अवसरे। असूयंति गुणवंतोपि दूषयंति। अनृतवादिनो
मृषस्तुतवादिनः। मृषावादिनं मसत्यवादनं। एषां राज्ञां ×

अग्निवद्दग्निमिव। नत्र्यवदितानाप्यासज्ञा। देववत्। पराक्षे पि। अपचीर्णो विप्रलंभेन। अनुयुंजीत पृच्छेत्। प्रमादमनवधा
नं। अवहेलां अवज्ञां। समर्थनासु विमर्शेषु। हितं समायां निस्तेरसं। अनुकूल पथ्यानुराधी। अहितमित्याप्रिय विशेषणं तावर्जयेदेव॥

गच्छन्नपि परां भूमिमपृष्टो ह्यनियोजितः। ज्ञात्यंधवन्मन्येत मर्यादामनुचिंतयन्। नहि पुत्रं न नप्तारं न भ्रातरमरिंदमाः।
समतिक्रांतमर्यादं पूजयंति नराधिपाः। यत्नाच्चोपचरेदेनमग्निवद्देववच्च ह। अनृतेनोपचीर्णो हि हिंस्यादेव न संशयः। यच्च
भर्तानुयुंजीत तदेवाभ्यनुवर्तयेत्। प्रमादमवहेलां च कोपं च परिवर्जयेत्। समर्थनासु सर्वासु हितं च प्रियमेव च। संवर्णयेत्
तदेवास्य प्रियादपि हितं वदेत्। अनुकूलो भवेच्चास्य सर्वार्थेषु कथासु च। अप्रियं चाहितं यत्स्यात्तदस्मै नानुवर्णयेत्। नाहमस्य
सर्वत्र प्रियोस्मीति मत्वा सेवेत पंडितः। अप्रमत्तश्च सततं हितं कुर्यात्प्रियं च यत्। नास्यानिष्टानि सेवेत नाहितैः सह संवसेत्। स्वस्थानान्न
विकंपेत स राजवसतिं वसेत्। दक्षिणं वाथ वामं वा पार्श्वमासीत पंडितः। रक्षिणां ह्यात्तशस्त्राणां स्थानं पश्चाद्विधीयते। नित्यं
विप्रतिषिद्धं च पुरस्तादासनं महत्। न च संदर्शने किंचित्प्रवृद्धमपि संजपेत्। अपि ह्येतद्दरिद्राणां

पात्यत्रवाज्ञा। अनिष्टानि प्रतिकूलानि। संवसेत् मिलितो भवेत्। संकुर्यादिति वा। न विकंपेत न विचलेत्। आसी
त अधितिष्ठेत्। विप्रतिषिद्धं वा। आसनमवस्थानं। संदर्शने दृष्टिविषये प्रवृद्धं श्लाघ्यमपि न जपेत्। एतद् दरिद्राणामयमीत्यर्थः॥

व्यलीकस्थानमप्रतीतविषयः। वृथा अनर्थकमसत्यं वा। अनृतवादिनो राज्ञो दृतप्रकाशका। दृप्तः सदर्प्पः। भोगवान् सुखी। राज
ताद्वपात्। अनर्थमनिष्टं। निर्भुजेत् आवलिदेत्। विकत्थयन् समाक्षिपेत्। यदृच्छया तु शुनीत। वातं आमं। अक्ष्णे नातं च। हास्यव

हि

व्यलीकस्थानमष्टमं। नष्टषामिति द्वितेराज्ञा मन्त्रेष्वेषु प्रकाशयेत्। अस्पृष्टं पतिं राज्ञो नो ननान्वृतवादिनः। ताथैवचावमन्यं तेन रा
न्पंडितमानिनः। शूरोस्मीति न हृप्तः स्याद्बुद्धिमानिति वादिनः। प्रियमेवाचरन्राज्ञः प्रियो भवति भोगवान्। ऐश्वर्यं दुर्लभं प्रा
प्य प्रियं प्राप्य च भारत। अप्रमत्तो भवेद्राज्ञः प्रियेषु च हितेषु च। यस्य कोपो महाबाधः प्रसादश्च महाफलः। कस्तस्य मनसा
पीच्छेदनर्थं प्राज्ञसंमतः। न चोष्ठौ निर्भुजेज्जातु न च वाक्यं समाक्षिपेत्। सदा वातं च वातं च ष्ठीवनं चाचरेच्छनैः। हास्यवस्तुषु
चाप्यस्य वर्तमानेषु केषुचित्। नातिगाढं प्रहृष्येत न चाप्युन्मत्तवद्धसेत्। न चातिधैर्येण चरेद्गुरुतां हि व्रजेत्तथा। अस्मितं तु मृदु पू
र्वेण दर्शयेत्प्रसादजं। लाभे न हर्षयेद्यस्तु न व्यथेद्यो विमानितः। असंमूढश्च यो नित्यं स राजवसतिं वसेत्। राजानं राजपुत्रं वा संव
र्तयति यः सदा। अमात्यः पंडितो भूत्वा स चिरं तिष्ठति श्रियं। प्रगृहीतश्च यो मात्यो निगृहीतस्त्वकारणे। न निर्वदति राजा
नं लब्ध्वा संपदं पुनः। प्रत्यक्षं च परोक्षं च गुणवादी विचक्षणः। उपजीवी भवेद्राज्ञो विषये चापि यो वसेत्

सुगुसृधेयैः अण्वान् न हर्षयेत्। न रुष्येत्। संवर्तयति साधु नया निर्दिशति मंत्रयते निवापावः। प्रगृहीतो तत्पुरस्कृतः निर्दीभा

स्थानेयदे। नसंवदेत्। नसंदध्यात्। नविशेषयेत्। नातिजायीत। योग्यान्भिक्षुशिक्षास्थानेषु। अग्लानो शिथिलः बलवान् सम

आसीत् हि बलात् को कुरु राजानं प्रार्थयेत्तु यः। न संनिष्ठे विरं स्थानेगच्छ ब्राह्मणं संशयं। श्रेयः स दात्मनो दृष्ट्वा पर राजानं संवदेत्। वि
आपयितु राजानं योग्यान्भिक्षु सर्वदा। अग्लानो बलवान्शूरः छायेवानुगतः सदा। सत्यवादी मृदुर्दान्तः स राजवसतिं वसेत्।
अन्यस्मिन्प्रेष्यमाणे तु पुरस्तात्स्यात्समुत्पतेत्। अहं किं करवाणीति स राजवसतिं वसेत्। आज्ञाव विवेराज्ञायस्थेव सर्वदा
। आदिष्टो न विकंपेत स राजवसतिं वसेत्॥ यो वै गृही प्रवसन्प्रियाणां नानुसंस्मरेत्। दुःखेन सुखमन्विच्छेत्स राजवसतिं वस
त्। समं वास्या न कुर्वीत नात्युच्चैः संनिधौ हसेत्। न मंत्रं बहुधा कुर्यादेवं राज्ञः प्रियो भवेत्। न कर्मणि नियुक्तः सन्धनं किंचि
दपि संस्पृशेत्। प्राप्नोति हि हरन्द्रव्यं बंधनं यदि वा वधं। यानं वस्त्रमलंकारं यच्चान्यत्संप्रयच्छति। तदेव धारयेन्नित्यमेवं प्रियतरो रा
जवेत्। संवत्सरमिमं तात तथा शीला बुभूषवः। अथ स्वविषयं प्राप्य यथाकामं चरिष्यथ॥ युधिष्ठिर उवाच॥ अनुशिष्टाः स्म
भद्रं ते नैतद्वक्तास्ति कश्चन। कुंतीमृते मातरं नो विदुरं वा महामतिं। यदेवानंतरं कार्यं तद्भवान्कर्तुमर्हति। तारणायास्य
दुःखस्य प्रस्थानाय जयाय च॥ वैशंपायन उवाच॥ एवमुक्तस्ततो राज्ञा धौम्योथ द्विजसत्तमः। अकरोद्विधिवत्सर्वं प्र
स्थाने यद्विधीयते। तेषां समिध्य तानग्नीन्मंत्रवच्च जुहाव सः। समृद्धिवृद्धिलाभाय पृथिवीविजयाय च॥ वैशंपायन उवाच

यो। शूरः सोत्साहः। मृदुरद्रूरणः। पुरस्तात्स्थानं अग्रतरं वा। अनावश्यसाध्ये कर्मणि। भावेन कृच्छ्रसाध्ये कर्माणि॥

गोष्ठतलत्रं। कालिंदीमभितो यमुनायाः समीपतः। तस्याः उत्तरेण उत्तरात्। द्वारयां। अंतरेण मध्येन। लुब्धाः व्याधाः। इति। ज्ञान

विराट रूढे प्रिंच्छद्विणां कृत्वाश्रमणां श्रुतपोधना शायाज्ञामनीत्तरस्कृत्य पृदेवाथ श्ववज्रुः। गतस्तु तस्तु वीरसुधंस्मो पित्रपतांबर
।।अश्वि ह्यन्नाएतु पादाय पंचालानस्पगचत। इंद्रमनादपश्चिवव्यथो कोः पापपाद वा।श।रयानस्त्वा स्थूरदंतः सुरवस्तुस्तु
संहताः।। विराटपर्वणि धौम्यशिक्षानाम।। ।।वैशंपायन उवाच।। ते वीरा बद्धनिस्त्रिंशास्तत्तो तु धकलापिनः। ब
द्धगोधांगुलित्राणाः कालिंदीमभितो ययुः। ततस्ते दक्षिणं तीरमन्वगच्छन्पदातयः। निवृत्तावनवासा ह्येस्वराष्ट्रं प्रेप्सव
स्तदा। वसंतो गिरिदुर्गेषु वनदुर्गेषु धन्विनः। सिंहान्व्याघ्रान्वराहांश्च मारयंतश्च सर्वतः। विध्यंतो मृगजातीनि महेष्वा
सा महाबलाः। उत्तरेण दशार्णांस्ते पांचालान्दक्षिणेन तु। अंतरेण यकृल्लोमान्शूरसेनांश्च पांडवाः। लुब्धाकरा लामत्स्यस्य विषयं प्रा
विश्यपश्यन्तः। धन्विनो बद्धनिस्त्रिंशा विवर्णाः श्मश्रुधारिणः। ततो जनपदं प्राप्य कृष्णा राजानमब्रवीत्। पश्यैकपद्यो दृश्यंते क्षेत्रा
णि विविधानि च। व्यक्तं दूरे विराटस्य राजधानी भविष्यति। वसामेहापरां रात्रिं बलवान्मे परिश्रमः। तच्छ्रुत्वा वचनं तस्याः प्राह राजा यु मे
धिष्ठिरः।। युधिष्ठिर उवाच।। धनंजय समुद्यम्य पांचालीं वह भारत। राजधान्यां निवत्स्यामो विमुक्ताश्च वनादितः।। ।।वै
शंपायन उवाच।। ।।तामादायार्जुनस्तूर्णं द्रौपदीं गजराडिव। संप्राप्य नगराभ्यासमवतारयदर्जुनः। स राजधानीं संप्राप्य ७

पदे जनपदं समीपं। एकपद्यः संचारमात्रविक्रांतं व्यक्तमिति वितर्के। बलवान् महान्। अभ्यासं समीपं।। ।।

समासन्नपस्त्राधमय। कूटेस्वरवारगतहस्तिनरः। समापगादन्नानि विडानि शस्त्राणि। निदधता अस्मात् हेष्यामावदित्यवयः। उत्तयेथ

कौंतेयोऽर्जुनमब्रवीत्। क्वायुधानि समासज्य प्रवेक्ष्यामः पुरं वयं। सायुधस्तूद्वेस्यामो वयं तात पुरं यदि। समुद्वेगं करिष्या
मो जनस्यास्य न संशयः। गांडीवं च महागाढं लोके च विदितं नृणां। तच्चेदायुधमादाय गच्छामो नगरं वयं। क्षिप्रं जनास्तं विज्ञानी
युर्मं तु ख्यातास्तु संशयः। ततो द्वादश वर्षाणि प्रवेष्टव्यानि वनं पुनः। एकस्मिन्नपि विज्ञाते प्रतिज्ञातं हि नस्तथा। अर्जुन उवाच
।। इयं कूटे मनुष्येंद्र गहना महती शमी। भीमशाखा दुरारोहा श्मशानस्य समीपतः। न चापि विद्यते कश्चिन्मनुष्य इति मे म ग्र
तिः। यो स्मान्निदधतो द्रष्टा भवेच्छस्त्राणि पांडव। उत्पथे हि वने जाता मृगव्याडनिषेविता। समीपे च श्मशानस्य गहनस्य विशे
षतः। समासज्यायुधान्यस्यां गच्छामो नगरं प्रति। एवमत्र यथायोगं विहरिष्याम भारत।। वैशंपायन उवाच।। एवमुक्त्वा स रा
जानं धर्मात्मानं युधिष्ठिरं। प्रचक्रमे निधानाय शस्त्राणां भरतर्षभः। येनादेवान्मनुष्यांश्च सर्वांश्चैकरथो जयत्। स्फीतान् ज
नपदांश्चान्यानजयत्कुरुनंदनः। तदुदारं महाघोषं सपत्नगणसूदनं। अपज्यमकरोत्पार्थो गांडीवं चनयंकरं। येन वीरः कुरुक्षेत्र
मभ्यरक्षत्परंतप। अमुंचद्धनुषस्तस्य ज्यामक्षय्यां युधिष्ठिरः। पांचालान्येन वीरस्तु कुरूणामनीमसीनाजयत्। प्रत्यषेधद्ब
हूनेकसपत्नो दिग्विजये। निशम्य यस्य विस्फारं व्यद्रवंत रणात्परे। पर्वतस्येव दीर्णस्य विस्फोटमशनेरिव।।

पार्थो विधृतकृष्णो यथा जो यं यथासुखं। अपज्यमपगतगुणं। विस्फारं शब्दं।।

सिंधवं जयद्रथं। एष्यामिद्दपत् दृष्टा तवान्। ज्यापाशग्रथणबंधनं॥ संक्रमत्य क्षुरानिति संक्रन्दनः कालः॥ अनपाद पियस्य रूपे समेनास्त्रोस

विराट। सिंधवं येन राजानं पर्यस्थिरं तवान् घ॥ ज्याघोषं धनुषस्तस्य नामासेनो ववतार यत्। अजयत्सुभिमामाशां धनुषा येन पांडवः॥ माद्री
पुत्रो महाबाहुस्ताम्रास्यो मितविक्रमः॥ तस्य मौर्वीमपाकर्ष शूरः संक्रन्दनो युधि॥ कुलेना स्ति समो रूपे यस्येति नकुलः स्मृतः॥
दक्षिणां दक्षिणाचारो दिशं येनाजयत्प्रभुः। अपज्यमकरोद्वीरः सहदेवस्तदायुधं। खड्गाश्च दीप्तान्दीर्घांश्च कला
पांश्च महाधनान्। विपाठान् क्षुरधारांश्च धनुर्भिर्निदधुः सह। तासुपारुह्य नकुलो धनूंष्यावदधे स्वयं। गांडीवं चाप रंतत्र च
तुर्भिर्निदधे सह। यानि तस्यावकाशानि दृढरूपान्यमन्यत। यत्र चापश्यत स वै तिरोवर्षाणि वर्षति। तत्र तानि दृढैः पाशैः
:सुगाढं पर्यबन्धत। शरीरं च मृतस्यैकं समबध्नत पांडवाः॥ विवर्जयिष्यंति नरा दूराद्देवं शमीमिमां। आबद्धं शवमत्रेति
गंधमाघ्राय पूतिकं। अशीतिशतवर्षीयं माता म इति वादिनः। कुलधर्मोयमस्माकं पूर्वैराचरितोपि च। समासज्याथ वृक्षे
स्मिन्निति वै व्याहरंति ते। आगोपालाविपालेभ्य आचक्षाणाः परंतपाः। आजग्मुर्नगराभ्याशं पार्थाः शत्रुनिबर्हणाः॥ ॥
वैशंपायन उवाच॥ विराटनगरं रम्यं प्राविशन्नेव नृपतेः। स्तुनोति मनसा देवीं कुंतीपुत्रो युधिष्ठिरः॥ भ्रातृभिः सहितो राजन्नत्त
विश्वपितामहः॥ ङः स्वशोकेन संतप्तो द्रौपद्या सहितो रतः। कृतांजलिपुटो भूत्वा वनवासाद्विनिर्गतः॥ ८
त्रयः। अशीतिः शतं च

वर्षाणि यस्याः॥ टीकांतरं यावंत रधातांश्छ्राणाव खड्गांश्चेति। पार्थिव जना नित्यर्थः। जनमानेन तेषां दानि निर्वतीति। देवे वर्षं निमित्ति
वर्षाणि दृष्टयंतिरः तिर्यक्पतनादिति शेषः॥

वैडूर्यरूपान्वैडूर्यरचितान्। अक्षान्वाससा परिष्टह्याव बध्य कक्षा। परिस्तोर्णेति वा पाठः॥ कक्षे भुजसंधौ परिगृह्य स्वबंध्य

भक्त्या परमया युक्तो दुर्गां दुर्गार्तिनाशिनीं। महिषासुरदर्पघ्नीं सर्वलोकनमस्कृतां। शैलराजसुतां गौरीं वरदाममृतप्रदां
। जयो जयंतो विजयो जयत्सेनो जयद्बलः। इति गुह्यानि नामानि तेषां चक्रे युधिष्ठिरः। ततो यथाप्रतिज्ञा तथा विशन्नगरं ध्रु
तं। अज्ञातचर्यां वत्स्यन्तो राष्ट्रे वर्षं त्रयोदशं॥ ॥ विराटपर्वणि पांडुप्रवेशो नाम॥ ॥ वैशंपायन उवाच॥ ततो वि
राटं प्रथमं युधिष्ठिरो राजा सभायामुपविष्टमाव्रजत्। वैडूर्यरूपान्प्रतिमुच्य कांचनानक्षान्स कक्षे परिगृह्य वाससा। नरा स्पपाग:
धिपो राष्ट्रपतिं यशस्विनं महायशाः कौरववंशवर्धनः। महानुभावो नरराजसत्कृतो दुरासदस्तीक्ष्णविषो यथोरगः। बले
वि:ना नरूपेण नरर्षभो महानथाप्रतिरूपेण यथामरस्तथा। महाभ्रजालैरिव संवृतो रविर्यथानलो भस्मवृतश्च वीर्यवान्। तमाप
तंतं समीक्ष्य पांडवं विराटराडिंदुमिवाभ्रसंवृतं। समागतं पूर्णशशिप्रभाननं महानुभावं न चिरेण दृष्टवान्। मंत्रिद्विजा
न्सूतमुखान्विशस्तथा ये चापि केचित्परितः समासते। पप्रच्छ कोयं प्रथमं समागतो नृपोपमोयं प्रसमीक्षते सभां। न तु
द्विजोयं भविता नरोत्तमः पतिः पृथिव्या इति मे मनोगतं। न चास्य दासो न रथो न कुंजरः समीपतो भ्राजति चायमिंद्रवत्।

यः अर्धिरूपेणानेजा स्वरूपेसा। दीर्घ्यमानाव्रज्यांचः पस्मीस्थापनंतमिमचत्ययः। विशोम तच्चाः परितः सभा पपुच्च। विराट
इत्युपजाते॥ समेयिवान्समागतः॥ ॥

नामस्थानलिनी। प्रतिसंप्रहृष्टाणप्रनिर्यंप्रहृष्टोनवाप्त॥आर्यविप्रस्य॥इकाग्मनइच्छया।कं कृतमस्मसं।वियाघ्रयद्यगोत्रे राप्र

विराट ज्ञावीरलिंगो रूपस्य चितोह्य यं प्रष्टांमि विक्रांस्त्वि नि मम च मानमं ममीप्सया। तिष्ठ मगतव्यथो यथाम हं स्त्रा मरसाम्म।
रो कटः॥ वितर्कयंतं तु नरर्षभं तदा युधिष्ठिरोभ्येत्य विराटमब्रवीत। मघा द्विजाना विद्वज्जीविनार्थिनं विनष्टसर्वस्वमुपागतं द्वि
जं।इहागतमिच्छामि तवान याति के वसुं यथा कामचरस्त्वया विभो।तमब्रवीत्स्वागतमित्यनंतरं राजा प्रहृष्टः प्रतिसंप्रहृष्टाणवं तेरा
तमिदं प्रतिगृह्य पार्थिवः प्रीतात्मना चैवमिदं वचस्तदा।कामेन ताताभिवदाम्यहं त्वां कस्यासि राज्ञो विषयादिहागतः।गोत्रं च ना
मापि च शंस तत्त्वतः किंचापि शिल्पं तव विद्यते कृतं॥ युधिष्ठिर उवाच॥ युधिष्ठिरस्यासमहं पुरा सखा वैयाघ्रपद्यः पुन
रस्मि ब्राह्मणः॥ अक्षान्प्रयोक्तुं कुशलोस्मि देविता कंकेति नाम्नास्मि विराट विश्रुतः॥ विराट उवाच॥ ददामि ते हंत वरं य
मिच्छसि प्रशाधि मत्स्यान्वशगो ह्यहं तव। प्रिया हि धूर्ता मम देविनः सदा भवांश्च देवोपम राज्यमर्हति॥ युधिष्ठिर उवाच॥ प्राप्तो वि
वादः परमो विशांपते न विद्यते किंचन मत्स्य हीनतः। न मे जितः कश्चन धारयेद्धनं वरो ममैषोस्तु तव प्रसादजः॥ विराट
उवाच॥ ॥हन्यामवध्यं यदि तेऽप्रियं चरेत्प्रव्राजयेयं विषयाद्द्विजांस्तथा। शृण्वंतु मे जानपदाः समागताः कंको यथाहं विषये तथा
\\ प्रभुः॥ ९
योक्कुप्राया जितं धूर्तो ह्यतविदः। पथ्यामासु रथ्यमा प्रासः प्रत्ययितः स्यामिस्य यात। परममिति वापावः। हानतादृ
नेन मह्यम विवादो ह्यता दिव्य वहारान्त विद्यात॥जितः स्यद्धनं कश्चन मम धनं धारयेत।एवमस्य विविक्षेव रागममास्तित्सवयः॥

ध्यपाहृतमप्रतिरुद्धं वाचं॥ सिंहास्यवविलासा विक्रमस्य यस्या। खङ्गं धंजना दिव्य हकांश्च वीरा कहस्तकं कालांगं कृत्वा

समानयानो भवितासि मे सखा प्रभूतवस्त्रो बहुपानभोजनः। पश्येस्त्वमंतश्च बहिश्च सर्वदा कृतं च ते द्वारमपावृतं मया।
ये त्वां वदेयुः प्रतिकर्शिता नरा ब्रूयाश्च तेषां वचनेन मां सदा। दास्यामि सर्वं तदहं न संशयो न ते भयं विद्यति संनिधौ म
म॥ विशंपायन उवाच॥ एवं स लेभे परमं समागमं विराटराजेन नरर्षभस्तदा। उवास वीरः परमार्चितः सुखी न चा
पि कश्चिच्चरितं बुबोध तत्॥ महाभारते विराटपर्वणि युधिष्ठिरप्रवेशः॥ विशंपायन उवाच॥ ॥अथापरो भीम
बलः श्रिया ज्वलन्नुपाययौ सिंहविलासविक्रमः। खजं च दर्वीं च करेण धारयन्नसिं च कालांगमकोशमव्रणं॥ स सूदरू
पः परमेण वर्चसा रविर्यथा लोकमिमं प्रकाशयन्। सुकृष्णवासा गिरिराजसारवान्स मत्स्यराजं समुपेत्य तस्थिवा
न्॥ तं प्रेक्ष्य राजा वरयन्नुपागतं ततोऽब्रवीज्जानपदान्समागतान्। सिंहोन्नतांसोयमतीव रूपवान्प्रदृश्यते को नु नरर्षभो युवा॥ अद
ष्टपूर्वः पुरुषो रविर्यथा वितर्कयन्नास्य लभामि निश्चयं। तथास्य चित्तं ह्यपि संवितर्कयन्नरर्षभस्याद्य न यामि तत्त्वतः
भाव ।द्रष्टैव विनेन विचारयाम्यहं गंधर्वराजो यदि वा पुरंदरः। जानीत कोयं मम दर्शने स्थितो यदीप्सितं तल्लभतां च मा
चिरं। विराटवाक्येन तु तेन चोदिता नरा विराटस्य सुशीघ्रगामिनः। उपेत्य कौंतेयमथाब्रुवंस्तदा यथा स राजावदद्च्युता

यो धनं। ततोऽभिनावक्ष्यरयामि निविज्ञाव यामि न निश्चितामि॥

विराट

अच्युता उजं अच्युता जानन्नास्मि वोस्मात्। स्थिरश्रेष्ठाव निर्जितइति कोपदर्शनात्। वल्लवो नाम्ना। नज्ञस्वचीकुरु। धनासमेरी
यसेनकेवलमित्याकांक्षायांश्रयति। बलिति सुदृढकुशलो नियुद्धशीलो वाकुशलः समीपिवान् संगतः सत्॥

उजं। ततो विराटं समुपेत्य पांडवः सुदीनरूपो वचनं महामनाः। उवाच सूदोस्मि नरेंद्र वल्लवो भजस्व मां व्यंजनकार मुत्त
मं॥ विराट उवाच॥ नसूदतां मानद श्रद्दधामि ते सहस्रनेत्र प्रतिमो हि दृश्यसे। श्रिया च रूपेण च विक्रमेण च
प्रभासि तातानवरो नरेष्विह॥ भीमसेन उवाच॥ नरेंद्र सूदः परिचारकोस्मि ते जानामि सूपान्प्रथमेन केवलान्॥
आस्वादिता ये नृपते पुरा नवैर्युधिष्ठिरेणापि नृपेण सर्वशः। बलेन तुल्यश्च न विद्यते मया नियुद्धशीलश्च सदैव
पार्थिव। गजैश्च सिंहैश्च समेयिवानहं सदा करिष्यामि तवानघ प्रियं॥ विराट उवाच॥ ददामि ते हंत वरं महान
से तथाधिकुर्याः कुशलं हि भाषसे। नचैव मन्ये तव कर्म तत्समं समुद्रनेमीं पृथिवीं त्वमर्हसि। यथा हि कामस्तव तत्त
था कृतं महानसे त्वं भव मे पुरस्कृतः। नराश्च ये तत्र मम हिताः पुरा भवांश्च तेषामधिपः पुरस्कृतः॥ वैशंपायन उवाच॥
तथा स भीमो विहितो महानसे विराटराज्ञो दयितोऽभवद्दृढं। उवास राजन्न च तं पृथग्जनो बुबोध तत्रानुचरश्च के
चन॥ विराटपर्वणि भीमप्रवेशः॥ वैशंपायन उवाच॥ ततः केशान्समुत्क्षिप्य वेल्लिताग्राननिंदितान्। कृष्णान्सू क्ष्मान्मृदून् २०

अधिकुर्याः अध्यक्षतां कुर्याः। कुशलं सम्यगुचितं पुरस्कृतोऽधिकृतः। विहितः स्थितः। वेल्लिताग्रान् कुटिलेनाधिगतान्
पालियेषां। पृ नसुमध्यमानां।

अन्यच सुखदर्शनैः। समुद्धृत्य वेणीं तामावेन निबध्य। शुशुभेतिपो हुमिंवति। रामाः प्रेषयामि दास्यो मम संतानप्रथा। प्रेषयं
तीति पाठे एवंविधाः स्त्रियो दासीः प्रेषयंत्येव। न तु दास्यास्त्वं तादृशी। गूढौ मांसलौ गुल्फौ पादग्रंथी यस्याः संहतावि रलौ ऊरू य
स्याः। त्रिगंभीरा गंभीरनाभिः स्वरसत्वा। षडुन्नता ति। नासिका चदनं वा ... नखाः कक्षे कृकाटिका। उन्न

दीर्घान्समुद्धृष्य शुचिस्मिता। जुगूह दक्षिणे पार्श्वे मृदूनसितलोचना। वासश्च परिधायैकं कृष्णं सुमलिनं महत्। कृत्वा वे
षं तु सैरंध्र्याः कृष्णा साव्यचरत्तदा। तां नराः परिधावंतीं स्त्रियश्च समुपाद्रवन्। अपृच्छंश्चैव तां दृष्ट्वा का त्वं किं च चिकीर्ष
सि। सा तानुवाच राजेंद्र सैरंध्र्यहमिहागता। कर्म चेच्छामि वै कर्तुं तस्य यो मां बुभूषति। तस्या रूपेण वेषेण श्लक्ष्णया च तथा १
उहरूपाव गिरा। नाश्रद्दधत तां दासीमन्नहेतोरुपस्थितां। विराटस्य तु कैकेयी भार्या परमशोभना। अवलोकयंती ददृशे प्रासादाद्द्रुपदात्मजां
। सा समीक्ष्य तथारूपामनाथामेकवाससं। समाहूयाब्रवीद्भद्रे का त्वं किं च चिकीर्षसि। सा तामुवाच राजेंद्र सैरंध्र्यहमिहागता॥
कर्म चेच्छामि वै कर्तुं तस्य यो मां पुपुक्षति॥ सुदेष्णोवाच॥ नैवंविधा भवंत्येवं यथा वदसि भाविनि। प्रेषयंतीह वै दासीर्दासां
श्चैवंविधान्बहून्। गूढगुल्फा संहतोरुस्त्रिगंभीरा षडुन्नता। रक्ता पंचसु रक्तेषु हंसगद्गदभाषिणी। सुकेशी सुस्तनी श्यामा।

ता निषादता निचास्ता निवरयो पिते। पंचसु रक्तेषु रागविषयेषु अंगेषु रक्ताः। नेत्रांतकरचरणजिह्वोष्ठमिति पंचभिः। र
क्तिर्न वतिरूपस्यमहिमा चक्रवर्तिनः। वाक्यं गंभीरसुरंदर हंसगद्गद मुच्यते॥ ॥

तनानतनगुणासमुदायन॥ अरालकेशिं। अरालपक्ष्मणी नयने यस्याः कंबुग्रीवा त्रिरेखा ग्रीवा यस्याः गूढा मांसला पिहिता शिरा यस्याः॥

विराट

मापीनश्रोणिपयोधरा। तेन तेनैव संपन्ना काश्मीरीव तुरंगमी॥ अरालपक्ष्मनयना बिंबोष्ठी तनुमध्यमा। कंबुग्रीवा गूढशिरा पूर्ण
चंद्रनिभानना॥ शारदोत्पलपत्राक्ष्या शारदोत्पलगंधया। शारदोत्पलसेविन्या रूपेण सदृशी श्रिया॥ का त्वं ब्रूहि यथा भद्रे
नासि दासी कथंचन। यक्षी वा यदि वा देवी गंधर्वी यदि वाप्सराः॥ देवकन्या भुजंगी वा नगरस्याथ देवता। विद्याधरी किंन
री वा यदि वा रोहिणी स्वयं। अलंबुषा मिश्रकेशी पुंडरीकाथ मालिनी॥ इंद्राणी वारुणी वा त्वं त्वष्टुर्धातुः प्रजापतेः। देव्यो दे
वेषु विख्यातास्तासां त्वं कतमा शुभे॥ द्रौपद्युवाच॥ नास्मि देवी न गंधर्वी नासुरी न च राक्षसी। सैरंध्री तु भुजिष्यास्मि सत्य
मेतद्ब्रवीमि ते। केशाञ्जानाम्यहं कर्तुं पिंषे साधु विलेपनं। मल्लिकोत्पलपद्मानां चंपकानां तथा शुभे। ग्रथयिष्ये विचित्राश्च स्र
जः परमशोभनाः॥ आराधयं सत्यभामां कृष्णस्य महिषीं प्रियां। कृष्णां च भार्यां पांडूनां कुरूणामेकसुंदरीं॥ तत्र तत्र चराम्येवं लभ
माना सुशोभनं। वासांसि यावल्लभे तावत्तावद्रमे तथा। मालिनीत्येव मे नाम स्वयं देवी चकार सा। साहमभ्यागता देवी सु
देष्णे त्वन्निवेशनं॥ ॥सुदेष्णोवाच॥ ॥मूर्ध्नि त्वां वासयेयं वै संशयो मे न विद्यते। नो चेदिह तु राजा त्वां गच्छेत्सर्वेण चे ११

प्रसक्ताः एकाग्राः॥ लेखचित्रनिर्मिताः वृक्षा यस्याः गारा हितेरू हुशाक वृक्षाः समां गिहे। मह्यं मम। नच पादौ प्रधावयेत्। मामति

तसा। स्त्रियो राजकुले याश्च याश्चेमा मम वेश्मनि। प्रसक्तास्त्वां निरीक्षंते पुमांसं कं न मोहयेः॥ वृक्षांश्चावस्थितान्पश्य य इमे मम
वेश्मनि। ते पि त्वां संनमंतीव पुमांसं कं न मोहयेः॥ राजा विराटः सुश्रोणि दृष्ट्वा वपुरमानुषं। मां विहाय वरारोहे त्वां गच्छेत्सर्व
चेतसा। यं हि त्वमनवद्यांगि नरमायतलोचने। प्रसक्तमभिवीक्षेथाः स कामवशगो भवेत्। यश्च त्वां सततं पश्येत्पुरुषश्चारुहा
सिनि। एवं सर्वानवद्यांगि स चानंगवशो भवेत्। अध्यारोहेद्यथा वृक्षान्वधायैवात्मनो नरः। राजवेश्मनि ते सुभ्रु गृहे
तु स्यात्तथा मम। यथा च कर्कटी गर्भमाधत्ते मृत्युमात्मनः। तथाविधमहं मन्ये वासं तव शुचिस्मिते॥ द्रौपद्युवाच॥
नास्मि लभ्या विराटेन न चान्येन कदाचन। गंधर्वाः पतयो मह्यं युवानः पंच भामिनि। पुत्रा गंधर्वराजस्य महासत्त्वस्य क
स्यचित्। रक्षंति ते च मां नित्यं दुःखाचारा तथान्वहं। यो मे न दद्यादुच्छिष्टं न च पादौ प्रधावयेत्। प्रीयेयुस्तेन वासेन गंधर्वाः
पतयो मम। यो हि मां पुरुषो गृध्येद्यथान्याः प्राकृतस्त्रियः। तामेव स ततो रात्रिं प्रविशेदपरां तनुं। न चाप्यहं चालयितुं शक्या के
नचिदंगना। दुःखशीला हि गंधर्वास्ते च मे बलवत्प्रियाः। प्रच्छन्नाश्चापि रक्षंति ते मां नित्यं शुचिस्मिते॥ सुदेष्णोवाच॥
एवं त्वां वासयिष्यामि यथा त्वं नंदिनीच्छसि। न च पादौ न चोच्छिष्टं स्प्रक्ष्यसि त्वं कथंचन॥ वैशंपायन उवाच॥ एवं कृष्णा विराट

भाषः। गृध्येत् प्रार्थयेत्। अपरां पारलौकिकीं। नंदिनीति भाव राप मंत्रणं॥

पतिधर्मवती विद्यमानपतिका। प्राहिणोत् प्रेषितवान्। समुपस्थाय समीपमानीय। अष्टशतसाहस्राः अष्टलक्षप्रतीताः॥ वर्गो

विराट

नार्य्याः परिसांत्विता। उवास नगरे तस्मिन्पतिधर्मवती सती। न चैनां वेद तत्रान्यस्तत्वेन जनमेजय॥ महाभारते विराटपर्वणि द्रौपदीप्रवेशः॥ वैशंपायन उवाच॥ सहदेवोपि गोपानां कृत्वा वेषमनुत्तमं। भाषां चैषां समास्थाय विराटमुपयादथ। गोष्ठमासाद्य तिष्ठंतं भवनस्य समीपतः। राजा दृष्ट्वाथ पुरुषान्प्राहिणोज्जातविस्मयः। तमायांतमभिप्रेक्ष्य भ्राजमानं नरर्षभं। समुपस्थाय वै राजा पप्रच्छ कुरुनंदनं। कस्य वा त्वं कुतो वा त्वं किं वा तात चिकीर्षसि। न हि मे दृष्टपूर्वस्त्वं ब्रूहि तत्त्वं नरर्षभ॥ वैशंपायन उवाच॥ संप्राप्य राजानममित्रतापनस्ततोऽब्रवीन्मेघमहौघनिःस्वनः। वैश्योऽस्मि नाम्नाहमरिष्टनेमिनाः संख्यासंख्यः कुरुपुंगवानां। वस्तुं त्वयीच्छामि विशांवरिष्ठ तान्राजसिंहान्नहि वेद्मि पार्थान्। न शक्यते जीवितुमन्यकर्मणा न च त्वदन्यो मम रोचते नृप॥ विराट उवाच॥ त्वं ब्राह्मणो यदि वा क्षत्रियोसि समुद्रनेमीश्वररूपवानसि। आचक्ष्व मे तत्त्वममित्रकर्षण न वैश्यकर्म त्वयि विद्यते समं। कस्यासि राज्ञो विषयादिहागतः किं चापि शिल्पं तव विद्यते कृतं। कथं त्वमस्मासु निवत्स्यसे सदा वदस्व किं चापि तवेह वेतनं॥ सहदेव उवाच॥ पंचानां पांडुपुत्राणां ज्येष्ठो भ्राता युधिष्ठिरः। तस्याष्टशतसाहस्रा गवां वर्गाः शतं शताः॥ अपरे दशसाहस्रा द्विस्तावंतस्तथापरे। तेषां गोसंख्य आसं वै तंतिपालेति मां विदुः॥

सहस्राः॥ एकैको वर्गः अष्टकघणीत इत्यर्थः॥

सुपपादप पावः॥

वि

१२

पर्वं सहमर्दीतीति। तस्य वर्गमानेन वर्गस्य वर्गस्य शतिवर्गस्य प्रमाणं सहस्राणि त्वष्टय॥ वर्गस्य वर्गस्येति पाठ। यानि पश्यनेज्ञात सहस्राणि

भूतं भव्यं भविष्यं च यच्च संख्यागतं क्वचित्। न मेऽस्त्यविदितं किंचित्समंताद्दशयोजनं। गुणाः सुविदितास्त्यासन्मम तस्य महात्मनः। आसीच्च स मया तुष्टः कुरुराजो युधिष्ठिरः। क्षिप्रं हि गावो बहुला भवंति न तासु रोगो भवतीह कश्चन। तैस्तैरुपायैर्विदितं ममैतदेतानि शिल्पानि मयि स्थितानि। वृषभांश्चापि जानामि राजन्पूजितलक्षणान्। येषां मूत्रमुपाघ्राय अपि वंध्या प्रसूयते॥ विराट उवाच॥ शतं सहस्राणि समाहितानि वर्गस्य वर्गस्य विनिश्चिता गुणैः। पशून्सपालान्भवते ददाम्यहं त्वदाश्रया मे पशवो भवंत्विह॥ वैशंपायन उवाच॥ तथा स राज्ञाविदितो विशांपते उवास तत्रैव सुखं नरेश्वरः। न चैनमन्येपि विदुः कथंचन प्रादाच्च तस्मै भरणं यथेप्सितं॥ इति महाभारते विराटपर्वणि सहदेवप्रवेशः॥ वैशंपायन उवाच॥ अथापरोऽदृश्यत रूपसंपदा स्त्रीणामलंकारधरो बृहत्पुमान्। प्राकारवप्रे प्रतिमुच्य कुंडले दीर्घे च कंबू परिहाटके शुभे। बहूंश्च दीर्घांश्च विकीर्य मूर्धजान्महाभुजो वारणमत्तविक्रमः। गतेन भूमिमभिकंपयंस्तदा विराटमासाद्य सभासमीपगः। तं प्रेक्ष्य राजोपगतं सभातले सत्रप्रतिच्छन्नमरिप्रमाथिनं। विराजमानं परमेण वर्चसा सुतं महेंद्रस्य गजेंद्रगामिनं। सर्वानपृच्छच्च समीपचारिणः कुतोयमायाति न मे पुरा श्रुतः। न चैनमूचुर्विदितं तदा नराः सविस्मितं वाक्यमिदं नृपोऽब्रवीत्॥ 7

तस्य वर्गस्य संबंधित्वात्समादिनानि

नात्पश्यानि त्यर्थः। भरणं वेतनं। प्राकारवप्रे प्राकारस्य वप्रः प्राकारवप्रस्तद्वत्कारणप्रिशिच्य पिनद्धा कंबू दीर्घे स्वर्णवलयौ। परिहाटके अंगदे। सत्रमतेन। सत्र प्रतिच्छन्नं छद्मना तिरोहितं॥ ॥

अन्यथाप्रकृतोदृश्येनप्रकारेणापरिक्षवसमर्प्यियासुतंसुतांवति। नपुंसकत्वामकिंकमवधारणायोगात्। कलाचकिलिस्तु॥

विराट सत्योपपन्नःपुरुषोमनोरमःश्यामोयुवावारणयूथपोपमः। विमुच्यकंबूपरिहाटकेस्फुरत्विमुच्यवेणीमपिनह्यकुंडले। शिखी
सुकेशःपरिधायचान्यथाशोभस्वधन्वीकवचीशरीतथा। प्रावृत्यपतामिवसमीयमाशुमविनातिवारस्थ्यथामरस्तथा। आ
रुह्ययानंपरिधावतांभवान्सुतैःसमोमेभववामयासमः। वृद्धोह्यहंवैपरिहारकामःसर्वान्मत्स्यांस्तरसापालयस्व। नैवंवि
धाःक्लीबरूपाभवंतिनाचेतदेवंप्रतिभातिमेमनः॥ ॥अर्जुनउवाच॥ गायामिनृत्याम्यथवादयामिभद्रोस्मिनृत्येकुशलो
स्मिगीते। त्वमुत्तरायैपरिदत्स्वमांस्वयंभवामिदेव्यानरदेवनर्तकः। इदंतुरूपंममयेनकिंतवप्रकीर्तयित्वाममशोकवर्धनं। बृहन्न
लांमांनरदेवविद्धिसुतंसुतांवापितृमातृवर्जितं॥ विराटउवाच॥ ददामितेहंतवरंबृहन्नलेसुतांचमेनर्तययाश्चतादृशी
। इदंतुतेकर्मसमंनमेमतंसमुद्रनेमिंपृथिवींत्वमर्हसि॥ वैशंपायनउवाच॥ बृहन्नलांतामभिवीक्ष्यमत्स्यराट्कला
सुनृत्तेषुतथैववादिते। अपुंस्त्वमप्यस्यनिशम्यचस्थिरंततःकुमारीपुरमुत्ससर्जतं॥ सशिक्षयामासचगीतवादितंसुतांविरा
टस्यधनंजयःप्रभुः। सखीश्चतस्याःपरिचारिकास्तथाप्रियश्चतासांसबभूवपांडवः॥ तथासमत्रैवधनंजयोऽवसत्प्रियाणि
कुर्वन्सहतानिरात्मवान्॥ ॥तथागतंतत्रनजज्ञिरेजनाबहिश्चरावाप्यथवांतरेचराः॥ ॥ १३

\ निशाम्यनिरीक्ष्य॥ ॥

नाक्समीक्षमाणामित्यत्रयः। युक्तोऽभियुक्तः। प्रकृतिस्वभावं। विनयंवितयं॥

॥ इतिमहाभारतेविराटपर्वणिअर्जुनप्रवेशः॥ ॥वैशंपायनउवाच॥ अथापरोदृश्यतपांडवःप्रभुर्विराटराज्ञस्तुरगा
न्समीक्षितः। तमापतंतंददृशुःपृथग्जनाविमुक्तमभ्रादिवसूर्यमंडलं। सवैहयानैक्षततांस्ततस्ततःसमीक्षमाणंचददर्शमत्स्य
राट्। ततोब्रवीत्ताननुगानमित्रहाकुतोयमायातिनरोमरप्रभः। अयंहयान्वीक्षतिमामकान्दृढंध्रुवंहयज्ञोभविताविचक्षणः।
प्रवेश्यतामेषसमीपमाशुमेविभातिवीरोहियथामरस्तथा॥ अभ्येत्यराजानममित्रहाब्रवीज्जयोस्तुतेपार्थिवभद्रम
स्तुते। हयेषुयुक्तोनृपसंमतःसदातवाश्वसूतोनिपुणोभवाम्यहं॥ विराटउवाच॥ ददामियानानिधनंनिवेशनंममाश्वसूतो
भवितुंत्वमर्हसि। कुतोसिकस्यासिकथंत्वमागतःप्रब्रूहिशिल्पंतवविद्यतेचयत्॥ नकुलउवाच॥ पंचानांपांडुपुत्राणां
ज्येष्ठोभ्रातायुधिष्ठिरः। तेनाहमश्वेषुपुरानियुक्तःशत्रुकर्षण। अश्वानांप्रकृतिंवेद्मिविनयंचापिसर्वशः। दुष्टानांप्रतिपत्तिंचकृत्स्नं
चैवचिकित्सितं। नकातरंस्यान्ममजातुवाहनंनमेस्तिदुष्टावडवाकुतोहयाः। जनस्तुमामाहसचापिपांडवोयुधिष्ठि
रोग्रंथिकमेवनामतः॥ विराटउवाच॥ ॥यदस्तिकिंचिन्ममवाजिवाहनंतदस्तुसर्वंत्वदधीनमद्यवै। येचापिकेचि
न्ममवाजियोजकास्त्वदाश्रयाःसारथयश्चसंतुमे। इदंतवेष्टंयदिवैसुरोपमब्रवीहियत्तेप्रसमीक्षितंवसु। नतेनुरू

प्रेम्णा अभिरामं प्रियमभिरामं च। चरंतमज्ञातवासमध्ये। अहं भवत्यां हृतमनायां॥ हिमात्यये विप्रियाय अतिसृष्टानि राजा द नानि।

एवं हयकर्मविद्युतेब्रमासि राजवहि संमतामम। युधिष्ठिरस्य वहिर्श्चानिनामसमं तावदं प्रियदर्शी दर्शनेन। कथं न्वहं तो
सविनाकृता वनेन संस्थनिर्बोरमते बपांडवः॥ ॥वैशंपायन उवाच॥ तथा स गंधर्ववारायमोद्ववा विराटराजस्तु दिते न
स्तूजितः॥ न चैवमन्ये पि विदुः कथं च प्रियाभिरामं विचरंतमंतरा। एवं हि मत्स्यस्य वसंत पांडवाय थाप्रतिज्ञाभिरमोघदर्शनाः॥
अज्ञातचर्यां व्यचरन्समाहिताः समुद्रनेमीपतयो तिदुःखिताः॥ ॥महाभारते विराटपर्वणि नकुलप्रवेशः॥ ॥जनमेजय
उवाच॥ एवं मत्स्यस्य नगरे वसंतस्तत्र पांडवाः॥ अत ऊर्ध्वं महावीर्याः किमकुर्वत वै द्विज॥ वैशंपायन उवाच॥ एवं त
मत्स्यनगरे प्रच्छन्नाः कुरुपांडवाः॥ आराधयंतो राजानं यदकुर्वत तच्छृणु॥ तृणबिंदोः प्रसादेन धर्मस्य च महात्मनः॥ अज्ञातवा
सम एवं तु विराटनगरे वसन्। युधिष्ठिरः सभास्तारः मत्स्यानामभवत्प्रियः। तथैव च विराटस्य सपुत्रस्य विशांपते॥ स ह्यक्षहृदय
ज्ञस्तान्क्रीडयामास पांडवः॥ अक्षवत्यां यथाकामं सूत्रबद्धानिव द्विजान्। अज्ञातं च विराटस्य विजित्य वसु धर्मराट्। भ्रातृभ्य
पुरुषव्याघ्रो यथार्हं स्म प्रयच्छति। भीमसेनो पि मांसानि भक्ष्याणि विविधानि च। अतिसृष्टानि मत्स्येनो विक्रीणाति युधिष्ठि १४
रे

अज्ञातागर्भ स्त्रव। संपादयंतः स्वविनिविर्ष्ये जयंता॥ तत्र त्वयाः मगवीः उ दयासाधिकाः सुखदाता सुस्सुखाः स्वच्छलज्ञाः कृतक

वासांसि परिजीर्णानि लब्धान्यंतःपुरेऽर्जुनः। विक्रीणानश्च सर्वेभ्यः पांडवेभ्यः प्रयच्छति। सहदेवोपि गोपानां वेषमास्थाय पां
डवः। दधि क्षीरं घृतं चैव पांडवेभ्यः प्रयच्छति। नकुलोपि धनं लब्ध्वा कृते कर्मणि वाजिनां। तुष्टे तस्मिन्नरपतौ पांडवेभ्यः प्रयच्छ
ति। कृष्णापि सर्वान्भ्रातॄंस्तान्निरीक्षंती तपस्विनी। यथा पुनरविज्ञाता तथा चरति भामिनी। एवं संपादयंतस्ते तथान्योन्यं मह
रथाः॥ विराटनगरे चेरुः पुनर्गर्भगता इव। सशंका धार्तराष्ट्रस्य भयात्पांडुसुतास्तदा। प्रेक्षमाणास्तदा कृष्णां ऊषुश्छन्ना नराधिप॥ अ ल्पोय
थ मासे चतुर्थे तु ब्रह्मणो सुमहोत्सवः। आसीत्समृद्धो मत्स्येषु पुरुषाणां सुसंमतः। तत्र मल्लाः समापेतुर्दिग्भ्यो राजन्सहस्रशः।
।समागता ब्रह्मणो रजे स्त्र यथा पशुपतेरपि। महाकाया महावीर्याः कालकंजा इवासुराः॥ वीर्योन्नता बलोदग्रा राज्ञा समभिपूजिता
ः सिंहस्कंधकटिग्रीवाः स्ववदाता मनस्विनः। असकृल्लब्धलक्षास्ते रंगे पार्थिवसंनिधौ। तेषामेको महानासीत्सर्वमल्लान्समा
ह्वयत्। आवल्गमानं तं रंगे नोपतिष्ठति कश्चन। यदा सर्वे विमनसस्ते मल्ला हतचेतसः। अथ सूदेन तं मल्लं योधयामास म
त्स्यराट्। चोद्यमानस्ततो भीमो दुःखेनैवाकरोन्मतिं। न हि शक्नोति विवृते प्रत्याख्यातुं नराधिपं। ततः स पुरुषव्याघ्रः शार्दूल
शिथिलं चरन्। प्रविवेश महारंगं विराटमभिहर्षयन्। बबंध कक्षां कौंतेयस्ततः संहर्षयन् जनं। ततस्तं वृत्रसंकाशं भीमो मल्लं

मीरा॥ रंगरंगांगणे। एको जीमूतः॥ दुःखेन अतिस्वयाः। विवृतं व्यक्तं। शार्दूलशिथिलां शार्दूलवसावसः। कक्षा सुदृढा दांकौ॥

विराट

संपातः संघर्षः॥ चित्रैर्नानाविधैः संकंकटैः। कस्यचिद्रणासंघर्षतित्रकोष्ठे बाह्वयोर्धितं॥ किरा॥ प्रकर्षेनैव तियः कंकटस्तं प्रचस
न। करास्यामविस्तनेपश्चात्रात्वकूरामतं॥ मुष्टिरित्युच्यते प्राणो। संहतां कुचितांगुलिः। अत्र वा सु स्वंत्रामयि वा पीडयित्वा
ताड्येवचा॥ शिलसंघट्टः मत्त मुद्गराहाहत निस्वनः॥ तर्जन्यंगुलमध्येन प्रसारितकरादियः। संप्रहारस्तलाख्यास्तु मयाद्दो

समाह्वयत राजीमूतं नाम तत्र महाबलं विख्यातविक्रमं। तावुभौ सुमहोत्साहावुभौ तीव्रपराक्रमौ। मत्ताविव महाकायौ वा
रणौ षष्टिहायनौ। ततस्तौ नरशार्दूलौ। बाहुयुद्धे समीयतुः॥ वीरौ परमसंहृष्टावन्योन्यजयकांक्षिणौ। आसीत्सुभीमः संपातो

कंकटैः पादः

वज्रपर्वतयोरिव। उभौ परमसंहृष्टौ बलेनातिबलावुभौ। अन्योन्यस्यांतरप्रेप्सू परस्परजयैषिणौ॥ उभौ परमसंहृष्टौ मत्ता
विव महागजौ। कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसंकटैः। सन्निपातावधूतैश्च प्रमाथोन्माथनैस्तथा। क्षेपणैर्मुष्टिभिश्चैव
वराहोद्धूतनिःस्वनैः। तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च। शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः। जानुभिश्चा
श्मनिर्घोषैः शिरोभिश्चावघट्टितैः। तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा॥

वज्रनिष्पेतो न खाह्यातिर्निर्घाघातपादोद्धूतं यद्वाहविः। अश्मनिर्घोषैः शिलासंघट्टशब्दसमस्वनैः॥ टीकांतरे तु रोत्स्याघातः॥
संनिपातः। अवधूतं यादेनाचप्रेरणं। प्रमाथो मथ्नो प्रतिनस्यनिः। चेष्टनं। क्षेपणैर्दूरगमनप्रेरणैः। अर्धा स्थुरं स्वस्थानमतित्वान १५
पेव यः। किंतस्य चाष्टः सवराहोद्धूतनिस्वनः। शलाका हस्तपादयोः शरीकरणं॥

टीकांतरे

बलप्राणेन बलेन बलवद्दतिशयेनातिक्रुद्धः स्वनितं॥ प्रदायवदंह्रिणाकृष्टिः प्रकर्षणमिहोच्यते। न चेदाकर्षणं नामसं

बलप्राणेन शूराणां समाजोत्सवसंनिधौ। अरज्यत जनः सर्वः सोत्कृष्टनिनदोत्थितः। कीचकोपियदामत्संनचिशेष्यते बली
। तदा सुदेनं तं राजा योधयामास मात्सरात्। बलिनोः संयुगे राजन्वृत्रवासवयोरिव। प्रकर्षणाकर्षणयोरभ्याकर्षविकर्ष
णैः। आकर्षणात्तामन्योन्यं जानुभिश्चाभिजघ्नतुः। ततः शब्देन महता भर्त्सयंतौ परस्परं। व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावु
भौ। बाहुभिः समसज्जेतामायसैः परिघैरिव। एवं तदतनवद्घोरं तयोस्तत्र महोत्सवे। बलिनोः संयुगे राजन्निंद्रप्रह्लादयोरि
व। चकर्ष दोर्भ्यामुत्पाट्य भीमो मल्लममित्रहा। बलवंतमतिक्रोधाद्धाइलद्वचारणं। तमुद्यम्य महाबाहुर्भ्रामयामा
स वीर्यवान्। ततो मल्लाश्च मत्स्याश्च विस्मयं चक्रिरे परं। भ्रामयित्वा शतगुणं गतसत्वमचेतनं। प्रत्यपिंषन्महाबाहुर्म
ल्लं भुवि वृकोदरः। तस्मिन्विनिहते मल्ले जीमूते लोकविश्रुते। विराटः परमं हर्षमगच्छद्बांधवैः सह। संहर्षात्प्रददौ वि
त्तं बहु राजा महामनाः। वल्लवाय महारंगे यथा वैश्रवणस्तथा। एवं स सुबहून्मल्लान्पुरुषांश्च महाबलान्। विनिघ्न
न्मत्स्यराजस्य प्रीतिमाहरदुत्तमां। यदास्य तुल्यः पुरुषो न कश्चित्तत्र विद्यते। ततो सिंहैश्च व्याघ्रैश्च द्विरदैश्चाप्ययोधयत्॥

भुवानयनं बलात्। भ्रामणं मंडलाकारमभ्याकर्षणमुच्यते। अकृष्य यस्मात्रयनं यत्तदाकृविकर्षणं॥ प्रकर्षणाकर्षण
योरितिद्वीयार्धेऽर्थद्वी। तन्माद्युतत्क्रिया वा एव॥ ॥

विराट०
पत्र०

जीमूतवधः॥ ॥तत्रैव सुतिग्रहेषु कामयामास कामितवान्॥

पुनरेतां पुरगतः स्त्रीगणमध्ये वृकोदरः योध्यते स्म विराटेन सिंहैर्मत्तैर्महाबलैः। बीभत्सुरपि गीतेन सुनृत्येन च पांड
वः॥ विराटं तोषयामास सर्वाश्चांतःपुरस्त्रियः। अश्वैर्विनीतैर्जवनैस्तत्र तत्र समागतैः। तोषयामास राजानं नकुलो राज
सत्तमः॥ तस्मै प्रदेयं प्रायच्छत् प्रीतो राजा धनं बहु। विनीतान् वृषभान् दृष्ट्वा सहदेवस्य चाभिभो। द्रौपदी प्रेक्ष्य तान् सर्वान्
क्लिश्यमानान् महारथान्। नातिप्रीतमना राजन् निःश्वासपरमाभवत्। एवं ते न्यवसंस्तत्र प्रच्छन्नाः कुरुनंदनाः। कर्माणि
तस्य कुर्वाणा विराटनृपतेस्तदा॥ ॥महाभारते विराटपर्वणि मल्लयुद्धे जीमूतवधः॥ ॥वैशंपायन उवाच॥ ॥वसमा
नेषु पार्थेषु विराटनगरे तदा। महारथेषु छन्नेषु मासा समत्ययुः। याज्ञसेनी सुदेष्णां तु शुश्रूषंती विशांपते। तां देवीं
तोषयामास तथा चांतःपुरस्त्रियः। अवसत् परिचारार्हा सुदुःखं जनमेजय। तथा चरंतीं पांचालीं सुदेष्णाया निवेशने।
तस्मिन् वर्षे गतप्राये कीचकः सूतनंदनः। सेनापतिर्विराटस्य ददर्श द्रुपदात्मजां। तां दृष्ट्वा देवगर्भाभां चरंतीं देवतामिवा की
चकः कामयामास कामबाणप्रपीडितः। स तु कामाग्निसंतप्तः सुदेष्णामभिगम्य वै। प्रहसन्निव सेनानीरिदं वचनमब्रवी
त्॥ ॥कीचक उवाच॥ ॥नेयं पुरा जातु मयेह दृष्टा राज्ञो विराटस्य निवेशने शुभा। रूपेण चोन्मादयतीव मां भृशं गंधेन २६

प्रत्यग्ररूपा प्रहृष्टसर्वांगोदर्या। मां शुचिस्मितानिमहं रोचते। अयं श्रेष्ठं। दृक्षण पक्ष्मणां को लां तनं यस्मिन्। स्मितज्योत्स्नो

जाता मदिरेव भाविनी। का देवरूपा हृदयंगमा शुभा आचक्ष्व मे तस्य कुतश्च शोभना। चित्तं हि निर्मथ्य करोति मां
वशे न चान्यदत्रौषधमस्ति मे मतं। अहो तवेयं परिचारिका शुभा प्रत्यग्ररूपा प्रतिभाति मामियं। अयुक्तरूपं हि करो
ति कर्म ते प्रशास्तु मां यच्च ममास्ति किंचन। प्रभूतनागाश्वरथं महाजनं समृद्धियुक्तं बहुपानभोजनं। मनोहरं कांच
नचित्रभूषणं गृहं महच्छोभयतामियं मम। ततः सुदेष्णामनुमंत्र्य कीचकस्ततः समभ्येत्य नराधिपात्मजां। उवाच कृष्णा
मभिसांत्वयंस्तदा मृगेंद्रकन्यामिव जंबुको वने॥ ॥कीचक उवाच॥ ॥का त्वं कस्यासि कल्याणि कुतो वा त्वं शुभा
नने। प्राप्ता विराटनगरं तत्त्वमाचक्ष्व शोभने। रूपमग्र्यं तथा कांतिः सौकुमार्यमनुत्तमं। कांत्या विभाति वक्त्रं ते शशांक
इव निर्मलं। नेत्रे सुविपुले सुभ्रु पद्मपत्रनिभे शुभे। वाक्यं ते चारुसर्वांगि परपुष्टरुतोपमं। एवंरूपा मया नारी का
चिदन्या महीतले। न दृष्टपूर्वा सुश्रोणि यादृशी त्वमनिंदिते। लक्ष्मीः पद्मालया किं त्वं भूतिः सुमध्यमे। ह्रीः श्रीः कीर्ति
रथो कांतिरासां का त्वं वरानना। रतीव रूपिणी किं त्वमनंगांगविहारिणी। अतीव भ्राजसे सुभ्रु चंद्रस्येवोत्तमा प्रभा। अपि
चेक्षणपक्ष्माणां स्मितज्योत्स्नोपमं शुभं। दिव्यांशुरश्मिभिर्व्याप्तं दिव्यकांतिमनुत्तमं। निरीक्ष्य वक्त्रचंद्रं ते लक्ष्म्यानुपर
मया युतं। कृत्स्ने जगति को नेह कामस्य वशगो भवेत्। हारालंकारयोग्यौ ते स्तनौ चेतौ सुशोभनौ। सुजातौ सहितौ ल
ना
पमं स्मृतमेव ज्योत्स्नामागतं॥

हयोव श्रुतौ । श्रुतो हि पुञ्जनामिव । वलीनां उदरगतानां रत्वानां विजंगेन निम्नो जनचित्ताजेन वक्त्रं शोभनं । असाध्योऽनन्यसा
ध्यापीनो हृद्यो निरंतरः । कुड्मलांबुरुहाकारौ तव सुभ्रु पयोधरौ । कामप्रतोदाविव मां तुदतश्चारुहासिनि । वलीविभंगच
तुरं स्तनभारविनामितं । कराग्रसंमितं मध्यं तवेदं तनुमध्यमे । दृष्ट्वैव चारु जघनं सरित्पुलिनसन्निभं । कामव्याधिरसाध्यो मा
मप्याक्रामति भामिनि । ज्वाला चानपशमदनो दावाग्निरिव निर्दयः । त्वत्संगमाभिसंकल्पविवृद्धो मां दहत्ययं । आत्मप्रदा
नवर्षेण संगमांभोधरेण च । शमयस्व वरारोहे ज्वलंतं मन्मथानलं । मच्चित्तोन्मादनकरा मन्मथस्य शरोत्कराः । त्वत्संगमा
शानिशिताः तीव्राः शशिनिभानने । मह्यं विदार्य हृदयमिदं निर्दयवेगिताः । प्रविष्टा ह्यसितापांगि प्रचंडाश्चातिदारु
णाः । अत्युन्मादकरारम्भाः प्रीत्युन्मादकरा मम । आत्मप्रदानसंभोगैर्मामुद्धर्तुमिहार्हसि । चित्रमाल्यांबरधरा सर्वाभरण त्व
भूषिता । कामं प्रकामं सेव त्वं मया सह विलासिनि । नार्हसीहासुखं वस्तुं सुखार्हा सुखवर्जिता । प्राप्नुह्यनुत्तमं सौख्यं
मत्तस्त्वं मत्तगामिनि । स्वादून्यमृतकल्पानि पेयानि विविधानि च । पिबमाना मनोज्ञानि रममाणा यथासुखं । भोगोपचारा
न्विविधान्सौभाग्यं चाप्यनुत्तमं । पानं पिब महाभागे भोगैश्चानुत्तमैः शुभैः । इदं हि रूपं प्रथमं तवेदं निरर्थकं केवलमद्य भा
विनि । अधार्यमाणा स्रगिवोत्तमा शुभा न शोभसे सुंदरि शोभना सती । त्यजामि दारान्मम ये पुरातना भवंतु दास्यस्तव चा २१
ध्यः । कारकरा हिंसामिश्राप्यविनः । कारो निस्त्रर्यहिंसयोरित्यनिधाना तयापि पिवनिवा ॥

अतिमन्यसे । प्रार्थयसे । जातु कदाचित । मिथ्याभिगृध्नोऽस[illegible]युक्ताभिलाषी ॥

रुहासिनि । अहं च ते सुंदरि दासवत्स्थितः सदा भविष्ये वशगो वरानने ॥ ॥द्रौपद्युवाच॥ ॥अप्रार्थनीयामिह मां सूतपुत्रा
भिमन्यसे । विहीनवर्णां सैरंध्रीं बीभत्सां केशकारिकां । परदारास्मि भद्रं ते न युक्तं त्वयि सांप्रतं । दयिताः प्राणिनां दारा धर्मं सम
नुचिंतय । परदारे न ते बुद्धिर्जातु कार्या कथंचन । विवर्जनं ह्यकार्याणामेतत्सत्पुरुषव्रतं । मिथ्याभिगृध्नो हि नरः पापा
त्मा मोहमास्थितः । अयशः प्राप्नुयाद्घोरं सुमहत्प्राप्नुते भयं ॥ ॥वैशंपायन उवाच॥ ॥एवमुक्तस्तु सैरंध्र्या कीचकः काममोहि
तः । जानन्नपि सुदुर्बुद्धिः परदाराभिमर्षणे । दोषान्बहून्प्राणहरान्सर्वलोकविगर्हितान् । प्रोवाचेदं सुदुर्बुद्धिर्द्रौपदी
मजितेंद्रियः ॥ ॥कीचक उवाच॥ ॥नार्हस्येवं वरारोहे प्रत्याख्यातुं वरानने । मां मन्मथसमाविष्टं त्वत्कृते चारुहासिनि । प्र
त्याख्याय हि मां भीरु वशगं प्रियवादिनं । नूनं त्वमसितापांगि पश्चात्तापं करिष्यसि । अहं हि सुभ्रु राज्यस्य कृत्स्नस्यास्य सुम
ध्यमे । प्रभुर्वासयिता चैव वीर्येणाप्रतिमः क्षितौ । पृथिव्यां मत्समो नास्ति कश्चिदन्यः पुमानिह । रूपयौवनसौभाग्यैर्भोगैश्चा
नुत्तमैः शुभैः । सर्वकामसमृद्धेषु भोगेष्वनुपमेष्विह । भोक्तव्येषु च कल्याणि कस्माद्दास्ये रता ह्यसि । मया दत्तमिदं राज्यं
स्वामिन्यसि शुभानने । नतश्च मां वरारोहे भुंक्ष्व भोगाननुत्तमान् ॥ ॥वैशंपायन उवाच॥ ॥एवमुक्ता तु सा साध्वी कीचकेना

शक्या लब्धुमिनिशेषः। लभ्येति वा पाठः। अलंकाराणो। यथा चामात्यजनीनराः। विनाशं मा गाः। अन्तर्महीत्वमिच्छं मन्यसे

विराट शकयायव

अनेनरज्ञः। कीचकं प्रस्तुवाचेदं गार्हस्थ्यं धर्मकहः॥ ॥सैरिंध्युवाच॥ ॥मा सूतपुत्र मुह्यस्व मात्यप्ताक्षीन्नजीवितं जानी
हि यंचनिष्ठितेन्यं मा वीरैरभिरक्षिता। न चाप्यहं त्वया लभ्या गंधर्वाः पतयो मम। ते त्वां निहन्युः कुपिता माऽधर्मं मा व्यनीनशः। अ
शक्यरूपं पुरुषैरभ्यागंतुमिच्छसि। यथा निश्चेतनो बालः कूलस्थः कूलमुत्तरं। तर्तुमिच्छति मंदात्मा तथा त्वं कर्तुमिच्छसि।
अंतर्महीं वा यदि वोर्ध्वमुत्पतेः समुद्रपारं यदि वा प्रधावसि। तथापि तेभ्यो न विमोक्षमर्हसि प्रमाथिनो देवसुता हि मे चराः। त्वं का
लरात्रीमिव कश्चिदातुरः किं मां दृढं प्रार्थयसेऽद्य कीचक। ते मां प्रियां प्रार्थयमेनतेन दृशं गत्वा दिवं चाशरणं न विष्पसि। निवर्त्ती
ते कीचक नेह शास्त्रं जातं शिवं जीवितमप्यसुप्रियं। किं मातुरंके शयितो यथा शिशुश्चंद्रं जिघृक्षन्निव मान्यसे हि मां॥ ॥इ
ति महाभारते विराटपर्वणि॥ ॥वैशंपायन उवाच॥ ॥प्रत्याख्यातो राजपुत्र्या सुदेष्णां कीचकोऽब्रवीत्। अमर्यादेन का
मेन घोरेणाभिपरिप्लुतः॥ ॥कीचक उवाच॥ ॥यथा कैकेयि सैरिंध्री समेयात्तद्विधीयतां। येनोपायेन सैरिंध्रा रमेयं त
द्विधीयतां। येनोपायेन सैरिंध्री भजे मां मत्तगामिनी। तं सुदेष्णे परीप्सस्व मा हं प्राणान् प्रहासिषं॥ ॥वैशंपायन उवाच॥
तस्य तां बहुशः श्रुत्वा वाचं विलपतस्तदा। विराटमहिषी देवी कृपां चक्रे मनस्विनी। स्वमर्थमभिसंधाय तस्यार्थमनुचिंत्य च॥ २९

वीवसि। अमर्यादेनस्थित्यतिक्रांतेन। अनवधिना वा। परीप्सस्व। परिचिंतय॥

पर्वणीं नीमे रविमुद्दिश्य। तिरवगृहे निष्प्रतिबंधे। आहारयामास संस्कृतवान्। सुपरिष्कृतां मदिरां मेदेन सहितां। आजौ ब्रह्मु

उद्वेगं चैव कृष्णायाः सुदेष्णा सूतमब्रवीत्॥ ॥सुदेष्णोवाच॥ ॥पर्वणीं त्वं समुद्दिश्य सुरामन्नं च कारय। तत्रैनां प्रेषयिष्या
मि सुराहारीं तवांतिकं। तत्र संप्रेषितामेनां विजने निरवग्रहां। सांत्वयेथा यथाकामं सांत्व्यमाना रमिष्यसि॥ ॥वैशंपायन उ
वाच॥ ॥एवमुक्त्वा तु निष्क्रम्य स भगिन्या वचनात्तदा। सुरामाहारयामास राजार्हां सुपरिष्कृतां। अनेकश्च विविधाकारान्
बहूंश्चोच्चावचांस्तथा। आजोरभ्रं च सुभृशं कुक्कुटांश्चावचांस्तथा। कारयामास कुशलैरन्नपानं सुशोभनं। तस्मिन् कृते त
दा देवी कीचकेनोपमंत्रिता। सुदेष्णा प्रेषयामास सैरिंध्रीं कीचकालयं॥ ॥सुदेष्णोवाच॥ ॥उत्तिष्ठ गच्छ सैरिंध्रि कीचकस्य
निवेशनं। पानमानय कल्याणि पिपासा मां प्रबाधते॥ ॥सैरिंध्र्युवाच॥ ॥न गच्छेयमहं तस्य कीचकस्य निवेशनं। नाहमेषा सत्य

सा त्वं सर्वविजा

कल्याणि पियासा मां प्रबाधते॥ ॥सैरिंध्र्युवाच॥ ॥नाभि यथा मतिरपत्रः। न चाहमनवद्यांगि तव वेश्मनि भामिनि। कामवृ
त्ता भविष्यामि पतीनां व्यभिचारिणी। त्वं चैव देवि जानासि यथा स समयः कृतः। प्रविशंत्या मया पूर्वं तव वेश्मनि भाविनि। कीचकस्तु
सुकेशांते मूढो मदनदर्पितः। सोऽवमंस्यति मां दृष्ट्वा न यास्ये तत्र शोभने। संति बह्व्यस्तव प्रेष्या राजपुत्रि वशानुगाः। अन्यां प्रेषय भद्रं
ते स हि मामवमंस्यते॥ ॥सुदेष्णोवाच॥ ॥नैव त्वां जातु हिंस्यात्स इतः संप्रेषितां मया। इत्यस्याः प्रददौ कांस्यं सपिधानं हिरण्मयं। सा शं

उमेषतर्कं मांसं। कांस्यं भाजनं। सपिधानं आगादनं। शंकमाना बिभ्यती। दैवमादृतं॥

ततरेहः सुरुणस्तस्तना। आहरं आहृतवानस्मि मधुकौशं सुद्य रसंवा + माध्वी महं परिस्रुतां मदिरां पर्याप्त शतं गृहीनवा
ना।

 कमानारुरवीदेवं तारणामीसुबी। इति प्रतस्तुराहारी कीचकस्यनिवेशनं॥ ॥द्रौपद्युवाच॥ ॥यथाहमन्यं पांडुभ्यो नाभिजानामि
केचनानेनसत्येन मां प्राप्तं कीचको मावशे करोत्॥ ॥वैशंपायनउवाच॥ ॥उपातिष्ठतसा सूर्यं सुकुर्वे मवशात्तदा। सततस्यास्तु
मध्यायाः सर्वं सूर्योविबुद्धवांस्तदा। अंतर्हितेन नस्त्वमप्यारक्षोरक्षार्थमादिशत्तां न विहितानां त्वाहानत्रयसर्वावस्थास्वनिंदितां। तां दृष्ट्वाभि
वमंत्रस्तां रह्यारूप्लां सुशोभनेतिवदति हृष्ट्वा स्तनाविलक्षेवपारगः॥ ॥महाभारतेविराटपर्वणि॥ ॥कीचकउवाच॥ ॥
स्वागतं ते सुकेशांते सुव्युष्टा रजनी मम। स्वामिनी त्वमनुप्राप्ता प्रकुरुष्व मम प्रियं। सुवर्णमालाः कंबूश्च कुंडले परिहाटके ना
नापत्तनजे शुभ्रे मणिरत्नं च शोभनं। आनरयामि च वस्त्राणि कौशेयान्यजिनानि च। अस्ति मे शयनं दिव्यं त्वदर्थमुपक
ल्पितं। एहि तत्र मया सार्धं पिबस्व मधुमाधवीं॥ ॥द्रौपद्युवाच॥ ॥अप्रैषीद्राजपुत्री मां सुराहारी तवांतिकं। पानमानय
मे क्षिप्रं पिपासा मां प्रबाधते॥ ॥कीचकउवाच॥ ॥अन्या भद्रे नयिष्यंति राजपुत्र्याः परिस्रुतं। इत्युक्त्वा दक्षिणे पाणौ
सूतपुत्रः परामृशत्। सता मनुप्रेक्ष्य विशालनेत्रां अभिवृकमाराः परिनक्षीयेतां। अग्रारराजसुदर्शनं दे शो सकीचकस्ता स्त्र
महसाक्षिप्यंतां। इत्युक्त्वा मासा तामहाजवेन सुकुर्विनिक्षस्तराजपुत्री। विक्षेपयंतं गाहमसदृशमा णाभवेपमानातिक २९

विक्षेपयेदे। केशपक्षे परामृशत्। अपीवाह्यात्मनोतवाक्यं कीचकः। वधतोडनं। आकारस्तुव्यंजकं। षष्ठेपिविषयेऽरिमित्रलक्षणोविधिर्गाथा
पांचालांगी। तयासमाक्षिप्तमनुस्सपापः पपात शाखीव निकृत्तमूलः। माधवीताविधुन्वाना भूमावाक्षिप्य कीचकं। सभां शरणमा
गच्छद्यत्र राजा युधिष्ठिरः। तां कीचकः प्रधावंती केशपक्षे परामृशत्। अथैनां पश्यतां राज्ञः पातयित्वा पदाहनत्। तस्यां यो सौत
दार्कणाराक्षसः स नियोजितः। स कीचकमपोवाह वातवेगेन भारत। स पपात ततो भूमौ रक्षोबलसमाहतः। विघूर्णमानो निश्चेष्ट
श्छिन्नमूल इव द्रुमः। तां चासीनौ ददृशतुर्भीमसेनयुधिष्ठिरौ। अमृष्यमाणौ कृष्णायाः कीचकेन पदावधं। तस्य भीमो वधंप्रेप्सुः की
चकस्य दुरात्मनः। दंतैर्दंतांस्तदा रोषान्निष्पिपेष महामनाः। धूमच्छाया ममभवन्नेत्रे चोच्छ्रितपक्ष्मणी। सस्वेदा भृकुटी चोग्रा
ललाटे समवर्तत। हस्तेन ममृदे चैव ललाटं परवीरहा। भूयश्च त्वरितः क्रुद्धः सहसोत्थातुमैच्छत। अथांगुष्ठेनावमृद्नाद
अंगुष्ठं तस्य धर्मराट्। प्रबोधनभयाद्राजा भीमं तं प्रत्यषेधयत्। सा रमा द्वारमासाद्य रुदती मत्स्यमब्रवीत्। अवेक्षमाणा सुश्रोणी
पतींस्तान्दीनचेतसः। आकारमभिरक्षंती धर्मज्ञा धर्मसंहिता। दह्यमानेन रौद्रेण चक्षुषा द्रुपदात्मजा॥ द्रौपद्युवाच
येषां वैरी न स्वपिति षष्ठेपि विषये वसन्। तेषां मां मानिनीं भार्यां सूतपुत्रः पदावधीत्। ये दद्युर्न च याचेयुर्ब्रह्मण्याः सत्य
वादिनः। तेषां मां मानिनीं भार्यां सूतपुत्रः पदावधीत्। येषां दुंदुभिनिर्घोषो ज्याघोषः श्रूयते निशं। तेषां मां मानिनीं भार्यां

मित्ररिपुरात्मनः पक्षो नवति। सुखंदुःमित्रपक्षं शानितिवापावः। दुंदुभेर्निर्घोषा यस्य॥

ऽपन्नानां पशरण्यं भवंती त्पद्धयः। क्लीबा विक्रमहीनाः मयरीस्ते तिन प्रतिकुर्वन्ति। विग्रहं कलहं। न्यूयोऽस्पर्ध्यः॥

विराट स्सूतपुत्रः पदावधीत्। यत्त्याना येच वांता स्त्रवर्नेवांता भिमानिनः॥ तेषां मां मानिनीं भार्यां सूतपुत्रः पदावधीत्। सर्वलोकमिमं हन्यु
र्ये धर्मपाशसितास्तु ये। तेषां मां मानिनीं भार्यां सूतपुत्रः पदावधीत्। ये च ते तेजस्विनो दांता बलवंतो मनस्विनः॥ तेषां मां मानिनीं भा
र्यां सूतपुत्रः पदावधीत्। शरणं ये प्रपन्नानां भवंति शरणार्थिनां। चरंति लोके प्रच्छन्नाः क्व नु तेऽद्य महारथाः। कथं ते सूतपु
त्रेण वध्यमानां प्रियां सतीं। मर्षयंति यथा क्लीबा बलवंतोऽमितौजसः। क्व नु तेषाममर्षश्च वीर्यं तेजः प्रवर्तते। न परीप्संति
ये भार्यां वध्यमानां दुरात्मना। मया तु शक्यं किं कर्तुं विराटे धर्मदूषणं। यः पश्यन्मां मर्षयति वध्यमानामनागसं। न राजन्रा
जवत्किंचित्समाचरसि कीचके। दस्यूनामिव धर्मस्ते न हि संसदि शोभते। न कीचकस्य धर्मज्ञो न च मत्स्यः कथंचन। सभासदो
प्यधर्मज्ञा य इमं पर्युपासते। एवं विधैर्वचोभिः सा तदा कृष्णाश्रुलोचना। उपालभत राजानं मत्स्यानां वरवर्णिनी। नाहमेतत्
न शुक्ला विरहं तं मत्स्यं तवांतिकं। समासद्य परवं पतु का च कस्य व्यतिक्रमं॥ विराट उवाच॥ परोक्षं नाभिजानामि विग्र
विज्ञाय हं युवयोरहं। अर्थतत्त्वमविज्ञाय किं नु स्यात्कौशलं मम॥ वैशंपायन उवाच॥ ततस्तु सभ्या विज्ञाय कृष्णां भूयोऽ २०
भ्यपूजयन्। साधु साध्विति चाप्याहुः कीचकं च व्यगर्हयन्॥ सभ्या ऊचुः॥ यस्येयं चारुसर्वांगी भार्या स्याद
म

अत्र मास्वाड्यन्त्रयः। अनुरुंधत्यो अनुवर्तमानाः। उत्तरं नंतरं। शौन्ती नरी। घृणितां विचिकित्सितां। पश्यतस्य इत्यग्ने

श्च ते कृष्णा। परोलाभस्तस्य स्यान्न स शोचेत्कदाचन। न हीदृशीं मनुष्येषु सुलभां वरवर्णिनीं। नारीं मन्यामहे सर्वां देवीं मन्याम
हे वयं॥ वैशंपायन उवाच॥ एवं संपूजयंतिस्ते कृष्णां प्रेक्ष्य सभासदः। युधिष्ठिरस्य कोपेन ललाटे स्वेद आगमत्। अथा
ब्रवीद्राजपुत्रीं कौरव्यो महिषीं प्रियां। गच्छ सैरिंध्रि मात्र स्थाः सुदेष्णाया निवेशनं। भर्तारमनुरुंधंत्यः क्लिश्यंते वी
रपत्नयः। शुश्रूषया क्लिश्यमानाः पतिलोकं जयंत्युत। मन्ये न कालं क्रोधस्य पश्यंति पतयस्तव। तेन त्वां नाभिधावंति गंध
न र्वो कोपधंति न वध्रियं। व्यपनेष्यंति ते दुःखं ध्रुवं विप्रियकृतं॥ सैरिंध्र्युवाच॥ अतीव घृणिनां तेषां मन्येऽहं धर्मचारिणी। का
स्य कस्य ते चाप्य येषां ज्येष्ठोऽक्षदेवता॥ वैशंपायन उवाच॥ इत्युक्त्वा प्राद्रवत्कृष्णा सुदेष्णाया निवेशनं। केशान्मुक्त्वा तु
सैरिंध्री संरंभाल्लोहितेक्षणा। शुशुभे वदनं तस्या रुदिताया विरोचितं तदा। मेघलेखाविनिर्मुक्तं दिवीव शशिमंडलं॥ सुदेष्णोवा
च॥ कस्त्वावधीद्वरारोहे कस्माद्रोदिषि शोभने। कस्याद्य न सुखं भद्रे केन ते विप्रियं कृतं॥ द्रौपद्युवाच॥ कीचको मा
राज्ञी वधीत्तत्र सुराहारीं गतां त्वया। सभायां पश्यतो राज्ञो यथैव विजने तथा॥ सुदेष्णोवाच॥ घातयामि सुकेशांते कीचकं य
दि मन्यसे। योऽसौ त्वां कामसंमत्तो दुर्लभामभिमन्यते॥ द्रौपद्युवाच॥ ॥
र्वाः सूर्यवर्चस॥ अकालज्ञासि सैरिंध्रि शैलूषीव विधावसि। विघ्नं करोषि मत्स्यानां दीव्यतां राजसंसदि। गच्छ सैरिंध्रि गंधर्वाः ४६

ऋगोऽस्य राज्ञः सेनावाहस्य सेनाम ते॥ शौचमेव त्वयाचष्ट गात्राणीनि छिधि रिये। संस्पृष्टिन्ता प्रति छिविते च। पांचाली नी
अन्येनं विवधिष्यंति येषां माराः करोति मः। मन्ये चाद्यैव सुव्यक्तं परलोकं गमिष्यति॥ ॥इति महाभारते विराट८०प
र्वणि॥ ॥वैशंपायन उवाच॥ ॥सा हता सूतपुत्रेण राजपुत्री यशस्विनी। वधं कृष्णा परीप्सवशः कृत्वा स सलिलेन
स्यंती सेनावाहस्य भाविनी। जगामावासमेवाथ तदा सा द्रुपदात्मजा। कृत्वा शौचं यथान्यायं कृष्णा सा तनुमध्यमा। गात्राणि वा
ससी चैव प्रक्षाल्य सलिलेन सा। चिंतयामास रुदती तस्य दुःखस्य निर्णयं। किं करोमि क्व गच्छामि कथं कार्यं भवेन्मम। इत्येवं चिं
तयित्वा सा भीमं वै मनसागमत्। नान्यः कर्त्ता ऋते भीमान्ममाद्य मनसः प्रियं। ततस्त्वाय रात्रौ सा विहाय शयनं स्वकं। प्राद्रव
न्नाथमिच्छंती कृष्णा नाथवती सती। भवनं भीमसेनस्य क्षिप्रमायततोचना। दुःखेन महता युक्ता मानसेन मनस्विनी॥ ॥द्रौप
द्युवाच॥ ॥तस्मिन्जीवति पापिष्ठे सेनावाहे मम द्विषि। तत्कर्म कृतवानद्य कथं निद्रां निषेवसे॥ ॥वैशंपायन उवाच॥ ॥
एवमुक्त्वाथ तां शालां प्रविवेश मनस्विनी। यस्यां भीमस्तदा शेते मृगराज इव श्वसन्। तस्याः रूपेण सा शाला भीमस्य च महात्मनः।
संमूर्छितेव कौरव्य प्रजज्वाल च तेजसा। सा वै महानसे प्राप्य भीमसेनं शुचिस्मिता। सर्वश्वेतेव माहेयी वने जाता त्रिहायनी। त्रि
उपातिष्ठत पांचाली वाशितेव महागजं। सा लतेव महाशालं फुल्लं गोमतितीरजं। परिष्वजति पांचाली मध्यमं पाण्डुनंदनं॥ २१

ममेन सुप्याति ष्ठनी त्यत्रय। माहेयी गोः महारव्ये सुप्रमानं तनत्रा। सविकेन मनाकर्म निष्प्रयोजना। विशुद्धा पांचालीपदे सर्वं

नागता
शुद्धा अथवा हिंस्त्रवचनायं सर्वशाहः॥ स्रहिं मायां इत्यादि वञ्चितान मर्दनेदिंस्ने श्च स्वनाद्यतो खिद्यमानवचनवाङ्कोऽ नाता
वने सा रुदाय यया ग च॥ क्रोवा विति कानने इत्युपलिष्वनात्। ऋादुवर्ता अरण्ये त्रिहायनी। हायनशब्दो युग पि। तथा च। कृते
युगा व इमती। त्रेता यां मनकात्मजा। द्वापरे द्रौपदी जाता। तेन कृष्णा त्रिहायनी। पक्षे त्रिवर्षजाता गौ त्रिवर्षजाता यो
वने नजाता वामिता कीचकवधवासनवती। महागजमिति वापाठ वासिता करिणी महागजमिव उपमानं। माहेयऽनेजा
नामास्त्र्यां। पश्चिमदीनामका विन्दी तत्र जाता त्रिहायनी सुप्रमानपक्षो व्याख्यातव्यः। त्रिहायनीवनीप्रथवयसि यो वने स्थिता। स
मानमन्यत्। महाशालं महावृक्षं। लतावक्ष्यद्वन्द्वडि क्रावयवंभीमपक्ष हृषितो। गोमती कुंला नामान्तरे। तीरा वा मुःतीरवा
ते तटे इत्यभिधाना। तत्र यो जातं गोमत्यास्तीरजातं। हि रूपष्टास्त्वादीका।

बाहुभ्यां परिरभ्यैनं सुप्तं प्राबोधयत्तति। सिंहं सुप्तं वने दुर्गे मृगराजवधूरिव। भीमसेनमुपाश्लिष्यद्वासितेव महागजं। वीणेव मधु
रा भाषा गांधारे साधु मूर्छिता। अभ्यभाषत पांचाली भीमसेनमनिंदिता। परिरंभस्यउपपाणिभ्यां सुप्तं प्राबोधयत्तदा। भ्री निरुद्धमाहा
साद्वा कुसुमं सुसमहासीवे। रूपा मात्रु कथं शयनाद्यान त्ववपन्कुलं। माशची वसहस्ता स्कंदाणीवमहेश्वरं। सावित्री
वब्रह्माणं सुदैवधी वसाविनी। भीमं प्राबोधयत्कृष्णा लक्ष्मीर्हरिमोदरं यथा। देवगर्भसमाना संश्लिये प्रियं वदा प्रिया। उत्तिष्ठो
त्तिष्ठ किं शेषे भीमसेन यथा मृतः। नामृतस्य हि पापीयान् भार्यामालभ्य जीवति। समंश्रहाय शयने राजपुत्र्या प्रबोधितः॥
गांधारस्वरविशेषं साधु मूर्छिता॥

सोयसंयद्देसोपशमने।।हृष्यंस्त्रियं।मामां।प्रातिकामीसुवा धनसूतः।परिषदां सनामध्ये।सिंधवेनजयद्रथेन।परामर्षमिदं दा

विराट उपतिस्तसोम्यामेघ्यं कामोपसंयदे।अथपाठवीत्र जसुत्री कोरव्योमहिषीप्रियां।केनास्यार्थेन संप्राप्तावरितवमसमांनि·

कं।ननेक्षकृतिमानुसीकृष्णा पांडुरलरूपम।आविद्वपरिहोपणासर्वविद्याम हंयथा।सुखवायदिवाडःखं विप्रं वाय

दिवाप्रियं।यथावसर्वमाचक्ष्वसुवाधाम्यामियत्पर।अत्रमवादितिक्रोलैविद्यामस्य।सर्वकर्मसु।अत्रमापसुचापि

वा।माल्याभिहनः।ञनः।राशाप्रस्तुक्तायथाकामं यत्रकार्यविवद्यति।गञ्चवेरायनाप्येवमावदन्नोनबुध्यते।। इति

महाभारतेविराटपर्वणिकीचकवधे।। द्रौपद्युवाच।। अगाथावंकृतस्तस्यांनतावद्युधिष्ठिरः।जानंस्त्ववाणिडःखानि किंमांवं ×यस्या×

परिदेवसि।यस्मात्दासीख्वादनप्रातिकामीतदानयत्।मत्तांपरिषदोमध्येतस्मादहंतिनारता।मत्स्यराज्ञः समस्तंचतस्यय्थ

ह्स्यपश्यतः।कीचकेनपदास्पृष्टा कातुजीवेतमादृशी।।वनवासगतायास्तु सिंधवेनडरात्मना।परामर्षद्वितीयंच क्षो सो

ठु ढुमुत्सहतेतुका।पार्थिवस्यसुतानामकातुजीवेतमादृशी।अत्रतत्रायदृष्टाडःखमन्युतुशोपदाहता।एवंबहुविधैः २२

क्लेशैःक्लिश्यमानांचभारत।नमांजानासिकौंतेयकिंफलंजीवितेनमे।योयंराजाविराटस्मकीचकोनामभारत।सेना

नीःपुरुषव्याघ्रस्यालःपरमडर्मतिः।समांसैरंध्रिवेषेणवसंतीञ्चुवसमति।नित्यमेवाह्तडष्टात्माभार्याभवममेतिवैतेनोप

पानेरथंसुगपंअजाविकं।उत्सवशेपितःविद्याजितःप्रमिन्नांबिंडजालकमालिनां।स्नातकावेदबतस्नातकाःसंवि

संअमानायावधनाद्वीणासपनेहृतः।कालेनववफलंपक्वंरुद्रयाम्यविदीर्यता।नातरंवविगर्हिण्येहंडर्छृतादेविनं।यस्मिन्

कर्मणाप्राप्ताडरवमतदनंतकं।कोहिराज्यंपरित्यज्यसर्वस्वंचात्मनासह।प्रव्रिजत्यायेवदाव्यतविनाडर्छृतादेविनं।युदि

निष्कसहस्राणायबात्मसारवहनं।सायंप्रातरदेविषदपिसंवसगवरुक्मं।वस्त्रंहिरण्यंवासांसियानं।सुगपमजाविकं।अ

श्वाश्वतरसंघाश्चनजातुरूपमावहेत।सोयंद्यूतप्रवादेनश्रियाप्रत्यवरोपितः।तूस्लीमास्तेयथामूढःस्वानिकर्माणिचिं

तयन्।दशनागसहस्राणिपद्मिनांहेममालिनां।येयांतमनुयांतीहसोयंद्यूतेनजीविति।तथाशतसहस्राणिराजाममिततउसां।उ

पासतमहाराजमिंद्रप्रस्थेयुधिष्ठिरं।शतंदासीसहस्राणांयस्यनित्यंमहानसे।पात्रीहस्तादिवारात्रमतिथीन्भोजयंत्युत।ए

षनिष्कसहस्राणिप्रदातादरतांवरः।द्यूतजेनह्यनर्थेनमहतासमुपावृतः।एनंहिस्वरसंपन्नाबहवःसूतमागधाः।सायंप्रातरु

पातिष्ठन्सुमृष्टमणिकुंडलाः।सहस्रमृषयोयस्यनित्यमासंसभासदः।तपःश्रुतोपसंपन्नाःसर्वकामैरुपस्थिताः।अंधा

शीतिसहस्राणिस्नातकागृहमेधिनां।त्रिंशद्दासीकएकैकंया।बिभर्तियुधिष्ठिरः।अप्रतिग्राहिणांचैवयतीनांऊर्ध्वरेतसां।।

दशचापिसहस्राणियोयमास्तेनरेश्वरः।आनृशंस्यमनुक्रोशः संविभागस्तथैवच।यस्मिन्नानिसर्वाणिसोयमास्तेनरे

शोगणदानं।संविभज्जीविताचितमर्थ्यंप्रदायविनर्जीत्यवयः।।

समयेनि देशे। बलिभृतः उपनीताण्हाराः। भृतिं पोषणं। पार्थिवाः पृथिवीसंबंधिनः॥

विधान

स्थ्र॥ बिभर्ति विविधा राज्ञा धृतिमान्सत्यविक्रमः। अवेक्ष्य च हृदं स्याथा यं स्त्वरा हृ सर्वङ्गितात्र॥ यः संविभज्य विनयादात्मवांस्था
युधिष्ठिरः॥ स एष निरयं प्राप्तो मत्स्यस्य परिचारकः। सभायां देविता राज्ञा कंकं ब्रूते युधिष्ठिरः। इन्द्रप्रस्थे निवसतः समयाय थ
स्य पार्थिवाः॥ आसन्बलिभृतः सर्वे सोऽद्यान्यैर्भृतिमिच्छति। पार्थिवाः पृथिवीपाला यस्यासन्वशवर्तिनः॥ स वशे विव
शो राजा परेषामद्य वर्तते। प्रताप्य पृथिवीं सर्वां रश्मिमानिव तेजसा॥ सोऽयं राज्ञो विराटस्य सभास्तारो युधिष्ठिरः॥ यमुपासं
त राजानः सभायामृषिभिः सह। तमुपासीनमद्यान्यं पश्य पाण्डव पाण्डवं। सदस्यं समुपासीनं परस्य प्रियवादिनं। दृष्ट्वा युधिष्ठि
रं शोकात्तविशोकमसंशयं। अतदर्हं महाप्राज्ञं जीवितार्थे ति संस्थितं। दृष्ट्वा कस्य न दुःखं स्यात् धर्मात्मानं युधिष्ठिरं। उपास्ते स्म
सभायां यं कृत्स्ना वीर वसुन्धरा। तमुपासीनमप्यन्यं पश्य पाण्डव भारत। एवं बहुविधैर्दुःखैः पीड्यमानामनाथवत्। शोक
सागरमध्यस्थां किं मां भीम न पश्यसि॥ ॥ महाभारते विराटपर्वणि कीचकवधे॥ ॥ द्रौपद्युवाच॥ इदं तु मम दुः
खं यत्त्वं वक्ष्यामि भारत न मे त्वसूया कर्तव्या दुःखादेतद्ब्रवीम्यहं। सन्निधौ बलिनां मध्ये चन्नो मम दाबलः। सूदकर्मणि
हीनमवमसामभरतर्षभ। ब्रुवन्वल्लवजातीयः कस्य शोकं न वर्धयेः। सूपकारं विराटस्य बल्लवं त्वां विदुर्जनाः॥

कश्मलो मोहः॥ प्रेष्याः प्रेष्यकः। अखेदयत् दुःखितां कृतवती। विक्रयं।

प्रेष्यत्वं समनुप्राप्तं ततो दुःखतरं नु किं। यदा महानसे सिद्धे विराटमुपतिष्ठसे। करालो वल्लवः सूदस्तदा सीदति मे मनः॥
यदा प्रहृष्यति सम्राट् त्वां योधयिष्यति कुञ्जरैः। हसन्त्यन्तःपुरे नार्यो मम चोद्विजते मनः॥ शार्दूलैर्महिषैः सिंहैरागारे युध्य
से यदा। कैकेय्याः प्रेक्षमाणायाः तदा मे कश्मलो भवेत्। ततस्तु उत्थाय कैकेयी सर्वास्ताः प्रत्यभाषत। प्रेष्याः समुत्थिताश्चापि कै
केयीं ताः स्त्रियो वदन्। प्रेक्ष्य मामनवद्यांगीं कश्मलोपहतामिव। स्नेहात्संवासजान्मन्ये सूदमेषा शुचिस्मिता। एकान्ते येते
नावेत वल्लवं चारुहासिनी। योध्यमानं महावीर्यैरिमं समनुशोचति। कल्याणरूपा सैरिन्ध्री वल्लवश्चातिसुन्दरः। स्त्रीणां चित्तं च दुर्ज्ञे
यं युक्तरूपौ च मे मतौ। सैरिन्ध्री प्रियसंवासान्नित्यं करुणवादिनी। अस्मिन्राजकुले चेमौ तुल्यकालनिवासिनौ। इति ब्रुव
णा वाक्यानि सा मां नित्यमखेदयत्। क्रुध्यन्तीं मां च संप्रेक्ष्य समशङ्कत मां त्वयि। तस्यां तथा ब्रुवन्त्यां तु दुःखं मां महदाविशत्।
त्वय्येवं निरयं प्राप्ते भीमे भीमपराक्रमे। शोके यौधिष्ठिरे मग्ना नाहं जीवितुमुत्सहे। यः सदेवान्मनुष्यांश्च सर्पांश्चैकरथो
ऽजयत्। सोऽयं राज्ञो विराटस्य कन्यानां नर्तको युवा। योऽतर्पयदमेयात्मा खाण्डवे जातवेदसं। सोऽन्तःपुरगतः पार्थः कूपेऽग्निरिव
संवृतः। यस्माद्भयममित्राणां सदैव पुरुषर्षभात्। स लोकपरिभूतेन वेषेणास्ते धनंजयः। यस्य ज्याक्षेपकठिनौ बाहू कृत न

स्त्रीवेषेण विरूतं प्राप्तं विकारं। प्रतिजानं मते॥

विराट

किणाबुतौ। महोष परिपूर्णाभ्यां शोचत्तास्ते धनंजयः। यस्य ह्यानलतिग्मेषास्समकं पतशात्रवः॥ स्त्रियोगीतस्वनस्तस्य शुदिता

ः प्रत्युपासते॥ किरीटं सूर्यसंकाशं यस्य मूर्धनि शोभते। वेणीविकृतकेशांतं सोमद्य तानमर्जुनं। कन्यापरिवृतं दृष्ट्वातीन

सीदतिमे मनः॥ यस्मिन्नस्त्राणि दिव्यानि मः मस्तानि महात्मनि। आधारः सर्वविद्यानां स धारयति कुंडले। यस्य राजसहस्त्रा

णितेजसाप्रतिमानिवै। समरेनातिवर्तंते वेलामिव महार्णवः॥ सोयंराज्ञो विराटस्य कन्यानां नर्तको युवा। आस्ते वेषप्रतिच्छ

न्नः कन्यानां परिचारकः॥ यस्य स्म रथघोषेण समकं पतमेदिनी। सपर्वतवनाभीम सहस्था वरजंगमा। यस्मिञ्जाते महाभा

गे कुंत्याः शोको व्यनश्यत। स शोचयति मामद्य भीमसेन तवानुजः॥ भूषितं तमलंकारैः कुंडलैः परिहाटकैः। कंबुपा

णिं समायांतं दृष्ट्वा सीदतिमे मनः॥ तं वेणीकृतकेशांतं भीमधन्वानमर्जुनं। कन्यापरिवृतं दृष्ट्वा भीमसीदति मे मनः॥ यस्मा

त्तिसमो वीर्ये कश्चिद्युद्धे धनुर्धरः॥ योहिमं ग्राममासाद्य सादिताप्याविव स्त्रव्रतः। परं हर्षमुपयाति प्रसमैन्य मतिं तं दथ्य

। सो द्य कन्यापरिवृतो गायत्रास्ते धनंजयः॥ धर्मेशौर्ये च सत्ये च ड्डी वलोकस्य संमतं। स्त्रीवेषविकृतं प्राप्तं दृष्ट्वासीदति

मे मनः॥ यदा ह्येनं परिवृतं कन्याभिर्देवरूपिणं। प्रभिन्नमिव मातंगं परिकीर्णं करेणुभिः॥ मत्स्यमर्थपतिं पार्थं विराटंस

मुपस्थितं। पश्यामि तूर्यमध्यस्थं दिशो नश्यंति मे तदा॥ २४

आर्या कुंती न जानाति गोभ्युमध्ये गोविंदं गवाध्यक्षं गोपालं वृषभमिलिवायपौड्डतास्यतेशोभिता। रतिं पीतिं। ह्येषं पतत्ये। संरं तं सा वृक्षा र

क्तनपश्यं लोहिताभरं। अवरस्तापः। अभिजिनकुलो विनीताधेमवत्सः जोरयोनः नयः। ज्येष्ठापचायिनमयः ज्ञानुराधिनं। तं स

रुत मार्या न जानाति रूपसं धनंजये। अज्ञानवचंकौरव्यम मंडद्गीनं दविनं। तथा दृष्ट्वा यवीयांसं सहदेवं गवांपतिं। गोभुगो विंद

मायां तं पांडुभ्रता स्मितारत। सहदेवस्य वृत्तानि चिंतयंती पुनः पुनः॥ न निद्रामुपगच्छामि भीमसेन कुतो रतिं। न विद्मि सिमद्य वालह

सहदेवस्य दुष्कृतं। यस्मिन्नेवं विधं दुःखं प्राप्नुयात्सत्यविक्रमः॥ दृष्ट्वा मि भरतश्रेष्ठ दृष्ट्वातं भ्रातरं तव। गा वृषगाद्य समंका शं म

\\ ह्येषं पाव — त्स्येनाभिनिवेशितं। संरब्धं रक्तनपथ्यं गोपालानां पुरोगमं। विराटमभिनंदंतं मथ मे भवतिज्वरः। सहदेवं हि वीरं मे नित्यमार्या प्र

\\ संरंतपाव — शंसति। महाभिजनसंपन्नः शीलवान्वृत्तवानिति। ह्रीनिषेधो मधुरवाक्धार्मिकश्च प्रियश्च मे। स तेरण्येषु वोढव्यो याज्ञसे

नि रूपा सुवा सुकुमारश्च शूरश्च राजानं चाप्यनुव्रतः॥ ज्येष्ठापचायिनं मिमं स्वयं पांचालि नायथाः। इत्युवाच हि मां कुंती रुदती

पुत्र गृह्निनी। प्रव्रजंतं तदारण्यं तं परिष्वज्य तिष्ठती। तं दृष्ट्वा व्यापृतं गोषु वत्सचर्मक्षपाशयं। सहदेवं युधिश्रेष्ठं किं न जानामि पां

डवाय स्त्रिनिनित्यं संपन्नो रूपेणास्त्रेण मेधया। सोश्वबंधो विराटस्य पश्य कालस्य पर्ययं। अश्वकोर्य तदं दानि दामयंथि सुद

स्तं। विनयंतं जवेनाश्वान्महाराजस्य पश्यत। अपश्यमेनं श्रीमंतं मत्स्यं भ्राजिष्णुमुत्तमं। विराटमुपतिष्ठंतं दमयंतं च वा

जिनः॥ किं त्वं मां मन्यसे पार्थ सुखितानिति परंतप। एवं दुःखशताविष्टा युधिष्ठिरनिमित्ततः॥ । इदं वा व्याहृतं विषकं। वत्सचर्मस

पाशायां वत्सचर्मणि स्वपायां। स्मृत इति। पर्ययं विपरीतं। दामयंथि नकुलो। अश्वान्विनयं तो उद्दासतां सुराष्ट्रमाणानां जनानां। इदा

[illegible]

प्रतिविशिष्टानि अधिकानि। तत्प्रत्ययं। विक्रियां विगतां क्रियां। अधितिष्ठामि कालं सुखसमयं। उदासीनाः प्रतीक्षमाणाः। किल यु

धिष्ठिरनिमित्ते। अतः प्रतिविशिष्टानि दुःखान्यन्यानि भारत। वर्त्तन्ते मयि कौंतेय वक्ष्यामि शृणु तान्यपि। युष्मासु ध्रियमाणेषु दुः
खानि विविधान्युत। शोषयंति शरीरं मे किं नु दुःखमतः परं॥ ॥इति महाभारते विराटपर्वणि॥ ॥द्रौपद्युवाच॥ अहं सैरिंध्रिरू
पेण चरंती राजवेश्मनि। शौचदास्मि सुदेष्णाया अक्षधूर्तस्य कारणात्॥ विक्रियां पश्य मे तीव्रां राजपुत्र्याः परंतप। आत्मकालमपेक्षं
ती सर्वं दुःखं किलांतवत्। अनित्या किल मर्त्यानामर्थसिद्धिर्जयाजयौ॥ इति कृत्वा प्रतीक्षामि भर्तॄणामुदयं पुनः। चक्रव
किल मर्त्यानामर्थसिद्धिर्जयाजयौ। इति कृत्वा प्रतीक्षामि भर्तॄणामुदयं पुनः। चक्रवत्किल मर्त्यानामर्थाश्च व्यसनानि च। इति कृ
त्वा प्रतीक्षामि भर्तॄणामुदयं पुनः। य एव हेतुर्भवति पुरुषस्य जयावहः। पराजये च हेतुः स इति च प्रतिपालये। दत्त्वा याचंति पु
रुषाः हत्वा वध्यंति चापरा। पातयित्वा च पात्यंते परैरिति च मे श्रुतं। न दैवस्यातिभारोऽस्ति न दैवस्यातिवर्त्तनं। इति चाप्यागमं भूयो दै
वस्य प्रतिपालये। स्थितं पूर्वं जलं यत्र पुनस्तत्रैव गच्छति। इति पर्यायमिच्छंती प्रतीक्षाम्युदयं पुनः। दैवेन किल यस्यार्थः सुनीतोऽपि विपद्यते
। दैवस्योपगमे यत्नस्तेन कार्यो विजानता। यत्त्वामवचनस्यास्य कथितस्य प्रयोजनं। पृच्छ मां दुःखितां तत्त्वमपृष्टा वा ब्रवीमि ते। महिषी पांडु
पुत्राणां दुहिता द्रुपदस्य च। इमामवस्थां संप्राप्ता का मदन्या जिजीविषेत्। कुरून्परिभवन्सर्वान्पांचालानपि भारत। पांडवांश्चैव संप्रा २५

सिद्धो व्यसनानि विपदः। पर्यायं कालः प्रत्यायपति क्रमाय। प्रतिनायो माध्यं जिजीविषेत् जीवितुमिच्छेत्॥

युद्रीनाथ
वः

वर्ण्णविकारं वर्णभेदं। गात्रैर्दृष्टानां विनियातं च्यावितं। कुंत्याऽन्यत्र कुंतिं विहाय। किं णो घर्षणकाठिन्यं। मदंतौ। वर्णिको न्नुलप्स्यं

सोऽयमक्षेशोऽहरिदमाच्चार्तिः श्वशुरैः पूर्वैर्वृ कुंतिः परिवारिता। शरेसमुद्विग्ना नारी कात्वस्या दुःखिता न भवेत्। ननं हि बाल
या धातुर्मया विविप्रियं कृतं। यस्य प्रसादाद्दुर्नीतं प्राप्तास्मि भरतर्षभ। वर्णं विकारमपि मे पश्य पांडव यादृशं। यादृशो मे न त
त्रासीद्दुःखे परमके तदा। त्वमेव पार्थ जानासि जन्मैतत्तिमसुखं पुरा। साहं दासीत्वमापन्ना न शांतिमवशा लभे। कार्शीतिकी
वितेनाक्षमभानेनरकोद्दर। नाहं दैविकमिदं मन्ये यत्र पार्थो धनंजयः। भीमधन्वा महाबाहुः शांत इवानलः। अशक्या
वेदितुं पार्थ प्राणिनां हि गतिर्नरैः। विनिपातमहं मन्ये युष्माकं ह्यविचिंतितं। यस्या मम सुखं देहस्य वृूयमिंद्रसमाः सदा स
र्वेद्रूपसुखमन्ये यामवरेराणां वरा मती। एवं पांडवामवस्था यथा नार्हामि वितथ्या। युष्मासु ध्रियमाणेषु पश्य कालस्य पर्य
यं यस्याः सागरपर्यंता पृथिवी वशवर्तिनी। आसीत्साद्य सुदेष्णायाः भीताहं वशवर्तिनी। यस्याः पुरःसरा आसन् पृष्ठतश्चा
नुयायिनः। साहमद्य सुदेष्णायाः पुरः पश्चाच्च गामिनी। इदं तु दुःखं कौंतेय ममासह्यं निबोध तत्। या न जातु स्वयं
पिंषे गात्रोद्वर्तनमात्मनः। अन्यत्र कुंत्या भद्रं ते साद्य पिनष्मि चंदनं। पश्य कौंतेय पाणी मे नैवं यौ भवतः पुरा। इत्यस्य द पाणीर
र्शयामास किणबद्धौ करावुभौ। बिभेमि कुंत्या नाहं युष्माकं वा कदाचन। साद्याग्रे विराटस्य भीता तिष्ठामि किंकरी। किंनु व

घट्टयंती प्रहरंती। योधयामि प्रमाथयमि।।

ह्यतिमेचान्यांच र्मकः सुसुकृतो नवा। इत्युपदिष्टं हि मस्सस्यचंदनं किल रोचते।। ।।वैशंपायन उवाच।। ।।सा कीर्तयंती दुःखा
नि भीमसेनस्य भामिनी। रुरोद शनकैः कृष्णा भीमसेनमुदीक्षती। सा वाष्पकलया वाचा निःश्वसंती पुनः पुनः हृदयं भीमसेनस्य घ
ट्टयंती दमब्रवीत्। नाल्पं कृतं मया भीम देवानां किल्विषं पुरा। अभाग्या यत्र जीवामि मर्तव्ये सति पांडव।। ।।वैशंपायन उवा
च।। ।।ततस्तस्याः करौ सून्नौ किणबद्धौ वृकोदरः। मुखमानीय वेपंत्याः रुरोद परवीरहा। तौ गृहीत्वा तु कौंतेयो बाष्पमु
त्सृज्य वीर्यवान्। ततः परमदुःखार्त इदं वचनमब्रवीत्।। ।।इति विराटपर्वणि कीचकवधे।। ।।भीमसेन उवाच।। ।।धि
गस्तु मे बाहुबलं गांडीवं फाल्गुनस्य च। यत्ते रक्तौ पुरा भूत्वा पाणी कृतकिणावुभौ। सभायां तु विराटस्य करोमि कदनं मह
त्। तत्र मे कारणं भाति कौंतेयो यत्प्रतीक्षते। अथवा कीचकस्याहं पोथयामि पदा शिरः। ऐश्वर्यमदमत्तस्य क्रीडन्निव महा
द्विपः। अपश्यं त्वां यदा कृष्णे कीचकेन पदा हतां। तदैवाहं चिकीर्षामि मत्स्यानां कदनं महत्। तत्र मां धर्मराजस्तु कटाक्षे
ण न्यवारयत्। तदहं तस्य विज्ञाय स्थित एवास्मि भामिनि। यच्च राष्ट्रात्प्रच्यवनं कुरूणामवधश्च यः। सुयोधनस्य कर्णस्य शा
कुनेः सौबलस्य च। दुःशासनस्य पापस्य यन्मया न हृतं शिरः। तन्मे दहति गात्राणि हृदि शल्यमिवार्पितं। मा धर्मं जहि सुश्रो २६
णि क्रोधं जहि सुश्रोणि मध्यमे। इदं च समुपालंभं त्वत्तो राजा युधिष्ठिरः।।

रक्षसो रावणः।। अथारयंती सा सा तुमिति शेषः। अंतरा वहिता। नयात्ता पगच्छेत्।।

शृणुयाद्यदि कल्याणि कृत्स्नं जह्यात्स जीवितं। धनंजयो वा सुश्रोणि यमौ वा तनुमध्यमे। लोकांतरगतेष्वेषु नाहं शक्ष्या
मि जीवितुं। सुकन्या नाम शार्याती भार्गवं च्यवनं वने। वल्मीकभूतं शाम्यंतमन्वपद्यत भाविनी। नारायणी चेंद्रसेना रूपेण यदि ते
श्रुता। पतिमन्वचरद्वृद्धं पुरा वर्षसहस्रिणं। दुहिता जनकस्यापि वैदेही यदि ते श्रुता। पतिमन्वचरत्सीता महारण्यनिवासिनं। रक्ष
सा निग्रहं प्राप्य रामस्य महिषी प्रिया। क्लिश्यमानापि सुश्रोणि राममेवान्वपद्यत। लोपामुद्रा तथा भीरु वयोरूपसमन्विता।
अगस्त्यमन्वयाद्धित्वा कामान्सर्वानमानुषान्। यथैता कीर्तिता नार्यो रूपवत्यः पतिव्रताः। तथा त्वमपि कल्याणि सर्वैः समु
दिता गुणैः। मा दीर्घं क्षम कालं त्वं मासमध्यर्धसम्मितं। पूर्णे त्रयोदशे वर्षे राज्ञो राज्ञी भविष्यसि।। द्रौपद्युवाच।। आर्त्यैतन्म
या भीम कृतं बाष्पविमोक्षणं। अपारयंत्या दुःखानि न राजानमुपालभे। किमुक्तेन व्यतीतेन भीमसेन महाबल। प्रत्युपस्थि
तकालस्य कार्यस्यानंतरो भव। ममेह भीम कैकेयी रूपाभिभवशंकया। नित्यमुद्विजते राजा कथं नेयादिमामिति। तस्या
विदित्वा तं भावं स्वयं चानृतदर्शनः। कीचकोयं सुदुष्टात्मा सदा प्रार्थयते हि मां। तमहं कुपिता भीम पुनः कोपं नियम्य चात्मसु
वं कामसंमूढमात्मानं रक्ष कीचक। गंधर्वाणामहं भार्या पंचानां महिषी प्रिया। ते त्वां निहन्युः कुपिताः शूराः साहसकारिणः। एवमु

सगांश्च वरं।पीवमहीश्वराः।निगमाःपौरा वणिजो वा।शृणुध्वाद्य२८॥

कःसूतपुत्रात्माकीचकःशत्रुवाहनानादंविनिमिसेरिंध्रिगंधर्व्वस्यःशुचिस्मिते।ज्ञातंमदस्त्वमपिवागंधर्व्वाणांयशस्विनां
दूरणोसमागतंहनिष्यामिवंनारुकुरुमाघृणां।इत्युक्त्वाशुश्रुवेसूतंकामातुरमदंसुतः।नैवंप्रतिबलश्चेषांगंधर्व्वाणांयशस्विनां
धर्मस्थितास्मिसततंकुलशीलसमन्विता।नेच्छामिकिंचिद्वध्यंततेनजीवसिकीचक।एवमुक्तःसदुष्टात्माप्राहस्यस्वनवत्तदा॥
अथमांतत्रकेकय्याप्रेषयात्वपणेनवा।तयैवंचोदिताह्येवंचाहंप्रियचिकीर्षया।सुरामानयसितिप्रियाकीचकस्यनिवेशना
त।सूतपुत्रस्तुमांदृष्ट्वामहासांसांत्वमवर्त्तयत्।मांविपतितंतेऽकुद्धःपरामर्षमनानवत्।विदित्वातस्यसंमावंकीचकस्यमदा
त्मनः।तथाहंराजशरणंजवाद्गन्तिवपश्चाविता।सदर्शनेचमांराज्ञःसूतपुत्रःपरामृशत्।पातयित्वाचदुष्टात्मासततदामांपद
वधीत्।प्रेक्षतस्यविराटस्तुकंकस्यबहवोजनाः।रथिनःपीवमहीश्चहस्त्यारोहाश्चनिगमाःउपालाभामयाराज्ञाकंकस्या
पिपुनःपुनः।ततोनवारितोराजानतस्यविनयःकृतः।यायंराज्ञोविराटस्यकीचकोनामसारथिः।त्यक्तधर्म्मानृशंसश्चनरस्त्री
संमतःप्रियः।शूरोऽभिमानीपापात्मासर्व्वार्थेषुचमुग्धवान्।दारामर्षीमहाभागलभतेऽर्थान्बहूनपि।दारानपिचवित्तानिप
रेषांक्रोशतामपि।नतिष्ठतिस्मसन्मार्गेनचधर्म्मंबुभूषति।पापात्मापापभावश्चकामरागवशानुगः।अविनीतश्चदुष्टात्मा २७

नैजीवंतमस्तितस्मिन्द्रजीवत्तिन्यर्थाःउरोरुकृदयं॥

प्रत्याख्यातापुनःपुनः।दर्शनेदर्शनेहन्यात्यथाजह्यांस्वजीवितं।अधर्मेयतमानानांमहान्धर्मोनशिष्यते।नाव्यार्थांरक्ष्यमाणायां
प्रजाभवतिरक्षिता।प्रजायांरक्ष्यमाणायामात्माभवतिरक्षितः।आत्माहिजायतेतस्यांतेनजायांविदुर्बुधाः।भर्त्ताचभार्ययार
क्ष्यःकथंजायान्ममोदरोवदतांवर्णधर्मांश्चब्राह्मणानामितिश्रुतं।क्षत्रियस्यसदाधर्मोनान्यःशत्रुनिबर्हणात्।पश्यतोधर्म्मरा
जस्यकीचकोमांपदावधीत्।तवचैवसमक्षंवैभीमसेनमहाबल।त्वयाह्यहंपरित्रातातस्माद्घोराज्जटासुरात्।जयद्रथंतथै
वत्वमजैषीर्भ्रातृभिःसह।जहीममपितंपापंयोयंमामवमन्यते।कीचकोराजवाल्लभ्याच्छोककृन्ममभारत।तमेवंकामसं
मत्तंभिंधिकुंभमिवाश्मनि।योनिमित्तमनर्थानांबहूनांममभारत।तंचेत्कीवंतमादित्यःप्रातरभ्युदयिष्यति।विषमालो
ड्यपास्यामिमाकीचकवशंगमं।श्रेयोहिमरणंमह्यंभीमसेनतवाग्रतः।इत्युक्त्वाप्रारुदत्कृष्णाभीमस्योरःसमाश्रिता॥ ॥
वैशंपायनउवाच॥ ॥भीमस्तुतांपरिष्वज्यमहद्भ्यांत्वेषप्रयुक्त्यचाश्वास्यसांत्वयित्वाबहुशोभृशमार्त्तांसुमध्यमां।हेतुतत्वार्थ
संयुक्तैर्वचोभिर्द्रुपदात्मजां।प्रमृज्यवदनंतस्याःपाणिनाश्रुसमाकुलां।कीचकंमनसागच्छत्सृक्विणीपरिसंलिहन्।उवा
चवैनांदुःखार्त्तांभीमःक्रोधवशंगतः॥ ॥महाभारतेविराटपर्व्वणिकीचकवधे॥ ॥भीमसेनउवाच॥ ॥तथाभद्रेकरि

प्रदोषे॥ आरंभे।संविदं संकेतं।धारयामासमन्युर्हरिमिवोढवेनौ। अनिपन्नार्थरहितः। प्रवादेन वचनमात्रेण॥ अथं विराटः॥ अ

करिष्यामियथात्वंमांहिभाषसे। अद्यतं सूदयिष्यामिकीचकंसहबांधवं॥ अस्याः प्रदोषेशर्वर्याः कुरुष्वानेनसंगतं॥ दुःखं
शोकंचनिर्धूययाज्ञसेनिशुचिस्मिते। येषानर्तनशालेहमत्स्यराजेनकारिता॥ दिवात्रकन्यानृत्यंतिरात्रौयांतियथागृहं। त
त्रास्तिशयनंदिव्यंदृढांगंसुप्रतिष्ठितं। तत्रास्यदर्शयिष्यामिपूर्वप्रेतान्पितामहान्॥ यथाचत्वांनपश्येयुःकुर्वाणांतेनसंवि
दं॥ कुर्यास्तथात्वंकल्याणियथासंनिहितोभवेत्॥ ॥वैशंपायनउवाच॥ ॥तथातौकथयित्वातुबाष्पमुत्सृज्यदुःखितौ॥ रात्रिशेषंत
दत्युग्रंधारयामासतुर्हृदा। तस्यांरात्र्यांव्यतीतायांप्रातरुत्थायकीचकः॥ गत्वाराजकुलायैवद्रौपदीमिदमब्रवीत्॥ सभायांपश्य
तोराज्ञःपातयित्वापदाहनं॥ नचाशक्नोत्त्राणमभिपन्नाबलीयसा॥ प्रवादेनहिमत्स्यानांराजानाम्नायमुच्यते॥ अहमेव
हिमत्स्यानांराजावैवाहिनीपतिः॥ सासुखंप्रतिपद्यस्वदासोभीरुभवामिते॥ अह्नायतवसुश्रोणिशतंनिष्कान्ददाम्यहं॥
दासीशतंचतेदद्यांदासानामपिचापरं॥ रथंचाश्वतरीयुक्तमस्तुनौभीरुसंगमः॥ ॥द्रौपद्युवाच॥ ॥एवंमेसमयंत्वद्यप्रतिप
द्यस्वकीचक॥ नत्वांसखावाभ्रातावाजानीयात्संगतंमया॥ अवबोधाद्धिभीतास्मिगंधर्वाणांयशस्विनां॥ एवंमेप्रतिजानीहि
ततोहंवशगातव॥ ॥कीचकउवाच॥ ॥एवमेतत्करिष्यामियथासुश्रोणिभाषसे॥ एकोभद्रेगमिष्यामिशून्यमावसथंतव॥

कामयरुरितानोअचरो॥

तामिस्रोंऽधकार॥

समागमार्थंरंभोरुत्वयामदनदर्पितः॥ यथात्वांनावबुध्यंतिगंधर्वाःसूर्यवर्चसः॥ द्रौपद्युवाच॥ यदतन्नर्तनागारंमत्स्य
राजेनकारितं॥ दिवात्रकन्यानृत्यंतिरात्रौयांतियथागृहं॥ तमिस्रेतत्रगच्छेथागंधर्वास्तन्नजानते॥ तत्रदोषःपरिहृतोभविष्य
तिनसंशयः॥ वैशंपायनउवाच॥ तमर्थंप्रतिजल्पंत्याःकृष्णायाःकीचकेनतु॥ दिवसार्धंसमभवन्मासेनैवसमंतदा
॥ ततःसगृहमागत्यतमर्थंप्रत्यावेदयत्॥ कीचकोथगृहंगत्वाभृशंहर्षसमन्वितः॥ सैरंध्रीरूपिणंमूढोमृत्युंतं
नावबुद्धवान्॥ गंधानाभरणमाल्यंश्रुत्वासक्तःसविशेषतः॥ एवंचाकृतवांस्तानेसत्वरंकाममोहितः॥ तस्यतत्कुर्वतःक
र्मकालोदीर्घइवाभवत्॥ अनुचिंतयतश्चापितामेवायतलोचनं॥ आसीदभ्यधिकाचास्यश्रीःश्रियं८प्रमुमुक्ष
तः॥ निर्वाणकालदीपस्यवर्तीमिवदिधक्षतः॥ कृतसंप्रत्ययस्तत्रकीचकःकाममोहितः॥ नाजानादिवसंयांतंचिंतयानःस
मागमं॥ ततस्तुद्रौपदीगत्वातदाभीमंमहानसं॥ उपातिष्ठतकल्याणीकौरव्यंपतिमंतिकात्॥ तमुवाचसुकेशांताकीच
कस्यमयाकृतः॥ संगमोनर्तनागारेयथावोचःपरंतप॥ शून्यंसनर्तनागारमागमिष्यतिकीचकः॥ एकोनिशिमहा
बाहोकीचकंतंनिषूदय॥ तंसूतपुत्रंकौंतेयकीचकंमददर्पितं॥ गत्वात्वंनर्तनागारंनिर्जीवंकुरुपांडव॥ दर्पाच्चसूतपुत्रो
यंवाःस

कंदर्पशस्त्रं गंधर्वाः श्रुवाराज्ञ्यस्तत्र पश्यंति। कामं मित्रत्वमतमश्विन्यां रात्रौ। बला निदर्हः हरिसिंहः। तां संकलितां। वेलां

 वीनवमन्यते। तं वै प्रहृत्य तां श्रेष्ठ कं देवा गडवो दरा। अद्यप्रभृति स्वानि रूतायाम ममार्कस्य नारत। आत्मवाद्धिवत्तनडते कृष्णमानं कृत
स्व॥ भीमसेन उवाच॥ एवं कराम्यहं नंदे यथा वं भीरु भाषसे। स्वागतं तव रा ... हेयन्मां वेदय सुप्रियं। न ह्यहं किंचि दि
च्छामि महायं वरवर्णिनि यामप्रातिस्तूयाख्याता कीचकस्य समागमात्। दृष्ट्वा हि डिंबं साप्रीतिर्ममासीद्वरवर्णिनि। सत्यं भ्रातॄंश्च
धर्मं च पुरस्कृत्य ब्रवीमि ते। कीचकं निहनिष्यामि वृत्रं देवपतिर्यथा। तं गह्वरे प्रकाशे वा पोथयिष्यामि कीचकं। अथ चेद
पियोत्स्यंते हंस्ये मत्स्यानपि ध्रुवं। ततो दुर्योधनं हत्वा प्रतिपत्स्ये वसुंधरां। कामं मत्स्यमुपास्तां हि कुंतीपुत्रो युधिष्ठिरः॥
द्रौपद्युवाच॥ यथा न संत्यजेथास्त्वं सत्यं वै मत्कृते विभो। निगूढस्त्वं तथा वीर कीचकं तं निषूदय॥ भीमसेन उवाच॥ एव
मेतत्करिष्यामि यथा त्वं भीरु भाषसे। अद्य तं सूदयिष्यामि कीचकं सहबांधवं। अदृश्यमानस्तस्याद्य तमस्विन्यामनिंदि
ते। नागो बिल्वमिवाक्रम्य पोथयिष्याम्यहं शिरः। अलभ्यामिच्छतस्तस्य कीचकस्य दुरात्मनः॥ वैशंपायन उवाच॥
भीमोथ प्रथमं गत्वा रात्रौ छन्न उपाविशत्। मृगं हरिरिवादृश्यः प्रत्याकांक्षत्स कीचकं। कीचकश्चाप्यलंकृत्य यथाकाममुपावि २७
शत्। तां वेलां नर्तनागारे पांचालीसंगमाशया। मन्यमानः स संकेतमागारं प्रविवेशाततां प्रविश्य च तद्वेश्म तमसा संवृतं मह
से त

द्यापि रोगान्मथितो चित्तात्मा नोमनोवुद्धीयस्य। निराबाध। प्रतिबंधा।

त
स्वीगतं ततस्तत्र भीममपश्यति। मोजसं। एकांतमास्थितं चैनमाससमासादसुदुर्मतिः॥ शयानं शयनेत्तत्र सूतपुत्रः परामृशत्॥
जाज्वल्यमानं कोपेन कृष्णाधर्षणजेन च। उपसंगम्य चैवैनं कीचकः काममोहितः। हर्षोन्मथितचित्तात्मा स्मयमानोभ्यभाषत।
प्रापितं तमया वित्तं बहुरूपमनंतकं। यत्कृतं धनरत्नाढ्यं दासीशतपरिच्छदं। रूपलावण्ययुक्ताभिर्नारीभिः समलंकृतं। गृहं सां
तःपुरं सुभ्रु क्रीडारतिविराजितं। तत्सर्वं त्वां समुद्दिश्य सहसा समुपागतः। अकस्मान्मां प्रशंसंति सदा गृहगताः स्त्रियः। सुवा
सा दर्शनीयश्च नान्योस्ति त्वादृशः पुमान्॥ भीमसेन उवाच॥ दिष्ट्या त्वं दर्शनीयोसि दिष्ट्यात्मानं प्रशंससि। ईदृशस्तु त्वया स्पर्शः
स्पृष्टपूर्वो न कर्हिचित्। स्पर्शं वेत्सि विदग्धस्त्वं कामधर्मविचक्षणः। स्त्रीणां प्रीतिकरो नान्यस्त्वत्समः पुरुषो क्वचित्॥ वैशंपाय
न उवाच॥ ॥ इत्युक्त्वा तं महाबाहुर्भीमो भीमपराक्रमः। सहसोत्पत्य कौंतेयः प्रहस्योवाच कीचकं। अद्य त्वां भगिनी पापक्र
ष्यमाणां मयाद्य वि। द्रक्ष्यत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपं। निराबाधा त्वयि हते सैरिंध्री। पतयस्सदा। ततो जग्राह केशेषु
माल्यवत्सु महाबलः। स केशेषु परामृष्टो बलेन बलिनां वरः। आक्षिप्य केशान्वेगेन बाह्वोर्जग्राह पांडवं। बाहुयुद्धं तयो रासी

हृष्टरोमा स्थितो चिन्तात्मा नोमना बुद्धीमस्य। निराबाधम प्रतिवं धृत्य नरवा एवं दंष्ट्रास्त्रानिः प्रागलितं च वै। निर्गाय दरीने

विराट स्योर्नरसिंहयो। वसंतवासिना हतोर्बलवद्धुतयोरिव। कीचकानां तु मुख्यस्य नराणामुत्तमस्य च। अन्योन्यमभिसंरब्धौ परस्परव
धैषिणो। वालिसुग्रीवयोर्भ्रात्रोः पुरा वकपि सिंहयोः। बाहुभिः समसक्ततामाय सेः परिघैरिव। ततः संप्रहरुतुर्दितौ पंचशी
र्षा विवोरगौ। नखदंष्ट्राभिरन्योन्यं जघ्नतुः क्रोधमूर्छितौ। वेगेनाभिहतो भीमः कीचकेन बलीयसा। स्थिरप्रतिज्ञः स रणे पदा
च चलितः पदं। तावन्योन्यं समाश्लिष्य प्रकर्षंतौ परस्परं। उभावपि प्रकाशेते प्रवृद्धौ वृषभाविव। तयोरासीत्सुतुमुलः संप्रहारः
सुदारुणः। नखदंष्ट्रायुधवतोर्व्याघ्रयोरिव दृप्तयोः। अभिपत्याथ बाहुभ्यां प्रत्यगृह्णादमर्षितः। मातंग इव मातंगं प्रभिन्नकर
टामुखं। स चाप्येनं तदा भीमः प्रतिजग्राह वीर्यवान्। तमाक्षिपत्कीचकोऽथ बलेन बलिनां वरः। तयोर्भुजविनिष्पेषादुभयोर्बलि
नोस्तदा। शब्दः समभवद्घोरो वेणुस्फोटसमो युधि। अथैनमाक्षिप्य बलाद्गृहमध्ये वृकोदरः। धूनयामास वेगेन वायुश्चंडइ
व द्रुमं। भीमेन च परामृष्टो दुर्बलो बलिना रणे। व्यस्पंदत तदा प्राणान्विचकर्ष च पांडवं। ईषदागलितं चापि क्रोधाद्बलपदं स्थितं
कीचको बलवान्भीमं जानुभ्यामाक्षिपद्भुवि। पातितो भुवि भीमस्तु कीचकेन बलीयसा। उत्पपाताथ वेगेन दंडपाणिरि ३०
वांतकः। स्पर्धया च बलोन्मत्तौ तावुभौ सूतपांडवौ। निशीथे पर्यकर्षेतां बलिनौ निशि निर्जने॥

योक्रयामास वेश्मेन्हितवान्। रसनया रज्ज्वा। दोर्भ्यां बाहुभ्यां। विधूत्य हस्तौ यादौ वयुगयन्त्रथगेवचा। यथा आस्फालनमु

ततस्तद्भवनश्रेष्ठं प्राकंपत मुहुर्मुहुः। बलवच्चापि संक्रुद्धावन्योन्यं तावगर्जतां। तलाभ्यां स तु तं भीमो वक्षस्यभिहतो ब
ली। कीचको रोषसंतप्तः पदान्न चलितः पदं। मुहूर्तं तु स तं वेगं सहित्वा भुवि दुःसहं। बलादहीयत तदा सूतो भीमबलार्दितः
तं हीयमानं विज्ञाय भीमसेनो महाबलः। वक्षस्यानीय वेगेन ममर्दैनं विचेतनं। क्रोधाविष्टो विनिःश्वस्य पुनश्चैनं वृको
दरः। जग्राह जयतां श्रेष्ठः केशेष्वेव तदा भृशं। गृहीत्वा कीचकं भीमो विरुराव महाबलः। शार्दूलः पिशिताकांक्षी गृहीत्वे
व महामृगं। तत एनं परिश्रांतमुपलभ्य वृकोदरः। योक्त्रयामास बाहुभ्यां पशुं रशनया यथा। नदंतं च महानादं भिन्नभेरी
समस्वनं। भ्रामयामास सुचिरं विस्फुरंतमचेतसं। तं मीदमानं विज्ञाय कीचकं यो दुर्नंदनः। प्रगृह्य तरसा दोर्भ्यां कंठं तस्य वृ
कोदरः। जग्राह जयतां श्रेष्ठः केशेष्वेव पुनर्भृशं। अपीडयत कृष्णायास्तदा कोपप्रशांतये। अथ तं भग्नसर्वांगं व्याविद्धन
यनांबरं। आक्रम्य च कटीदेशे जानुना कीचकाधमं। अपीडयत बाहुभ्यां पशुमारममारयत्। तं विषीदंतमाज्ञाय कीच स
कं पांडुनंदनः। भूतले भ्रामयामास वाक्यं चेदमुवाच ह। अद्याहमनृणो भूत्वा भ्रातुर्भार्यापहारिणं। शांतिं लब्धास्मि परमां ह
त्वा सैरंध्रीकंटकं। इत्येवमुक्त्वा पुरुषप्रवीरस्तं कीचकं क्रोधसरागनेत्रः। विस्रस्तवस्त्राभरणं स्फुरंतमुद्भ्रांतचित्तं व्यसु

काल्यपशुमारं तदुच्यते व्यसुमृतं॥

यावद्दष्टीलैः प्रदाद्यात्तैः शमं यांति॥

मुष्टमस्त्री निहत्य पाणिनायालिंमं दृष्टोप्प्युद्धो बली। तं विषीदंतमाज्ञाय कीचकं पांडुनंदनः। समाक्रम्य च संक्रुद्धो बालन
विराट बलिनो वरं भ्रमत्वा हन्तमहाबाहुः पादाष्टीलैः सुदारुणैः॥ तस्य पादौ च पाणी च शिरो ग्रीवां च सर्वशः। कायं प्रवेशयामास
पशोरिव पिनाकधृक्। तं संमथित सर्वांगं मांसपिंडोपमं कृतं। कृष्णायै दर्शयामास भीमसेनो महाबलः॥ उवाच च महाते
जा द्रौपदीं पांडुनंदनः। पश्यैनमेहि पांचालि कामुकोयं यथा कृतः॥ एवमुक्त्वा महाबाहुर्भीमो भीमपराक्रमः। पादेन पीड
यामास तस्य कायं दुरात्मनः॥ अथाग्निं तत्र प्रज्वाल्य दर्शयामास कीचकं। पांचालीं स तदा वीर इदं प्रोवाच वाक्यवित्॥ प्रार्थयंति
सुकेशांते ये त्वां शीलगुणान्वितां। एवं ते भीरु वध्यंते कीचकः शोभते यथा। तत्कृत्वा दुष्करं कर्म कृष्णायाः प्रियमुत्तमं। त
थाथ कीचकं हत्वा गत्वा रोषस्य वै शमं। आमंत्र्य द्रौपदीं कृष्णां क्षिप्रमायान्महानसं। कीचकं घातयित्वा तु द्रौपदी यो
षितां वरा। प्रहृष्टा गतसंतापा सभापालानुवाच ह। कीचकोयं हतः शेते गंधर्वैः पतिभिर्मम। परस्त्रीकामसंमत्तः समागव
त पश्यता। तच्छ्रुत्वा भाषितं तस्य नर्तनागाररक्षिणः। सहस्रैव समाजग्मुरादायोल्काः सहस्रशः। ततो गत्वाथ तद्वेश्म कीचकं
विनिपातितं। गतासुं ददृशुर्भूमौ रुधिरेण समुक्षितं। पाणिपादविहीनं तु दृष्ट्वा ते व्यथिता भवन्। ततोतीना ययुः शीघ्रमसु ३१
धामरतपेत॥

उपकीचकाः कीचकावस्थाः॥ तं हताः॥ सोष्ठसमानां उयम्पमादाय॥

अथैनं हृष्टरोमाणो विस्मिताः प्रेक्ष्य कीचकं। निरीक्षंति ततः सर्वे परं विस्मयमागताः॥ अमानुषं कृतं कर्म तं दृष्ट्वा विनिपा
तितं। क्वास्य ग्रीवा क्व चरणौ क्व पाणी क्व शिरस्तथा॥ इति स्म तं निरीक्षंते गंधर्वेण हतं तदा॥ ॥महाभारते विराटपर्वणि
कीचकवधः॥ ॥वैशंपायन उवाच॥ ॥तस्मिन्काले समागम्य सर्वे तत्रास्य बांधवाः। रुरुदुः कीचकं दृष्ट्वा परिवार्य स
मंततः। सर्वे संहृष्टरोमाणः संत्रस्ताः प्रेक्ष्य कीचकं। तथा सर्वांगसंभग्नं कूर्मं स्थल इवोद्धृतं। पोथितं भीमसेनेन तमिंद्र
ण दानवं। संस्कारयितुमिच्छंतो बहिर्नेतुं प्रचक्रमुः। ददृशुस्ते ततः कृष्णां सूतपुत्राः समागताः। अदूराद्दनवद्यांगीं स्तंभ
मालिंग्य तिष्ठतीं। समवेतेषु सूतेषु तानुवाचोपकीचकः। हन्यतां शीघ्रमसती यत्कृते कीचको हतः। अथवा नेन हंतव्या द
ह्यतां कामिना सह। मृतस्यापि प्रियं कार्यं सूतपुत्रस्य सर्वथा। ततो विराटं ऊचुस्ते कीचकोस्याः कृते हतः। सहाद्यानेन
गच्छेत तदनुज्ञातुमर्हसि। पराक्रमं च सूतानां मत्वा राजान्वमोदत। ततः सैरंध्रीं आस्थाय सूतपुत्रा दहाते विशांपते। तां समासा
द्य वित्रस्तां कृष्णां कमललोचनां। मोमुह्यमानां ते तत्र जगृहुः कीचका भृशं। ततस्तु तां समारोप्य निबध्य च सुमध्यमां
उग्मुध । जग्मुरुद्यम्य सर्वे ते श्मशानाभिमुखास्तदा। ह्रियमाणा तु सा राजन् सूतपुत्रैरनिंदिता। प्राक्रोशन्नाथमिच्छंती कृष्णा नाथ

विराट

ॐ

विजज्ञं ते गात्र नियामकस्मै करोवसम्यायतं वा मम वस्कंध। आरुह्य नक्का॥

वतीमती॥ द्रौपद्युवाच॥ जयो जयंतो विजयो जयत्सेनो जयद्बलः। ते मे वाचं व्य विजानंतस्ततश्च वानयंति मां। तेषां ज्यातल

निर्घोषो विस्फूर्जितमिवाशनेः। व्यश्रूयत महाघोषो दध्नीम घोषस्तरस्विनां। रथघोषश्च बलवान् गंधर्वाणां यशस्विनां। ते मवाचं

विजानंतु स्सूतपुत्रानयतिमां॥ वैशंपायन उवाच॥ तस्यास्ताः कृपणा वाचो द्रौपद्याः परिदेवितः। श्रुत्वैवाभ्यपतज्जीमः

शयनाद विचारयन्॥ भीमसेन उवाच॥ अहं शृणोमि ते वाचं त्वया सैरिंध्रि भाषितां। तस्मात्ते सूतपुत्रेभ्यो नभयं भीरु विद्य

ते॥ वैशंपायन उवाच॥ इत्युक्त्वा स महाबाहुर्विजृंभे जिघांसया। ततस्व्यायतं कृत्वा वेषं विपरिवर्त्य च। अद्वारेणा

उप भिनिष्क्रम्य निर्जगाम बहिस्तदा। स भीमसेनः प्राकारमारुह्य तरसा द्रुमं। श्मशानाभिमुखः प्रायाद्यत्र ते कीचका गताः

। स लंघयित्वा प्राकारं निःसृत्य च पुरोत्तमात्। जवेनापतितो भीमः सूतानामग्रतस्तदा। चितासमीपे गत्वा सतत्र प्रत्यदृन

स्पतिं। तालमात्रं महास्कंधं ऊर्ध्वशुष्कं विशांपते। तं नागवद्रुपक्रम्य बाहुभ्यां परिरभ्य च। स्कंधमारोपयामास दशव्या

मं फलं द्रुमं॥ स तं वृक्षं दशव्यामं सस्कंधविटपं बली। प्रगृह्याभ्यद्रवत् सूतान् दंडपाणिरिवांतकः। ऊरुवेगेन तस्याथ न्यग्रोधा ३२

श्वत्थकिंशुकाः। भूमौ निपतिता वृक्षाः संघशस्तत्र शेरते। तं सिंहमिव संक्रुद्धं दृष्ट्वा गंधर्वमागतं। वित्रेसुः सर्वतः सूता विषादभयकंपिताः

श्राविद्धं चामितं। विहि प्रविद्धा। अन्येन यद्या सूतानां षट्शतं। विकार्षी विक्षिप्तं॥

न

ततं तकमिवायांतं गंधर्वं वेस्यतेत दा। दिधक्षंतस्त्र याज्ये ष्टभ्रातरं सूतपुत्रकीचकाः। परस्परमथोचुस्ते विषादभयकंपिताः।

गंधर्वो बलवानेति कुद्धउद्यम्य पादपं। सैरिंध्री मुच्यतां शीघ्रं महद्भयमुपागतं। ततस्ते दृष्ट्वा भीमाविद्धं भीमसेनेन पादपं। विमुच्य

द्रौपदीं तत्र प्राद्रवन् नगरं प्रति। द्रवतस्तांस्तु संप्रेक्ष्य स वज्री दानवानिव। शतं पंचाधिकं तत्र प्राहिणोद्यमसादनं। वृक्षेणैते

न राजेंद्र प्रभंजनसुतो बली। तत आश्वासयत्कृष्णां प्रविमुच्य विशांपते। उवाच च महाबाहुः पांचालीं तत्र द्रौपदीं। अश्रुपूर्ण स

मुखीं दीनां दुर्धर्षः स वृकोदरः। एवं ते भीरु वध्यंते ये त्वां क्लिश्यंत्यनागसं। प्रैहि त्वं नगरं कृष्णे नभयं विद्यते तव। अ

न्येनाहं गमिष्यामि विराटस्य महानसं॥ ॥वैशंपायन उवाच॥ पंचाधिकं शतं तच्च निहतं तत्र भारत। महावनमिव छिन्नं शि

श्ये विगतविक्लवं। एवं ते निहता राजंशतं पंच च कीचकाः। स च सेनापतिः पूर्वमित्येतत्सूतषट्शतं। तद्दृष्ट्वा महदाश्चर्यं नरा ना

र्यश्च संगताः। विस्मयं परमं जग्मुर्नोचुः किंचन भारत॥ महाभारते विराटपर्वणि कीचकानां वधः॥ ॥वैशंपायन उ

वाच॥ ॥ ते दृष्ट्वा निहतान्सूतान्राज्ञे गत्वान्यवेदयन्। गंधर्वैर्निहता राजन्सूतपुत्राः परःशताः। यथा वज्रेण वै दीर्णं प

पर्वतस्य महच्छिरः। विनिकीर्णाः प्रदृश्यंते तथा सूता महीतले। सैरिंध्री च विमुक्तासौ पुनरायाति ते गृहं। सर्वं संशयि

चरमक्रियायै नरास्तं। ज्वलिते हि। मंत्रा निःसंकतवाक्ये॥

स्तु राजन्नगरं तत्र विष्पति। तथारूपा च सैरंध्री गंधर्वाश्च महाबलाः। पुंसामिष्टाश्च विषया मैथुनाय न संशयः। यथा सैरिं
ध्रीदोषेण न ते राजन्निदं पुरं। विनाशमेष्यति क्षिप्रं तथा नीतिर्विधीयतां। तेषां तद्वचनं श्रुत्वा विराटो वाहिनीपतिः। अब्रवीत् क्रि
यतामेषां सूतानां चरमा क्रिया। एकस्मिन्नेव ते सर्वे सुसमिद्धे हुताशने। दह्यंतां कीचकाः शीघ्रं रत्नैर्गंधैश्च सर्वशः। सु
देष्णां चाब्रवीद्राजा महिषीं जातसाध्वसः। सैरंध्रीमागतां ब्रूयाममैव वचनादिदं। गच्छ सैरंध्रि भद्रं ते यथाकामं चराबले।
बिभेति राजा सुश्रोणि गंधर्वेभ्यः पराभवात्। न हि त्वामुत्सहे वक्तुं स्वयं गंधर्वरक्षितां। स्त्रियास्त्वदोषस्तां वक्तुमतस्त्वां प्रब्रवी
म्यहं॥ वैशंपायन उवाच॥ अथ मुक्ता भयात्कृष्णा सूतपुत्रान्निरस्य च। मोक्षिता भीमसेनेन जगाम नगरं प्रति। त्रासितेव
मृगी बाला शार्दूलेन मनस्विनी। गात्राणि वाससी चैव प्रक्षाल्य सलिलेन सा। तां दृष्ट्वा पुरुषा राजन् प्राद्रवंत दिशो दश॥
गंधर्वभयवित्रस्ताः केचिद्दृष्टीर्न्यमीलयन्। ततो महानसद्वारि भीमसेनमवस्थितं। ददर्श राजन् पांचाली यथा मत्तम
हाद्विपं। तं विस्मयंती शनकैः संज्ञाभिरिदमब्रवीत्। नमो गंधर्वराजाय येनास्मि परिमोक्षिता॥ ॥भीमसे २३
न उवाच॥ ॥ये पुरा विचरंतीह पुरुषा वशवर्तिनः। तस्यास्ते वचनं श्रुत्वा अनृणा विचरंत्युत॥

कालेन निर्वेहे मामं॥
॥ ॥वैशंपायन उवाच॥ ॥ततः सा नर्तनागारे धनंजयमपश्यत। राज्ञः कन्या विराटस्य नर्तयानं महाभुजं। ततस्तास्तत्र नागा
राद्विनिष्क्रम्य महार्जुनाः। ज्या यांतीं ददृशुः कन्याः कृष्णां क्लिष्टामनागसं॥ ॥कन्या ऊचुः॥ ॥दिष्ट्या सैरंध्रि मुक्तासि दि
ष्ट्यासि पुनरागता। दिष्ट्या विनिहताः सूता ये त्वां क्लिश्यंत्यनागसं॥ ॥बृहन्नलोवाच॥ ॥कथं सैरंध्रि मुक्तासि कथं पापाश्च
ते हताः। इच्छामि वै तव श्रोतुं सर्वमेव यथातथं॥ ॥सैरंध्र्युवाच॥ ॥बृहन्नले किं नु तव सैरंध्र्या कार्यमद्य वै। या त्वं वससि क
ल्याणि सदा कन्यापुरे सुखं। न हि दुःखं समाप्नोषि सैरंध्री यदुपाश्नुते। तेन मां दुःखितामेवं पृच्छसि प्रहसन्निव॥ ॥बृहन्न
लोवाच॥ ॥बृहन्नलापि कल्याणि दुःखमाप्नोत्यनुत्तमं। तिर्यग्योनिगता बाले न चैनामवबुध्यसे। त्वया सहोषिता चास्मि
त्वं च सर्वैः सुदुःखिता। क्लिश्यंत्यां त्वयि सुश्रोणि को नु दुःखं न चिंतयेत्। न तु केनचिदत्यंतं कस्यचिद्धृदयं क्वचित्। वेदितुं
शक्यते नूनं तेन मां नावबुध्यसे॥ ॥वैशंपायन उवाच॥ ॥ततः सहैव कन्याभिर्द्रौपदी राजवेश्मनि। प्रविवेश सुदेष्णा
याः समीपमपलायिनी। तामब्रवीद्राजपत्नी विराटवचनादिदं। सैरंध्रि गम्यतां शीघ्रं यत्र कामयसे गतिं। राजा बिभेति सु
श्रोणि गंधर्वेभ्यः पराभवात्। त्वं चापि तरुणी सुभ्रु रूपेणाप्रतिमा भुवि॥ ॥सैरंध्र्युवाच॥ ॥त्रयोदशाहमात्रं मे राजा क्षमतु भा

विराट

इति कीचकवधः॥ ॥अत्याहितं महाभयं। देशानां निदर्शनं निरूपणं। कृतवत्याः संधितराज्ञो देशाः। ललना श्रुत्वानं ललना

विनि कृतकृत्या न विधक्ष्यति गंधर्वोऽस्ति न संशयः। ततो मामनु यतेष्यंति करिष्यंति च ते प्रियं। कथं च श्रेयसा राज्ञा योऽद्यते सह बाधवे॥ ॥इति विराटपर्वणि कीचकवधः समाप्तः॥ ॥वैशंपायन उवाच॥ ॥कीचकस्य तु घातेन सानुजस्य विशांपते। अत्या-
हितं चिंतयित्वा व्यस्मयंत पृथग्जनाः। तस्मिन् पुरे जनपदे संजल्पोऽभूच्च सर्वशः। शौर्याद्धि वल्लभो राज्ञो महासत्त्वश्च कीच-
कः। आसीत् प्रहर्ता सैन्यानां दारामर्षी च दुर्मतिः। स हतः खलु पापात्मा गंधर्वैर्दुष्टपूरुषः। इत्यजल्पन् महाराज परानीकवि-
शातनं। देशे देशे मनुष्याः स्म कीचकं दुष्प्रधर्षणं। अथ वै धार्तराष्ट्रेण प्रयुक्ता ये बहिश्चराः। मृगयित्वा बहून् ग्रामा-
न्राष्ट्राणि नगराणि च। संविधाय यथादृष्टं यथादेशप्रदर्शनं। कृतचित्ता न्यवर्तंत ते नागपुरं प्रति। तत्र दृष्ट्वा तु रा-
जानं कौरव्यं धृतराष्ट्रजं। द्रोणकर्णकृपैः सार्धं भीष्मेण च महात्मना। संगतं भ्रातृभिश्चापि त्रिगर्तैश्च महारथैः। दुर्योधनं
सभामध्ये आसीनमिदमब्रुवन्॥ ॥चरा ऊचुः॥ ॥कृतोऽस्माभिः परो यत्नस्तेषामन्वेषणे सदा। पांडवानां मनुष्येंद्र तस्मि-
न्महति कानने। निर्जने मृगसंकीर्णे नानाद्रुमलतावृते। लताप्रतानबहुले नानागुल्मसमावृते। न च विद्मो गता येन पार्थाः
स्युर्दृढविक्रमाः। मार्गमाणाः पदन्यासं तेषु तेषु तथानघ। गिरिकूटेषु तुंगेषु नानाजनपदेषु च। जनाकीर्णेषु देशे- ३४

विटपः। गुल्मो माटकः। गव्यूतिर्दीर्घक्रोशार्धविस्तारं कर्वटं भवेत्। पुरं द्विक्रोशनाथा मं गव्यूतिश्च समिष्यते॥

प्रवृत्तिं चात्रभीक्ष्णं त्वं शाधि। आदिश। इदं जानीहि। अस्मिन्वर्षे कालशेषं ततः समासिंशत्यन्ते इत्यत्र वयः। वृषिहं बहुतरं। दुःस्वा

शु कर्वटेषु पुरेषु च। नरेंद्र बहुशोऽन्विष्टा नैव विद्मश्च पांडवान्। अत्यंतभावं नष्टास्ते भद्रं तुभ्यं नरर्षभ। वर्त्मान्यन्विष्यमाणा-
स्तु रथानां रथसत्तम। कंचित्कालं मनुष्येंद्र सूतानामनुगा वयं। मृगयित्वा यथान्यायं विदितार्थाः स्म तत्त्वतः। प्राप्ता द्वारवतीं
सूता विना पार्थैः परंतप। न तत्र कृष्णा राजेंद्र पांडवाश्च महाव्रताः। सर्वथा विप्रनष्टास्ते नमस्ते तु नरर्षभ। न हि विद्मो गतिं ते-
षां वासं वापि महात्मनां। पांडवानां प्रवृत्तिं वा विद्मः कर्मापि वा कृतं। न ते संनिमनुष्येंद्र ततः किं विशांपते। अन्वेषणे पांड-
वानां तु भूयः किं करवामहे। इमां च नः प्रियामीक्ष्व वाचं भद्रवतीं शुभां। येन त्रिगर्ता निकृता बलेन महता नृप। सूतेन राज्ञो म-
श३ त्स्यस्य कीचकेन महात्मना। स हतः पतितः शेते गंधर्वैर्निशि भारत। अदृश्यमानैर्दुष्टात्मा सह भ्रातृभिरच्युत। प्रियमेत-
दुपश्रुत्य शत्रूणां च पराभवं। कृतकृत्यश्च कौरव्य विधत्स्व यदनंतरं॥ ॥इति विराटपर्वणि चारप्रत्यागारे॥ ॥वैशंपायन
उवाच॥ ॥ततो दुर्योधनो राजा श्रुत्वा तेषां वचस्तदा। चिरमंतर्मना भूत्वा प्रत्युवाच सभासदः। सुदुःखा खलु कार्याणां
निविज्ञातुं गतिस्ततः। तस्मात्सर्वे उदीक्षध्वं क्व नु स्युः पांडवा गताः। अल्पावशिष्टं कालस्य गतभूयिष्ठमंततः। तेषामज्ञात-
चर्याणामस्मिन्वर्षे त्रयोदशे। अस्य वर्षस्य शेषं चेद्व्यतीयुरिह पांडवाः। निवृत्तसमयास्ते हि सत्यव्रतपरायणाः। स्फुरं

दुःखमाध्या॥

दुःखादुःखसाध्या। अर्वाक्कालस्य कर्जनमात्रेः पूर्वकालो। अव्यग्रं बिरस्तायिादृशाः अनलसाः। निहतागूढो कयः संवी
विराट तद्वनागिं ग्राः सर्वे भावी (चाश्री) विघोपमाः। दुःखावं नवेयुः संरब्धाः कौरवान् प्रतितेधृवं। अर्वाक्कालस्य विज्ञाताः लवुरुप
धरातुनः। प्रविश्यो युक्तिर्नक्रो धास्यावद्देवननोवनं। तस्मात्किंप्रकुन्द्वत्र्ह्युं प्रतिकर्त्तव्यमव्यग्रं। गतं निहिंहमव्यग्रेतिः। मयत्रोविरं
सवेन्। अथाब्रवीत्ततः कर्णः किं इंगबेतुत्तारता। अन्यधूर्ततरादकानिन्हताः साधुकारिणः। वरंतु देशांसंवीनाः स्फीतादन
नपदांकुलान्। तत्र गोष्ठीसुरम्याणुमिष्ठ उक्षिजितेषु च। परिवारेषु तीर्थेषु विविधेषाकारेषु चा। अथाग्रज्ञोनंतरंजापाय
नागानुरागिणं। ज्येष्ठं दुःशासनं तत्र त्वा तात्राजमब्रवीत्। एषु नः प्रत्ययोराजन्स्मारधुमद्भुता धियं तेषां तु देहदेयं। वे
नृपस्तान्परिमार्गितुं। एतद्वकर्णीयत्राहं सर्वं इंक्रामहेनथा। यथोद्दिष्टमराः सार्वे मृगयंतु ततस्ततः। एतेवान्यैव स्तु
योमोदेशेदेशेयथाविधि। नत्वेतेषां गतिर्वासः प्रवृत्तिश्चोपलभ्यते। अत्यंतेवानिगूढास्ते पारंचोर्मिमतोगताः। व्यालैर्वापि
महारण्येस्त्वक्तिताः शूरमानिनः। अथवा विषमं प्राप्य विनष्टाः शाश्वतीः समाः। तस्मान्मानसमव्यग्रं कृत्वा त्वं कुरुनंद
नाकुरुकार्यं यथोत्साहोन्मतं त्वं नराधिप॥ ॥विराटपर्वणि चारप्रत्याचारे॥ ॥वैशंपायनउवाच॥ ॥अथाब्रवीन्म
हावीरो द्रोणस्तत्त्वार्थदर्शिवान्। नतादृशा विनश्यंति नतेयांति पराभवं। शूराश्च कृतविद्याश्च बुद्धिमंतो जितेंद्रियाः। ध ३५
तातिस्वदा॥ गोष्ठीश्रुमनासु। परिवारेष्वजनप्रचारेषु। तर्कयाऊहेता। ऊर्मिमतो ह्रेः। अव्यग्रमनाकुलं॥

पिरवत्पितरमिवजेष्टताद्दन्यन्वयः। सत्यास्थिताधृतिर्यस्य विधेयानां विनयग्राहिणां। अकालिकमविलंबितं। एड्क्रीया
र्मज्ञाः कृतज्ञाश्च धर्मराजमनुव्रताः। नीतिधर्मार्थतत्त्वज्ञाः पितृवत्तु समाहिताः। धर्मे स्थितं सत्यधृतिं ज्येष्ठं ज्येष्ठापचायि
नः। अनुव्रता महात्मानं भ्रातरो भ्रातरं नृप। अजातशत्रुं ह्रीमंतं तान्च भ्रातॄननुव्रतान्। तेषां तथा विधेयानां निभृतानां
महात्मनां। किमर्थं नीतिमान्पार्थः श्रेयो नेषां करिष्यति। तस्माद्यत्नात्प्रतीक्षंते कालस्योदयमागतं। नते नाशंगताः
श्वराइति पश्याम्यहं धिया। सांप्रतं चैव यत्कार्यं तच्च क्षिप्रमकालिकं। क्रियतां साधु संचिंत्य वासश्चैषां विचिंत्यतां। यथा
वत्पाडुपुत्राणां सर्वार्थेषु धृतात्मनां। दुर्ज्ञेयाः खलु शूरास्ते निष्पापास्तपसा वृताः। शुद्धिमान्गुणवान्पार्थः सत्यवान्नी
तिवान्शुचिः। तेजोराशिरसंख्येयो गृह्णीयादपि चक्षुषी। विज्ञाय क्रियतां तस्माद्भूयो वा गम्यतां चरैः। ब्राह्मणैश्चार
कैः सिद्धैर्ये वान्येतद्विदोजनाः॥ ॥विराटपर्वणि चारप्रत्याचारद्रोणवाक्यं॥ ॥वैशंपायनउवाच॥ ॥ततः शांतनवो
भीष्मो भरतानां पितामहः। श्रुतवान्देशकालज्ञस्तत्त्वज्ञः सर्वधर्मवित्। आचार्यवाक्योपरमे तद्वाक्यमभिसंदधत्। हि
तार्थं स उवाचेमां भारतीं भारतान्प्रति। युधिष्ठिरसमासक्तां धर्मज्ञो धर्मसंहितां। असत्सु दुर्लभां नित्यं सतां गतिमतां स
सर्व दा। भीष्मः समवदत्तत्र गिरं साधुभिरर्चितां। यथैष ब्राह्मणः प्राह द्रोणः सर्वार्थतत्त्ववित्। तथाक्यमिति निर्दाभिनमेस्य
स्वतिवध्नीयात्। सिद्धैर्वदिका विसिद्धिमद्भिः। (श्री) अभिसंदधत्परिपूजयत्। भारती वाणी॥

विराट

नाव्यंनचितवं॥ अस्मांस्ततमयुक्तं॥ वदान्योवल्गुवाक॥ नाव्योनविनतोधीव्या॥ असूयकोगुणेदोषारोपकः॥ ईर्षुरहेमेनः॥ मत्सरी ॥ कोवलः॥
त्रविचारणा॥ सर्वलक्षणसंपन्नानाशंनोर्हंतिपांडवाः॥ श्रुतवृत्तोपसंपन्नाः साधुवृत्तमनुव्रताः॥ वृद्धानुशासनेलग्नाः सत्य
व्रतपरायणाः॥ समयंसमयज्ञास्तेपालयंतः शुचिव्रताः॥ क्षात्रेधर्मेरतानित्यंकेशवानुगताः सदा॥ प्रवीरपुरुषास्तेविम
हात्मानोमहाबलाः॥ नावसीदितुमर्हंतिउद्वहंतः सतांधुरं॥ धर्मतश्चैवगुप्तास्तेस्ववीर्येणचपांडवाः॥ ननाशमधिगच्छेयु
रितिमेधीयतेमतिः॥ तत्रबुद्धिंप्रणेष्यामिपांडवानांतुभारत॥ नतुनीतिः सुनीतस्यशक्यतेन्वेषितुंपरैः॥ यत्तुशक्यमिहास्मा
भिस्तान्वैसंचिंत्यपांडवान्॥ बुद्ध्याप्रवृत्तंनद्रोहात्प्रवक्ष्यामिनिबोधत॥ नत्वियंमादृशैर्नीतिस्तस्यवाच्याकथंचन॥ सा॰
त्वियंसाधुवक्तव्यानत्वनीतिः कथंचन॥ वृद्धानुशासनेतातनिष्ठतासत्यशालिना॥ अवश्यंत्विहधीरेणसतांमध्येविव
क्षता॥ यथार्थमतिवक्तव्यंसर्वशोधर्मलिप्सया॥ तत्रनाहंतथामन्येयथायमितरोजनः॥ निवासंधर्मराजस्यवर्षेस्मिन्वै
त्रयोदशे॥ तत्रतातनतेषांहिराज्ञोभाव्यमसांप्रतं॥ पुरेजनपदेवापियत्रराजायुधिष्ठिरः॥ दानशीलोवदान्यश्चनिभृतो
ह्रीनिषेवकः॥ जनोजनपदेसर्वोयत्रराजायुधिष्ठिरः॥ प्रियवादीसदादांतोभव्यः सत्यपरोजनः॥ हृष्टपुष्टः शुचिर्दक्षो
यत्रराजायुधिष्ठिरः॥ नासूयकोनचापीर्षुर्नातिमानीनमत्सरी॥ भविष्यतिजनस्तत्रस्वयंधर्ममनुव्रतः॥ ब्रह्मघोषाश्चभू ३६
यांसः पूर्णाहुत्यस्तथैवच॥ क्रतवश्चभविष्यंतिभूयांसोभूरिदक्षिणाः॥ सदाचतत्रपर्जन्यः सम्यग्वर्षीनसंशयः॥

निरीतिकाअतिवृष्ट्यादिरहिता॥ निष्प्रतीपमप्रतिहतं॥ अस्याहितमतिशायितं॥ हितानिपरिणामेसुरसानि॥ दृश्यानिद
महीसंगंधमासाद्यभविष्यतिनिरीतिका॥ फलवंतिचधान्यानिरसवंतिफलानिच॥ गंधवंतिचमाल्यानिशुभशब्दाच
भारती॥ वायुश्चसुखसंस्पर्शोनिष्प्रतीपंचदर्शनं॥ नभयंमाप्याविशेत्तत्रयत्रराजायुधिष्ठिरः॥ गावश्चबहुलास्तत्रनकृशा
नचदुर्बलाः॥ पयांसिदधिसर्पींषिरसवंतिहितानिच॥ गुणवंतिचपेयानिभोज्यानिरसवंतिच॥ तत्रदेशेभविष्यंतिय
त्रराजायुधिष्ठिरः॥ रसाः स्पर्शाश्चगंधाश्चशब्दाश्चापिगुणान्विताः॥ दृश्यानिचप्रसन्नानियत्रराजायुधिष्ठिरः॥ रसास्पर्शाश्चगं
धश्चशब्दाश्चापिगुणान्विताः॥ दृश्यानिचप्रसन्नानियत्रराजायुधिष्ठिरः॥ धर्माश्चतत्रसर्वैस्तुसेविताश्चद्विजातिभिः॥ स्वै
स्वैर्गुणैश्चसंयुक्ताअस्मिन्वर्षेत्रयोदशे॥ देशेतस्मिन्भविष्यंतितातपांडवसंयुते॥ संप्रीतिमान्जनस्तत्रसंतुष्टः शुचिरव्य
यः॥ देवतातिथिपूजासुसर्वभावानुरागवान्॥ इष्टदानोमहोत्साहः स्वस्वधर्मपरायणः॥ अशुभाद्धिशुभप्रेप्सुरिष्टयज्ञः शुभव्रतः
॥ भविष्यतिजनस्तत्रयत्रराजायुधिष्ठिरः॥ त्यक्तवाक्यानृतस्तातशुभकल्याणमंगलः॥ शुभार्थेप्सुः शुभमतिर्यत्रराजायुधिष्ठिरः
॥ सर्वदेवतदयायुक्तः सदानिर्मलमानसः॥ भविष्यतिजनस्तत्रनित्यंचेष्टप्रियव्रतः॥ धर्मात्मासततंदृश्यः सोपितातद्विजाति
भिः॥ किंपुनः प्राकृतैः पार्थः शक्योविज्ञातुमंततः॥ यस्मिन्सत्यंधृतिर्दानंपराशांतिर्ध्रुवाक्षमा॥ ह्रीः श्रीः कीर्तिः परंतेजआ
नृशंस्यमथार्जवं॥
पाणि॥ कल्याणंकुशलं॥ मंगलरक्षणं॥ शुभमनुपद्रवंकल्याणंमंगलंचयेषां॥ अंततोनिःशेषतः

प्रासे श्रुतं। काले प्रतिज्ञाहर्त्तिं समयाद्वलं निष्यं साम पर्युद्धं वा। नियतं निश्चितं उक्ता वचनिकृतेदं। हर्षं कुरुद्धा धर्मरागं। बलन्ना

विराट। तस्मान्न त्वनिवारं तत्वनं समग्राधीमतः। गतिं च परमां तस्यां नो ज्ञात्वक्तुमन्यथा। एवमेतन्तु संचिंत्य यत्कृतं मन्यसे हितं। तत्क्रियतां कुरु
कौरव्य यद्येवं स्थ हृक्षमिमां॥ इति विराटपर्वणि चारप्रत्याचार भीष्मवाक्यं॥ वैशंपायन उवाच॥ ततः शारद्वतो वा
क्यमित्युवाच तदा कृपः। युक्तं प्रासं च वृद्धेन पांडवान् प्रतिभाषितं। धर्मार्थसहितं श्लक्ष्णं धर्मतत्त्वसहेतुकं। तत्रानुरूपं भीष्मेण
ममाप्यत्र गिरं शृणु। तेषां चैव गतिस्तिस्रो वासं तेषां प्रचिंत्यतां। नीतिर्विधीयतां चापि सांप्रतं या हिता भवेत्। नावज्ञेयो रिपुस्ता
त प्राकृतोपि बुभूषता। किं पुनः पांडवास्तात सर्वास्त्रकुशला रणे। तस्मात्सैन्यं प्रविष्टेषु पांडवेषु महात्मसु। प्रच्छन्नेषु च छन्ने
षु कालेचोदयमाने। स्वराष्ट्रे परराष्ट्रे वा ज्ञातव्यं बलमात्मनः। उदये पांडवानां च प्राप्तकालेन संशयः। निर्वृत्तसमयाः पार्था म
हात्मानो महाबलाः। महोत्साहा भविष्यंति पांडवा ह्यतितेजसः। तस्माद्बलं च कोशं च नीतिश्चापि विधीयतां। यथा कालोदये प्राप्ते स
म्यक् स्वं संदधामहे। इति मन्यामि तत्सर्वं बुध्यस्व बलमात्मनः। नियतं सर्वमित्रेषु बलवत्स्वबलेषु च। उच्चावचं बलं ज्ञात्वा मध्यस्थं चापि
भारत। प्रहृष्टमप्रहृष्टं च संदधाम तथा परैः। सामदानभेददंडेन बलिकर्म्मणा। न्यायेनानम्य च परान् बलाज्ञानम्य दुर्बला
न्। संधाय मित्राणि बलं चाप्नोतु भवान् सुखं। सकोशबलसंपन्नः सम्यक्सिद्धिमवाप्स्यसि। योत्स्यसे चापि बलिभिररिभिः प्रत्यु ३७
पस्थितैः। अन्यैस्त्वं पांडवैर्वा
हीनैः बलिकर्माणादिक्रिया। दंडग्रहणेन। न्यायेन सामदानभेदानामन्यतमेन। प्रसह्य दुर्बलेनराज्ञः।

आत्ययिकं कालप्राप्तं॥

पि हीनस्वबलवाहनैः। एवं सर्वं विनिश्चित्य व्यवसायं स्वधर्मतः। यथाकालं मनुष्येंद्र चिरं सुखमवाप्स्यसि॥ मद्धनारात
विराटपर्वणि चारप्रत्याचार कृपवाक्यं॥ वैशंपायन उवाच॥ अथ राजा त्रिगर्तानां सुशर्मा रथयूथपः। प्राप्तकालमिदं वा
क्यमुवाच त्वरितो भृशं। असकृन्निकृतः पूर्वं मत्स्यैः शाल्वेयकैः प्रभो। सूतेन चैव मत्स्यस्य कीचकेन पुनः पुनः। बाधितो बंधुभिः
सार्धं बलाद्बलवता विभो। स कर्णमभ्युदीक्ष्याथ दुर्योधनमभाषत। असकृन्मत्स्यराज्ञा मे राष्ट्रं बाधितमोजसा। प्रणेता कीचक
श्चास्य बलवानभवत्पुरा। क्रूरोऽमर्षी स दुष्टात्मा भुवि प्रख्यातविक्रमः। निहतस्तत्र गंधर्वैः पापकर्मा नृशंसकः। तस्मिंश्च नि
हते राजन् हीनदर्पो निराश्रयः। भविष्यति निरुत्साहो विराट इति मे मतिः। तत्र यात्रा मम मता यदि ते रोचतेऽनघ। कौरवाणां च स
र्वेषां कर्णस्य च महात्मनः। एतत्प्राप्तमहं मन्ये कार्यमात्ययिकं हितं। राष्ट्रं तस्याभियास्यामो बहुधान्यधनाकुलं। आददास्यामो
नि स्य रत्नानि विविधानि वसूनि च। ग्रामान् राष्ट्राणि वा तस्य हरिष्यामो विभागशः। अथवा गोसहस्राणि बहूनि च शुभानि च। विविधानि
हरिष्यामः प्रतिपीड्य पुरं बलात्। कौरवैः सह संगम्य त्रिगर्तैश्च विशांपते। गास्तस्यापहरामाशु सह सर्वैः सुसंहताः। संधिं
वा तेन कृत्वा तु निबध्नीमोऽस्य पौरुषं। हत्वा चास्य चमूं कृत्स्नां वशमन्वानयामहे। तं वशे न्यायतः कृत्वा सुखं वत्स्यामहे वयं॥ भव

साधनार्थं यात्रार्थं वा। यामः गवाम॥ अनंतरमथ्यकं सुसंवानां। स्वाशक्तिंयाश्रुतुपश्चात्। वरूथिनी। सेनां॥

विराट। तां बलवद्भिः सुसंविष्पतिनिसंशयः॥ तच्छ्रुत्वा वचनं तस्य कर्णो राजानमब्रवीत्। सुष्ठुक्तं सुशर्मणा वाक्यं प्राप्तकालं हितं च नः॥ तस्मात् क्षिप्रं विनिर्यामो योजयित्वा वरूथिनीं॥ विभज्य चाप्यनीकानि यथा वा मन्यसे नृप॥ प्रज्ञावान् कुरुवृद्धो यं सर्वेषां नः पितामहः॥ आचार्यश्च तथा द्रोणः कृपः शारद्वतस्तथा॥ मन्यंते यथा सर्वे तथा यात्रा विधीयतां॥ संमंत्र्य चाशु गच्छामः साधनार्थं महीपतेः॥ किं च नः पांडवैः कार्यं हीनार्थबलपौरुषैः॥ अत्यंतं वा प्रनष्टास्ते प्राप्ता वापि यमक्षयं॥ यामो राजन्ननुद्विग्ना विराटविषयं वयं॥ आदास्यामो हि गास्तस्य विविधानि वसूनि च॥ ॥वैशंपायन उवाच॥ ततो दुर्योधनो राजा वाक्यमादाय तस्य तत्। वैकर्तनस्य कर्णस्य क्षिप्रमाज्ञापयत् स्वयं॥ शासने नित्यसंयुक्तं दुःशासनमनंतरं। सह सर्वैः समं मंत्र्य क्षिप्रं योजय वाहिनीं॥ यथोद्देशं च गच्छाम सहिताः सर्वकौरवैः॥ सुशर्मा तु यथोद्दिष्टं देशं यातु महारथः॥ त्रिगर्तैः सहितो राजा समग्रबलवाहनः॥ प्रागेव हि सुसंवीतो मत्स्यस्य विषयं प्रति॥ जघन्यतो वयं तत्र यास्यामो दिवसांतरं॥ विषयं मत्स्यराजस्य सुसमृद्धं सुसंहताः॥ ते यात्वा सहसा तत्र विराटनगरं प्रति॥ क्षिप्रं गोपान् समासाद्य गृह्णंतु विपुलं धनं॥ गवां शतसहस्राणि श्रीमंति गुणवंति च॥ वयमपि निगृह्णीमो द्विधा कृत्वा वरूथिनीं॥ ३८
॥वैशंपायन उवाच॥ ॥ ते स्म गत्वा यथोद्दिष्टां दिशं वह्नेर्महीपतेः॥

धर्मपुत्रस्य कुलपदस्य। आसामपाश्रयं। आमां प्रगाय मितिवा। अवस्कंद्य च कौरव्यो कालियं नितनयंति। मानस्तुः नमश्रेयो

चास्वनाः सुशर्माति धर्मपक्षस्य ससमी। अपरं दिवसं सर्वे राजन् संभूय कौरवाः॥ अभ्यगात्तात्म्यट्क्तं नागाकुलानि सहस्रशः॥ ॥ इति महाभारते विराटपर्वणि वारप्रत्यावा रानाम॥ ॥वैशंपायन उवाच॥ ततस्तेषां महाराज तत्रैवामिततेजसां। छद्मलिंगप्रविष्टानां पांडवानां महात्मनां॥ व्यतीतः समयः सम्यग् वसतां वै पुरोत्तमे। कुर्वतां तस्य कर्माणि विराटस्य महीपतेः॥ कीचके तु हते राजा विराटः परवीरहा। आसांचक्रे महामात्राः कुंतीपुत्रे युधिष्ठिरे॥ तस्मिन् त्रयोदशस्यांते वर्षस्य भरतर्षभ। सुशर्मणा गृहीतं तु गोधनं तरसा बहु॥ ततो जवेन महता गोपाः पुरमथाव्रजन्। अपश्यन् मत्स्यराजं च सिंहासनगतं प्रभुं। शूरैः परिवृतं योधैः कुंडलांगदधारिभिः॥ वृतं च मंत्रिभिः सार्धं पांडवैश्च नरर्षभैः॥ तं सभायां महाराजमासीनं राष्ट्रवर्धनं॥ सर्वे तमुपसंगम्य विराटं प्रणताब्रुवन्॥ अस्मान् युधि विनिर्जित्य परिभूय सबांधवान्। गवां शतसहस्राणि त्रिगर्ताः कालयंति ते॥ तान् परीप्सस्व गच्छाशु इमान् स्तुः पशवस्तव। तच्छ्रुत्वा नृपतिः सेनां मत्स्यानां समयोजयत्॥ रथनागाश्वकलिलां पत्तिध्वजसमाकुलां॥ राजानो राजपुत्राश्च तनुत्राण्यथ भेजिरे। भानुमंति विचित्राणि सूपसेव्यानि भागशः॥ सवज्रायसगर्भं तु कवचं तत्र कांचनं॥ विराटस्य प्रियो भ्राता शतानीकोऽभ्यधारयत्॥ सर्वपारशवं वर्म कल्याणपटलं दृढं॥ शतानीकादवरजो मदिराश्वोऽभ्यधारयत्॥ शतसूर्यं शतावर्तं शतबिंदु शताक्षिमत्॥

रत्नानि च कवचानि स्वरूपास्त्राणि सुरवर्याणि॥ वज्रायसं वज्रमयं अभ्यधारयत्। प्रिन्द्ववान्। सर्वपारशवं सकलायसं। कल्या

उक्तेधेकायाने।गा।सौगंधिकानि— —त्पलानिश्वेतं रजतमयं।।सोपस्कारछ।।सोपकरणाछ।।यथार्थं।स्वा।ह्यत्या।।

विराट उक्तेधेयस्यपद्मानिशतं सौगंधिकानि च सुवर्णश्वेतं सुर्व्यानंस्तर्य्य देवोस्यदारयत्तारुक्मायसगर्नवृषं लंवमंशातानिमत्त।।विरा
टस्यसुतो।।उपेष्टो वीरः शंखोम्मदारयत्।शातशौठंतवत्राणियथार्दं।तमहारथा।।योस्यमानात्यतसंतादेवरूपाःप्रहारिणः।सोप
स्कारशुसुत्त्वुमहासुवमहारथाः।इष्वस्त्रोवनसमन्वान्नाथवद्धानयोजयत्।सूर्यचंद्रवेतीकान्।शारपेदिव्ये दिराप्तमाया।महा
वना।वामस्यस्यछ।उत्थितुशियिपतरवरा।द्वयान्या।वितविधाकारा।श्रबतात्र।हमविन्तु।षिता।।यथास्यूर्द्धनियाम्बराकपिसुसमाया।
जयतात्र्वयमश्वोप्रवीद्राजा।वातानीकंजघन्यजः।कंकवल्लवगोपालादामग्रंथिश्चवीर्यवान्।सुवाहदूरितिमन्नप्रशिर्वनंतेनात्रमं
शयः।एतेषामपिदीयंतारथाध्वजपताकिनः।कवचानिविचित्राणिदृढानिवशृदूनिच।प्रतिमुंचंतुगात्रेषुदीयंतामायुधा
निच।।वीरागरूपाःपुरूषानागराजकरोपमाः।।नेमेजातुनयुद्ध्येरन्निति मेधीयतेमतिः।।एवंश्रुत्वातृपतेर्वाक्यंवृरितमा
नसः।।शतानीकस्तुपार्थेभ्योरथान्राजन्समादिशत्।।सहदेवायसत्यायसदानकुलायच।।तान्प्रहृष्टास्ततःसूतारा
जभक्तिपरायणाः।।निर्दिष्टान्नरदेवेनरथान्शीघ्रमयोजयन्।।कवचानिविचित्राणिमृदूनिचदृढानिच।।विराटःप्रादिशद्या
हानितेषामक्लिष्टकर्मणां।।तान्यामुच्यशरीरेषुदंशितास्तेपरंतपाः।।रथान्हयैःसुसंपन्नानास्थायनरोत्तमाः।। ३८

अनिपन्नानि— हितानि।करंठाग्रखा।निगंडसुखानि।गंहविला।निप्पषां।।विशारदानां।शिराक्रमालानां।।निनीषंतंवापयितुं।।अस्य

निर्ययुर्मुदितापार्थाःशातुमंधावमर्दिनः।।तरस्विनश्छन्नरूपाःसर्वेयुद्धविशारदाः।।विराटमन्वयुःपश्चात्सहिताःकुरुनं
दनाः।।चत्वारोभ्रातरःशूराःपांडवाःसत्यविक्रमाः।।भीमाश्चमत्तमातंगाःप्रभिन्नकरटामुखाः।।क्षरंतइवजीमूताःसुदंताःष
ष्टिहायनाः।।आरूढायुद्धकुशलैःशिक्षितैर्हस्तिसादिभिः।।राजानमन्वयुःपश्चाच्चलंतइवपर्वताः।।विशारदानांमुख्यानांव
रूपानांचानुयायिनां।।अष्टौरथसहस्राणिदशनागशतानिच।।षष्टिश्चाश्वसहस्राणिमत्स्यानांनिर्ययुस्तदा।।तदनीकंविराटस्य
शुशुभेभरतर्षभ।।संप्रयातंतदाराजन्निनीषंतंगवांपदं।।तद्बलाग्र्यंविराटस्यसंप्रस्थितमशोभत।।दृढायुधजनाकीर्णंगजाश्व
रथसंकुलं।। ।।इतिमहाभारतेविराटपर्वणिदक्षिणगोग्रहे।। वैशंपायनउवाच।। निर्यायनगराच्छूराव्यूढानीकाःप्र
हारिणः।।त्रिगर्त्तानस्पृशन्मत्स्याःसूर्येपरिणतेसति।।तेत्रिगर्त्ताश्चमत्स्याश्चसंरब्धायुद्धदुर्मदाः।।अन्योन्यमभिगर्जंतोगोषु
गृद्धामहाबलाः।।भीमाश्चमत्तमातंगास्तोमरांकुशचोदिताः।।ग्रामणीयैःसमारूढाःकुशलैर्हस्तिसादिभिः।।तेषांसमागमो
घोरस्तुमुलोलोमहर्षणः।।घ्नतांपरस्परंघोरयमराष्ट्रविवर्द्धनः।।देवासुरसमोराजन्नासीत्सूर्येविलंबिनि।।पदातिरथना
गेंद्रहयारोहबलौघवान्।।अन्योन्यमभ्यापततांनिघ्नतामितरेतरं।।उदतिष्ठद्रजोभौमंनप्राज्ञायतकिंचन।।पक्षिणश्चापत

शन्पा।।सवंतः।।टंकः।।सस्यहाः।।ग्रामणीयैः।।अश्वानेः।।

सैन्येन सेना सैन्येन। व्यतिसर्पद्भिः अन्योन्यं गच्छद्भिः। व्यतिषक्तानि सम्बद्धानि। पततां गच्छतां। उत्पततां छिद्यतां। दंतोष्ठं रोष्ठं दष्टाधरं स्फु

विराट तदन्तौ सैन्येन रजसा हतं द्युनिवर्त्तिसर्पद्भिरादित्यो तरधीयत। रथ्योति विवसंस्तत्र मंतरिक्षं व्यराजत। रुक्मपृष्ठानि चापानि
व्यतिषक्तानि धन्विनां। पततां लोकवीराणां सव्यदक्षिणमस्यतां। रथा रथैः समाजग्मुः पादाताश्च पदातिभिः। सादिभिः सादिनश्चापि
गजैश्चापि महागजाः। असिभिः पट्टिशैः प्रासैः शक्तिभिस्तोमरैरपि। संरब्धाः समरे राजन्निजघ्नुरितरेतरं। निघ्नंतः समरेऽन्यो-
न्यं शूराः परिघबाहवः। न शेकुरभिसंरब्धाः शूरान्कर्त्तुं पराङ्मुखान्। कॢप्तोत्तरोष्ठं सुनसं कृत्तकेशमलंकृतं। अदृश्य- दंतोनरोष्ठपा
त शिरश्छिन्नं रजोध्वस्तं सकुंडलं। अदृश्यंत तत्र गात्राणि शरैश्छिन्नानि भागशः। शालस्कंधनिकाशानि क्षत्रियाणां महामृधे
। नागभोगनिकाशैश्च बाहुभिश्चंदनोक्षितैः। आस्तीर्णा वसुधा तत्र शिरोभिश्च सकुंडलैः। रथिनो रथिभिश्चात्र संप्र-
हाराण्यवर्त्तत। सादिनां सादिभिश्चैव पदातीनां पदातिभिः। उपाशाम्यद्रजो भौमं रुधिरेण प्रसर्पता। कश्मलं प्राविशद्घोरं निर्मर्या-
दमवर्त्तत। उपाक्रोशन्त हान्योन्यं शरा रिगार्टं प्रवेजिताः। अंतरिक्षे गतिर्येषां दर्शनं चाप्यरुध्यत। ते घ्नंतः समरेऽन्योन्यं शूराः परि-
घबाहवः। न शेकुरभिसंरब्धाः शूरान्कर्त्तुं पराङ्मुखान्। शतानीकः शतं हत्वा विशालाक्षश्चतुःशतं। प्रविष्टौ महतीं सेनां त्रिग-
र्त्तानां महारथौ। तौ प्रविश्य महासेनां बलवंतौ तरस्विनौ। आर्छेतां सुपतिसंरब्धौ केशाकेशि नखानखि। लक्षयित्वा त्रिगर्त्तानां तौ प्रवि- ५०

सकेशं प्रसारितकेशं। कश्मलं मोहः। निर्मर्यादं संकुलं। उपाक्रोशन्न जर्जितवंतः। प्रवेजिताः पीडिता येषां। पक्षिविमानादीनां गतिर्येषां दर्शनमप्य-
वनिरुद्धमतीतमिवाभूत्। अरुध्यतेति पाठः। आर्छेतां प्राप्तवंतौ बाहुसंगबाद्बाहूपाद्दंतं तरं। तौ शतानीकविशालाक्षौ॥

तत्क्षुः त इत्युक्तवंतौ। मत्स्यराजसुशर्म्मणोर्विस्पर्द्धाद्याचिनाव॥ मत्स्यराजसुशर्मणो। पाव. टी०

ष्टौ महारथौ। आर्च्छतां सूर्यदत्तश्च मदिराक्षश्च हन्तः। विराटस्तत्र संग्रामे हत्वा पंचशतं रथान्। हयानां च शतान्यत्र हत्वा पंच महा-
रथः। चरन्स विविधान्मार्गान्रथेन रथयूथपः। त्रिगर्त्तानां सुशर्माणमार्च्छद्रुक्मरथं रणे। तौ व्यवहरतां तत्र महात्मानौ महा-
रथौ। अन्योन्यमभिगर्जंतौ गोष्ठेषु वृषभाविव। ततो राजा त्रिगर्त्तानां सुशर्मा युद्धदुर्म्मदः। मत्स्यं समीयाद्राजानं द्वैरथेन न-
रर्षभः। ततो रथाभ्यां रथिनौ व्यतीयातां समंततः। शरान्व्यसृजतां तूर्णं तोयधारा घना इव। अन्योन्यमभिसंरब्धौ विचेरतुरमर्षिणौ॥
कृतास्त्रौ निशितैर्बाणैरसिशक्तिगदाभृतौ। ततो राजा सुशर्माणं विव्याध दशभिः शरैः। पंचभिः पंचभिश्चास्य विव्याध चतु-
रो हयान्। तथैव मत्स्यराजं च सुशर्मा युद्धदुर्म्मदः। पंचाशता शितैर्बाणैर्विव्याध परमास्त्रवित्। व्यतिष्ठन्वै मुहूर्त्तं ते व्यूढानी-
काः प्रहारिणः। ततोंधकारं प्रणुदन्नुदतिष्ठत चंद्रमाः। कुर्वाणो विमलां रात्रिं नंदयन्क्षत्रियान्युधि। ततः प्रकाशमासाद्य पुनर्युद्धम- नर्षु २
वर्त्तत। घोररूपं ततस्तस्मिन्न्यवेक्षत परस्परं। ततः सुशर्मा त्रैगर्त्तः सह भ्रात्रा यवीयसा। अभ्यद्रवन्मत्स्यराजं रथव्रातेन सर्वशः।
ततो रथाभ्यां प्रस्कंद्य भ्रातरौ क्षत्रियर्षभौ। गदापाणी सुसंरब्धौ समभ्यद्रवतां हयान्। तथैव तस्य तु बलं तानि तानि निकृत्य चान्यान्यो-
न्यमभिद्रवंति। गदासिखड्गैश्च परश्वधैश्च प्रासैश्च तीक्ष्णाग्रसुपीतधारैः। बलं च मत्स्यस्य प्रबलेन राजा स वै त्रिगर्त्ताधिपतिः सु-

विराट

॥ सु ॥

पुत्री

सिन्यमन्योन्यं न ज्ञानीत्त मिलत्वयः सुशर्माणो नद्य जाता विनिपाते । कद्दै रथभंगे केकंधुर्यो रथवाहिनो हताश्वो निहतस्वयं पार्ष्णि

ग्राम्यां । इम च्छजित्वा तरसा समस्य विराटमोजस्विनमभ्यधावत् । ततो राजा त्रिगर्तानां विव्याध दशभिः शरैः । पंचभिः पंच निश्वा

स्य स विव्याध तानाश्वानाश्च तथैव मत्स्यराजानं सुशर्मा युद्धदुर्मदः । पंचाशद्भिः शितैर्बाणैर्विव्याध परमास्त्रवित् । ततो निहत्य

द्युष्कं वीर्य्याविमोचपार्ष्णिसारथी । विरथं मत्स्यराजानं जीवग्राहमगृह्णत । तमुन्मथ्य सुशर्माथ वधुकामिव कामुकः

स्यंदनं स्वं समारोप्य प्रययौ शीघ्रवाहनः । तस्मिन्गृहीते विरथे विराटे बलवत्तरे । प्राद्रवंत भयान्मत्स्यास्त्रिगर्तैरर्दिता भृ

शं । तेषु संत्रास्यमानेषु कौंतेयो युधिष्ठिरः । अभ्यभाषन्महाबाहुं भीमसेनमरिंदमं । मत्स्यराजः परामृष्टस्त्रिगर्तेन सुशर्म्मणा

तं मोचय महाबाहो न गच्छेद्द्विषतां वशं । उषिताः स्म सुखं सर्वे सर्वकामैः सुपूजिताः । भीमसेन त्वया कार्या तस्य वासस्य नि

ष्कृतिः ॥ भीमसेन उवाच ॥ ॥ अहमेनं परित्रास्ये शासनात्तव पार्थिव । पश्य मे सुमहत्कर्म युध्यतः सह शत्रुभि

ः । स्वबाहुबलमाश्रित्य तिष्ठ त्वं भ्रातृभिः सह । एकांतमाश्रिता राजन्पश्य मेऽद्य पराक्रमं । सुस्कंधोयं महावृक्षो गदा

रूप इव स्थितः । एनमेव समारुह्य द्रावयिष्यामि शात्रवान् ॥ वैशंपायन उवाच ॥ तं मत्तमिव मातंगं वीक्षमाणं वनस्पति

मब्रवीद्भ्रातरं वीरं धर्मपुत्रो युधिष्ठिरः । मा भीम साहसं काषीः तिष्ठत्वेष वनस्पतिः । मा त्वां वृक्षेण कर्माणि कुर्वाणमतिमानुषं ॥ ४२

ः२४ गोपः ॥ निष्कृतिः परिशुद्धिः ॥

वृहतेपि पृथुजातस्या ग्राहिणोतरयमलोकमित्यनुशस्यते ।

शत्रवः

समवबुध्येरन्भीमोऽयमिति भारत । अन्यदेवायुधं किंचित्प्रतिपद्यस्व मानुषं । चापं वा यदि वा शक्तिं निस्त्रिंशं वा परश्वधं । यदे

व मानुषं वीर भीमं न वेदन्ये स्वलक्षितं । तदेवायुधमादाय मोक्षयाशु महीपतिं । यमौ च चक्ररक्षौ ते भवितारौ महाबलौ । व्यूह

तः समरे तात मत्स्यराजं परीप्सतः । ततः समस्तास्ते सर्वे तुरगानभ्यचोदयन् । दिव्यमस्त्रं विकुर्वाणास्त्रिगर्तान्प्रत्यमर्षणाः ।

तान्निवृत्तरथान्दृष्ट्वा पांडवान्सा महाचमूः । वैराटी परमक्रुद्धा युयुधे परमाद्भुतं । सहस्रान्न्यवधीत्तत्र कुंतीपुत्रो युधिष्ठिरः

श्या

भीमः सप्तशतान्योधान्परलोकमदर्शयत् । नकुलश्चापि सप्तैव शतानि प्राहिणोच्छरैः । शतानि त्रीणि शूराणां सहदेवः

प्रतापवान् । युधिष्ठिरसमादिष्टो निजघ्ने पुरुषर्षभः । ततस्तेभ्यपतन्नुग्रौ सुशर्माणमुदायुधं । भित्त्वा तां महतीं सेनां त्रिगर्ता

नां महारथाः । ततो युधिष्ठिरो राजा त्वरमाणो महारथः । अविध्यन्त्वनिबयोश्चतुर्भिश्चतुरो हयान् । भीमेनि कृत्य सुशर्माणं रा

रेरभ्यहनद्दृशं । सुसंशर्मापि सुसंरब्धस्त्वरमाणो युधिष्ठिरं । अविध्यन्नवभिर्बाणैश्चतुर्भिश्चतुरो हयान् । ततो राजन्नाशुका

री कुंतीपुत्रो वृकोदरः । समासाद्य सुशर्माणमश्वानस्य व्यपोथयत् । पृष्ठरक्षौ च तस्याथ हत्वा परमसायकैः । अथास्य सारथिं

क्रुद्धो रथोपस्थाद्पातयत् । चक्ररक्षश्च शूरो वै मदिराश्वेति विश्रुतः । समीयाद्विरथं दृष्ट्वा त्रिगर्तं प्राहरद्दृशं । ततो ।

त है

अरथिनासक्तां पुलिना करेण। ममह्रमन्योन्यमिमं च। आहनीमो महाबाहुरिति वचनमब्रवीदिति पाठे निर्वर्णगाईयन्त्या
विराट विराटः शक्तं धरण्यां सुशर्मणः। गदामस्य पराकृष्य तमेवाभ्यहनद्बली। चचार मंडलमार्गांश्चैव पितरुणो यथा। धैवला
यमाने त्रिगर्ते हतानीमो त्यजताथना। अनेन वीर्येण कथं गास्त्वं प्रार्थयसे बलात्। राजपुत्रैर्निववर्त्सेन तमुक्तं ते पलायनं। क
थमात्तु वरां त्यक्त्वा शत्रुमध्ये पलायसे। इत्युक्तः सतु पार्थेन सुशर्मा रथयूथपः। तिष्ठ तिष्ठेति तं भीमं सहसाभ्यद्रवद्बली। भाड
वत्रसीमवक्त्रो जीवितेप्सुः सुशर्मणः। भीमसुतीमथाकाशे रथान्मुक्तं चकर्ष बली। तं भीमसेनोधावंतं पश्यामे वाभ्यद्रवद्बली
त्रिगर्तराजमादातुं सिंहः क्षुद्रमृगं यथा। अभिद्रुत्य सुशर्माणं केशपक्षे परामृशत्। समुद्यम्य तु रोषात्तं निष्पिपेष महीत
ले। पदा मूर्ध्नि महाबाहुः प्राहरद्विलपिष्यतः। तस्य जानौ ददौ जानुं घ्नतश्चैवेन मरत्निना। समोहमगमद्राजा प्रहारवरपीडितः। त
स्मिन्गृहीते विरथे त्रिगर्तानां महारथे। अभज्यत बलं सर्वं त्रैगर्तं तद्भयातुरं। निवर्त्य गास्ततः सर्वाः पांडुपुत्रा महाबला
। अवजित्य सुशर्माणं धनं चादाय सर्वशः। स्वबाहुबलसंपन्ना ह्रीनिषेवा यतव्रताः। विराटस्य महात्मानः परिक्लेशवि
नाशनाः। स्थिताः समक्षं ते सर्वे त्वथ भीमोऽभ्यभाषत। नायं पापसमाचारो मत्तो जीवितुमर्हति। किं नु शक्यं मया कर्तुं यद्रा
जा सततं घृणी। गले गृहीत्वा राजानमानीय विवशं वशं। तत उत्थाय विवेष्टंतं बद्ध्वा पार्थो वृकोदरः। रथमारोपयामास वि ४२

दौ निरथाद्वाहार्षीः मौलौ केशपाशे।

सतासुमध्यतने पुष्प्रमाणाइत्यार्थः श्रयोगात्। प्रमाणमिति वा पाठः। मानेन संमानेन।।

संज्ञयां प्रमुमुक्तिते। अभ्यत्यरणमध्य स्थमभ्यनंदत युधिष्ठिरं। दर्शयामास भीमस्तु तामवस्थां सुशर्मणः। तमुवाच ततोऽभ्ये
क्ष्य भीमं माहवशोभितं। त्रिगर्तं प्रहसन्राजा मुच्यतां विमराधमः।। ।।वैशंपायन उवाच।। ।।एवमुक्तोऽब्रवीद्भीमः सुशर्माणं
महाबलः। जीवितुं चेच्छसे मूढ हेतुं मे वदतः शृणु। दासोऽस्मीति त्वया वाच्यं संसत्सु च सभासु च। एवं ते जीवितं दद्यामेष युद्ध
जितो विधिः। तमुवाच ततो ज्येष्ठो भ्राता सप्रणयं वचः। मुंचेमम धमाचारं प्रमाणं यदि ते वयं। दासभावं गतो ह्येष विराटस्य म
हीपतेः। अदासो गच्छ मुक्तोसि मैवं कार्षीः पुनः क्वचित्। एवमुक्तस्तु सव्रीडः सुशर्मासीदधोमुखः। समुक्तोऽभ्येत्य राजान
मभिवाद्य प्रतस्थिवान्। विराटस्य महात्मानः परिक्लेशविनाशनाः। अवजित्य सुशर्माणं पांडवास्ते हतत्विषः। स्वबाहुबल
संपन्ना ह्रीनिषेवा यतव्रताः। संग्रामशिरसो मध्ये तां रात्रिं सुखिनोऽवसन्। ततो विराटः कौंतेयानतिमानुषविक्रमान्। अर्चया
मास वित्तेन मानेन च महारथान्।। ।।विराट उवाच।। ।।यथैव मम रत्नानि युष्माकं तानि वै तथा। कार्यं कुरुत वै सर्वे यथाका
मं यथासुखं। ददान्यलंकृताः कन्या वसूनि विविधानि च। मनसश्चाप्यभिप्रेतं यद्वः शत्रुनिबर्हणाः। युष्माकं विक्रमेणाद्य
धृति मुक्तोऽस्मि स्वस्तिमानिह। तस्माद्भवंतो मत्स्यानामीश्वराः सर्व एव हि।। ।।वैशंपायन उवाच।। ।।तथाभिवादिनं मत्स्यं कौरवेयाः पृथ

संरंभोऽभवत्कंकः॥ इति दक्षिणगोग्रहः सूर्मः

कथकाः। ऊचुः प्रांजलयः सर्वे युधिष्ठिरपुरोगमाः॥ प्रतिनंदामहे वाक्यं मनोज्ञं मत्स्य भाषसे। अनेनैव च तुष्टाः स्मो यत्त्वं
मुक्तोऽसि शत्रुभिः॥ अथाब्रवीत्प्रीतमना मत्स्यराजो युधिष्ठिरं। पुनरेव महाबाहुर्विराटो राजसत्तमः। एहि त्वामभिषेक्ष्या
मि मत्स्यराजोऽस्तु नो भवान्। मनसश्चाप्यभिप्रेतं यत्ते शत्रुनिबर्हण। तत्तेऽहं संप्रदास्यामि सर्वमर्हति नो भवान्। रत्नानि गाः सुवर्णं च
मणिमुक्तमथापि वा। वैयाघ्रपद्य विप्रेंद्र सर्वथैव नमोऽस्तु ते। त्वत्कृते ह्यद्य पश्यामि राज्यमात्मन एव च। यतश्च जातः सं
रंभः स च शत्रुर्वशं गतः॥ ततो युधिष्ठिरो राजा मत्स्यं पुनरभाषत। प्रतिनंदामि ते वाक्यं मनोज्ञं मत्स्य भाषसे। आनृशंस्यप
रो नित्यं सुसुखी सततं भव। गच्छंतु दूतास्त्वरितं नगरं तव पार्थिव। सुहृदां प्रियमाख्यातुं घोषयंतु च ते जयं। ततस्त
द्वचनान्मत्स्यो दूतान् राजा समादिशत्। आचक्षध्वं पुरं गत्वा संग्रामे विजयं मम। कुमाराः समलंकृत्य पर्यागच्छंतु मे पुरात्
। वादित्राणि च सर्वाणि गणिकाश्च स्वलंकृताः॥ एवमाज्ञां ततः श्रुत्वा राज्ञा मत्स्येन चोदिताः॥ तामाज्ञां शिरसा कृत्वा प्र
स्थिता हृष्टमानसाः॥ ते गत्वा केवलां रात्रिमथ सूर्योदयं प्रति। विराटस्य पुराभ्याशे दूता जयमघोषयन्॥ ॥इति महाभा
रते विराटपर्वणि दक्षिणगोग्रहः॥ ॥वैशंपायन उवाच॥ ॥याते त्रिगर्तान्मत्स्ये तु पशूंस्तान्स्वान्परीप्सति। दुर्योधनः ४३

घोषान्गोपालान्। ओजसा शीघ्रं। हन्यतां हन्यमानानां। इष्वस्त्रे धनुर्वेदे। पाशोऽन्यो बहुशर एव। नतपर्वाणं सुपर्वाणोऽस्याः॥

सहामात्यो विराटमुपयादथ। भीष्मो द्रोणश्च कर्णश्च कृपश्च परमास्त्रवित्। द्रौणिश्च सौबलश्चैव तथा दुःशासनः प्रभु
ः। विविंशतिर्विकर्णश्च चित्रसेनश्च वीर्यवान्। दुःसहो दुर्मुखश्चैव ये चैवान्ये महारथाः। एते मत्स्यानुपागम्य विराटस्य मही
पतेः। घोषान्विद्राव्य तरसा गोधनं जह्रुरोजसा। षष्टिं गवां सहस्राणि कौरवाः कालयंति ते। महता रथवेगेन परिवार्य समंततः।
गोपालानां तु घोषेषु हन्यतां तैर्महारथैः। आरावः सुमहानासीत्संप्रहारे भयंकरे। गवाध्यक्षस्तु संत्रस्तो रथमास्थाय स
त्वरः। जगाम नगरायैव परिक्रोशंस्तदार्तवत्। स प्रविश्य पुरं राज्ञो नृपवेश्माभ्ययात्ततः। अवतीर्य रथात्तूर्णमाख्यातुं प्र
विवेश ह। दृष्ट्वा भूमिंजयं नाम पुत्रं मत्स्यस्य मानिनं। तस्मै तत्सर्वमाचष्ट राष्ट्रस्य पशुकर्षणं। षष्टिं गवां सहस्राणि कुरवः
कालयंति ते। कालयंति ते। तद्विजेतुं समुत्तिष्ठ गोधनं राष्ट्रवर्द्धन। राजपुत्रो ममानुरूपश्च शूरश्चेति कुलोद्वहः। इष्वस्त्रे निपु
णो योधः सदा वीरश्च मे सुतः। तस्य तत्सत्यमेवास्तु मनुजेंद्रस्य भाषितं। हितप्रेप्सुः क्षिप्रं निर्याहि वै स्वयं। त्वां हि मत्स्यो महीपालः शू
न्यपालमिहाकरोत्। त्वया परिषदो मध्ये श्लाघते स नराधिपः। आवर्तय कुरून्जित्वा पशून्पशुमतां वर। निर्दहैषामनीका
नि भीमेन शरवह्निना। धनुश्च्युतै रुक्मपुंखैः शरैः सन्नतपर्वभिः। द्विषतां भिंध्यनीकानि गजानामिव यूथपः। पाशोपधानां ज्या

शरा एवं वर्ग्मो अक्रूरा रस्यां। हत्तव्रताकृतहस्तेन। इति शेषः।

वि० ८ तत्रैषा यहस्तामहास्त्वं। शरवर्षं धिनुर्वीर्यं। शत्रुमध्ये प्रवेदयान्। तेनारलनमेकाशारथेष्वुङ्गं तुनेदयाः। ध्वजोऽस्य सिंहसौवर्णमु
रुयं तु तव प्रभो। रुक्मपेयाः सुनीरुकायाः शुकाहमवतान्तवधा। शरैश्चतुरा राजन्यश्चराजा मात्तुर्विशो धिनः। रणे जित्वा कुरुन्स-
र्वाविजयाणि रिवात्सुरान्। ग्रहो महद्वायत्वं धविशेदं पुरं पुनः। ततो हि राहुस्य यरमागानि मिसयतेस्तुतः। गतिमन्तो तवं व
हमर्वे विषयवासिनः। स्त्रीमध्य उक्तस्तेना। सौ तद्वाक्यमनयं करो। अतः पुरमायमान इदेववचनमब्रवीत्॥ ॥इति विराट
पर्वणि उत्तरगोग्रहे॥ ॥उत्तर उवाच॥ ॥अहं हमत्तु गवेयहेठधचागवायदेय दिमे सारथ्यिः कश्चिद्वेदेस्तेऽश्वशिक्षित
ः। तेत्वोहितनाधिगवामि योमे यत्नान्चेत्तरः। यश्च मे सारथिं क्षिप्रं मम युक्तं प्रयास्यतः। अष्टाविंशतिरात्रं वा मासं वा मास
मावतः। यत्तदासी महद्युद्धं तत्र मे सारथिर्हतः। स लभेयं यदि त्वन्यं हययानविदं नरं। त्वरावान् हयगत्वाहं समुच्छ्रितम
हाध्वजं। विगाह्य तत्परानीकं गजवाजिरथाकुलं। शस्त्रप्रतापनिर्वीर्यान् कुरून् जित्वानये पशून्। दुर्योधनं शान्तन
वं कर्णं विकर्तनं कृपं। द्रोणं च सह पुत्रेण महेष्वासान्समागतान्। वित्रास्य समरे सर्वान्हत्वा नवानि वर्हत्त्रहा। अनेनैव मुहु
र्तेन पुनः प्रत्यानये पशून्। शून्यमासाद्य कुरवः प्रयान्त्यादाय गोधनं। किं तु शक्यं मया कर्तुं यदहं तत्र नाभवं। पश्येयुर ४४

अनवमो ऽहीनः।

द्य मे वीर्यं कुरवस्ते समागताः। किं तु पार्थोऽर्जुनः साक्षादयमस्मान्प्रबाधति॥ ॥वैशंपायन उवाच॥ ॥तस्य तद्वचनं स्त्रीषु भा
षतस्तु पुनः पुनः। नामर्षयत पांचाली बीभत्सोः परिकीर्तनं। अथैनमुपसंगम्य स्त्रीमध्यात्सा तपस्विनी। व्रीडमानेव शनकैरिदं वच
नमब्रवीत्। योऽसौ बृहद्वारणाभो युवा सुप्रियदर्शनः। बृहन्नडेति विख्यातः पार्थस्यासीत्स सारथिः। धनुष्यनवरश्चासीत्तस्य शि
ष्यो महात्मनः। दृष्टपूर्वो मया वीर चरन्त्या पांडवान्प्रति। यदा तत्पावको दावमदहत्खांडवं महत्। अर्जुनस्य तदा तेन संगृहीता ह
योत्तमाः। तेन सारथिना पार्थः सर्वभूतानि सर्वशः। अजयत्खांडवप्रस्थे न हि शंतास्ति तादृशः। येयं कुमारी सुश्रोणी भगिनी ते
तव भाविनी। अस्याः स वीर वचनं करिष्यति न संशयः। यदि वै सारथिः स स्यात्कुरून्सर्वान्न संशयः। जित्वा गाश्च समादाय
ध्रुवमागमनं तव। एवमुक्तः स सैरन्ध्र्या भगिनीं प्रत्यभाषत। गच्छ त्वमनवद्यांगि तामानय बृहन्नलां। सा भ्रात्रा प्रेषिता शी
घ्रमगच्छन्नर्तनागृहं। यत्रास्ते स महाबाहुश्छन्नः सत्रेण पांडवः॥ ॥महाभारते विराटपर्वणि उत्तरगोग्रहे॥ ॥वैशंपायन उ
वाच॥ ॥सा प्राद्रवत्कांचनमाल्यधारिणी ज्येष्ठेन भ्रात्रा प्रहिता यशस्विनी। सुदक्षिणा वेदिविलग्नमध्या सा पद्मपत्राभा
निता शिखंडिनी। तन्वी शुभांगी मणिचित्रमेखला मत्स्यस्य राज्ञो दुहिता श्रिया वृता। तन्नर्तनागारमरालपक्ष्मा शतह्रदा मेघमि

विराट

वाचमब्रवीत्।सा हस्तिहस्तोपमसंहतोरुः स्वनिंदिता रुक्मतीसुमध्या।आसाद्य तं वै वरमाल्यधारिणी पार्थं सुभ्राता नागवधूरिव
द्विपं।सा रत्नभूता मनसः प्रिया दुहिता सुता विराटस्य यथेंद्रलक्ष्मीः।सुदर्शनीया प्रमुखे यशस्विनी प्रीत्याब्रवीदर्जुनमायते-
क्षणा।सुश्रोणि तोरुं कनकोज्वलत्वं पार्थः कुमारीं स तदान्वभाषत।किमागमः कांचनमाल्यधारिणी मृगाक्षि किं त्वरिते तं
वगामिनि।किं ते मुखं सुंदरि न प्रसन्नमाचक्ष्व तत्त्वेन मम शुभांगने॥ ॥वैशंपायन उवाच॥ ॥स तं प्रहृष्टा विशालाक्षी राजपु-
त्री सखीमध्ये तथा।प्रहसन्नब्रवीज्जानुः किमागमनमित्युत।तमब्रवीद्राजपुत्री समुपेत्य नरर्षभं।प्रणयं भावयंतीवशं सखीम-
खीमध्या इदं वचः।गावो राष्ट्रस्य कुरुभिः काल्यंते नो बृहन्नले।तान्विजेतुं मम भ्राता प्रयास्यति धनुर्धरः।न चिरं च हतस्त-
स्य संग्रामे रथसारथिः।तेन नास्ति समः सूतो योऽस्य सारथ्यमाचरेत्।तस्मै प्रयतमानाय सारथ्यर्थं बृहन्नले।आचचक्षे
हयज्ञाने सैरंध्री कौशलं तव।सा सारथ्यं मम भ्रातुः कुरु साधु बृहन्नले।दूरादुत्तरं गावो ह्रियंते कौरवैर्हि नः।अथैतद्व-
चनं मेऽद्य नियुक्ता न करिष्यसि।प्रणयादुच्यमाना त्वं परित्यक्ष्यामि जीवितं।एवमुक्तस्तु सुश्रोण्या तया सख्या परंतपः।जगाम श-
नृपुत्रस्य सकाशममितौजसः।तं सा व्रजंतं त्वरितं प्रभिन्नमिव कुंजरं।अन्वगच्छद्विशालाक्षी शिशुर्गजवधूरिव।दूरादेव तु तं प्रेक्ष्य

तं

४५

नर्मसंयुक्तं प्रहसन्नामुगतेः।कर्तुं सुहृत्प्रियमथोत्तमां कर्तुं सुहृत्प्रियं यदि नर्तितुं विपरीतं पिदधानं विपर्यस्तमिति बाधावः पाचालि

राजपुत्रोऽन्वभाषत।त्वया सारथिना पार्थः खांडवेऽग्निमतर्पयत्।पृथिवीमजयत्कृत्स्नां कुंतीपुत्रो धनंजयः।सैरंध्री त्वां समाचष्ट
सा हि जानाति पांडवान्।संयच्छ मामकानश्वांस्तथैव त्वं बृहन्नले।कुरुभिर्योत्स्यमानस्य गोधनानि परीप्सतः।अर्जुनस्य कि-
लासीः त्वं सारथिर्दयितः पुरा।त्वया जयन्महाबाहुः पृथिवीं पांडवोऽजयत्।एवमुक्ता प्रत्युवाच राजपुत्रं बृहन्नला।का शक्तिर्मे
मम सारथ्यं कर्तुं समरमूर्धनि।गीतं वा यदि वा नृत्यं वादित्रं वा पृथग्विधं।तत्करिष्यामि भद्रं ते सारथ्यं तु कुतो मयि॥ ॥उत्तर उवा-
च॥ ॥गायनो नर्तको वापि वादको वा पुनर्भव।क्षिप्रं मे रथमास्थाय निगृह्णीष्व हयोत्तमान्॥ ॥वैशंपायन उवाच॥ ॥स तत्र
नर्मसंयुक्तमकरोत्पांडवो बहु।उत्तरायाः प्रमुखतः सर्वं जानन्नरिंदमः।ऊर्ध्वमुत्क्षिप्य कवचं शरीरे प्रत्यमुंचत।कुमार्यस्त-
त्र तं दृष्ट्वा प्राहसन्पृथुलोचनाः।स तं दृष्ट्वा विमुह्यंतं स्वयमेवोत्तरस्ततः।कवचेन महार्हेण समनह्यद्बृहन्नलां।स चारु कवचं
पार्थः स्वयमभ्युन्मुच्य तत्।ध्वजं सिंहं रथे युक्त्वा सारथ्ये समकल्पयत्।धनूंषि च महार्हाणि बाणांश्च रुचिरान्बहून्।आदा-
य प्रययौ वीरः स बृहन्नलसारथिः।अथोत्तरा च कन्याश्च सख्यस्तामब्रुवंस्तदा।बृहन्नले आनयेथा वासांसि रुचिराणि वा पं-
चालिकार्थं सूक्ष्माणि चित्राणि विविधानि च।विजित्य संग्रामगतान्भीष्मद्रोणमुखान्कुरून्।एवं ता ब्रुवतीः कन्याः सहिताः पां

कावस्त्रमध्याः स्मृताः कृत्रिमपुत्रिकाः॥

विराट

आलिंगतः स्तुतैः स्तुताश्चवाक् कुरुहहन्ता दृष्टशात इति काकाक्षिवत् दुतयत्र संपुज्यते।

दुनंदनं। इत्युवाच हृष्टमना पार्थो भवद्भुं दत्तिनिःस्वनः॥ ॥बृहन्नलोवाच॥ ॥यद्युत्तरोयं मत्या मे विजिष्यति महारथान् तत्राहरि- श्री
ष्वा मां मितिदिव्यानि रुचिरालि च॥ ॥वैशंपायन उवाच॥ ॥तमुत्तरं वीरपराणां तमसत्वेह बृहन्नलायाः स दितं महानुभेजं। किंच
श्चकन्याश्च द्विजाश्च सुवृताः प्रदक्षिणं चक्रुरथो नरेंद्र। यदृष्ट्वा नत्या सम गामिनः पुरा तत्व सखा सखा उवदाहमंगलं। क्रुरुश्च
मामाद्य रणे बृहन्नले सहोत्तरेणाद्य तदस्तु मंगलं॥ ॥वैशंपायन उवाच॥ ॥एवमुक्ता तु बीभत्सुस्ततः प्रोवाच सुव्यावृत्तकुरु
नभिसुखः रराज्ञानाथ जयताकिनः॥ ॥महाभारते विराटपर्वण्युत्तरगोग्रहे॥ ॥वैशंपायन उवाच॥ ॥मराजधान्यानिर्या
य विराटिः पृथिवीजयः। प्रयातीत्यब्रवीस्तं यत्र ते कुरवो गताः। समरतान्क्रुरुञ्जित्वा जिगीवृच्छि जित्वा विराटे तेषां
समाहाय पुनारण्यामि त्वं पुरं। ततमनोत्रो हृष्यामा समरश्चान्वयां डुनंदनः। तेह यानरथेंद्रेन वो ह्निता वातरंहसः। आलिंगे
तडवाकाश्च न्यकः कांचनमालिनः। नातिदूरम पो गत्वा मत्स्यपुत्रो धनंजयो। अविदेहेता ममित्रघ्नौ कुरूणां बलिनां वरं। लज्जम
श्वानमतितो हृत्वा श्रामसाद कुरुनथा। तस्मी पेत्वाविदेहे तं व्यूढानीकं च सर्वशः। ततः दुनीकं महत्तेषां विवभौ सागरस्वनं।
सर्पमाणमिवाकाशे वनेन कुलपादयं। ददृशो पार्थिवो रणमुक्ते नि तस्मिन सर्पता। हष्टि प्रणा शोत्तत्ता नादिवस्पृश्य रसत्तम॥ ४६

पुरो जातामपतः श्रुश्विताः विज्ञातो श्वश्वगन्त्रा। विज्ञातमस्य श्वगन्त्रस्य। धूर्त्तस्य परिरपता पस्य। मौर्ख्यमहत्त्वानि निवेशंपश्य

तदनीकं महद्दृष्ट्वा गजाश्वरथसंकुलं। कर्णदुर्योधनकृपैर्गुप्तं शांतनवेन च। द्रोणेन च सपुत्रेण महेष्वासेन धीमता। हृ
ष्टरोमा भयोद्विग्नः पार्थं वैराटिरब्रवीत्॥ ॥उत्तर उवाच॥ ॥नोत्सहे कुरुभिर्योद्धुं रोमहर्षं च पश्य मे। बहुप्रवीरमत्युग्रं
देवैरपि दुरासदं। प्रतियोद्धुं न शक्यामि कुरुसैन्यमनंतरं। नाशंसे भारतीं सेनां प्रवेष्टुं भीमकार्मुकां। रथनागाश्वकलि
लां पत्तिध्वजसमाकुलां। दृष्ट्वैव हि परानाजौ मनः प्रव्यथतीव मे। यत्र द्रोणश्च कर्णश्च कृपो भीष्मो विविंशतिः। अश्वत्थामा
विकर्णश्च सोमदत्तोथ बाह्लिकः। दुर्योधनस्तथा वीरो राजा च रथिनां वरः। द्युतिमंतो महेष्वासाः सर्वे युद्धविशारदाः। दृष्ट्वैव
हि कुरूनेतान्व्यूढानीकान्प्रहारिणः। हृषितानि च रोमाणि कश्मलं चागतं मम॥ ॥वैशंपायन उवाच॥ ॥अविजातो वि
मूर्ख्योधूर्त्तस्य पश्यतः। पाठः जातस्य मौर्ख्याद्धूर्तस्य पश्यतः। परिदेवयते मंदः सकाशे सव्यसाचिनः। त्रिगर्तान्मे पिता यातः शून्ये संप्रणिधाय मां। सर्वां
सेनामुपादाय न मे संति हि सैनिकाः। सोहमेको बहून्बालः कृतास्त्रो न कृतश्रमः। प्रतियोद्धुं न शक्यामि निवर्तस्व बृह
न्नले॥ ॥बृहन्नलोवाच॥ ॥भयेन दीनरूपोसि द्विषतां हर्षवर्धनः। न च तावत्कृतं किंचित्परैः कर्म रणाजिरे। स्वयमेव च मामात्थ
वह मां कौरवानिति। सोहं त्वामद्य नेष्यामि यत्रैते बहुला ध्वजाः। मध्यमामिषगृध्राणां कुरूणामाततायिनां। नेष्यामि त्वां महाबा

त्तामंदोश्चनुत्साहः परिदेवयते विलपत्ति। आहउक्तवानसि। नेष्यामि पथिष्यामि। आमिषगृध्राणां उ बाधादानि लाथिणं।

पृथिव्यामित्यधिकरणासम्भ्यानवद्भिन्नोल्लंघ्यते। पृथिवीं वा भित्त्वामित्यर्थः। कामं यथेष्टं॥

हे पृथिव्यामपि युध्यतां। नचास्त्रीषु प्रतिसुत्यो रूपेषु रुषेषु च। कत्थमानोभिनिर्याय किमर्थं न युयुत्ससे। न चेद्धि विजित्य
गास्तास्त्वं गृहान्वै प्रतियास्यसि। प्रहसिष्यन्ति वीर त्वां नरा नार्यश्च संगताः। अहमप्यत्र सैरंध्र्या स्तुतः सारथ्यकर्मणि। न च श
क्ष्याम्यनिर्जित्य गाः प्रयातुं पुरं प्रति। स्तोत्रेण चैव सैरंध्र्यास्तव वाक्येन तेन च। कथं न युध्येयमहं कुरून्सर्वान् स्थिरो भव। न
उत्तर उवाच॥ ॥कामं हरंतु मत्स्यानां भूयांसः कुरवो धनं। प्रहसंतु च मां नार्यो नरा वापि बृहन्नले। संग्रामेण न मे कार्यं गावो ग
च्छंतु चापि मे। शून्यं मे नगरं चापि पितुश्चैव बिभेम्यहं। निवर्तय रथं तूर्णं मा हृदयं मे विदीर्यति॥ ॥वैशंपायन उवाच॥ ॥इत्युक्त्वा
प्राद्रवद्भीतो रथात्प्रस्कंद्य कुंडली। त्यक्त्वा मानं च दर्पं च विसृज्य सशरं धनुः॥ ॥बृहन्नलोवाच॥ ॥नैष पूर्वैः स्मृतो धर्मः क्षत्रि
यस्य पलायनं। श्रेयस्ते मरणं युद्धे न भीतस्य पलायनं॥ ॥वैशंपायन उवाच॥ ॥एवमुक्त्वा तु कौंतेयः सोवप्लुत्य रथोत्त
मात्। तमन्वधावद्धावंतं राजपुत्रं धनंजयः। दीर्घां वेणीं विधुन्वानः साधु रक्ते च वाससी। विधूय वेणीं धावंतमजानंतोऽर्जुनं त
दा। सैनिकाः प्रहसन्केचित्तथारूपमवेक्ष्य तं। तं शीघ्रमभिधावंतं संप्रेक्ष्य कुरवोऽब्रुवन्। क एष वेषप्रच्छन्नो भस्मनेव हुताश
नः॥ किंचिदस्य यथा पुंसः किंचिदस्य यथा स्त्रियाः। सारूप्यमर्जुनस्येव क्लीबरूपं बिभर्ति च। तदेवैतच्छिरोग्रीवं तौ बाहू परि ४३

क्लीबलिंगं निर्लिंगं। उत्तरं संदेहानंतरं ज्ञात्वा विनमर्थे।

घोपमौ। तद्वदेवास्य विक्रांतं नायमन्यो धनंजयात्। अमरेष्विव देवेंद्रो मानुषेषु धनंजयः। एकः कोऽस्मानुपायायान्निवितालोके
धनंजयात्। एकः पुत्रो विराटस्य शून्ये संनिहितः पुरे। स एष किल निर्यातो बालभावाच्च पौरुषात्। सत्रेण नूनं छन्नं हि चरंतं पार्थ
मर्जुनं। उत्तरः सारथिं कृत्वा निर्यातो नगराद्बहिः। स नो मन्ये ध्वजान्दृष्ट्वा भीत एष पलायते। तं नूनमेष धावंतं जिघृक्षति ध
नंजयः॥ ॥वैशंपायन उवाच॥ ॥इति स्म कुरवः सर्वे विमृशंतः पृथक्पृथक्। न च व्यवसितुं किंचिदुत्तरं शक्नुवंति ते। छ
न्नं तथा तं सत्रेण पांडवं प्रेक्ष्य भारत। उत्तरं परिधावंतमभिद्रुत्य धनंजयः। गत्वा पदशतं तूर्णं केशपक्षे परामृशत्। सोर्जुने
न परामृष्टः पर्यदेवयदार्तवत्। बहुलं कृपणं बालो विराटस्य सुतस्तदा॥ ॥उत्तर उवाच॥ ॥शृणु यास्त्वं हि कल्याणि बृह
न्नले सुमध्यमे। निवर्तय रथं शीघ्रं जीवन्भद्राणि पश्यति। शातकुंभस्य शुद्धस्य शतं निष्कान्ददामि ते। मणीनष्टौ च वैडूर्या
न्हेमबद्धान्महाप्रभान्। हेमदंडप्रतिच्छन्नं रथं युक्तं च सुव्रतैः। मत्तांश्च दश मातंगान्मुंच मां त्वं बृहन्नले॥ ॥वैशंपायन उ
वाच॥ ॥एवमादीनि वाक्यानि विलपंतं विचेतसं। प्रहस्य पुरुषव्याघ्रो रथस्यांतिकमानयत्। अथैनमब्रवीत्पार्थो भयार्त
नष्टचेतसं। यदि नोत्सहसे युद्धं कुरुभिः सार्धमाहवे। एहि मे त्वं हयान्यच्छ युध्यमानस्य शत्रुभिः। प्रयाह्येतद्रथानीकं

श्यद्यन्तस्योत्तनवानाः दीनायामुक्तायानादित्तिर्ज्वलितायां॥ यस्याः संयन्ता भ्विचामेविरं।

विराट महाकुबलरक्षितः॥ अथ पृष्ठ्यन्तमं घोरं गुप्तं वीरो महारथः॥ मात्स्यस्य बालपुत्रो यः क्षत्रियोसि परंतप॥ कथं भुक्त्वा कुरूनाई
लग्नबुमध्ये विषीदसि॥ अहं वै कुरुभिर्योत्स्या म्यवजेष्यामि ते पशून्॥ पुविवेश्य तहृष्यानीकमभ्रधृष्यं दुरासदं॥ यद्योनवने
रश्रेष्ठयोश्मेहं कुरूनितिः महायवे ब्रुवाणो वीतस्तुर्विदेश हिमयराजितः॥ ममा श्रुत्वा स्पष्टकुर्वन्तुनो वूरे घ्नत्यपद्युता॥ ततः पुनेशि
वेहं नमकामं तयचीडितं रथमारोपयामास यार्थः धूहरतांवरः॥ ॥इति विराटपर्वणि उत्तरगोग्रहे॥ ॥वैशंपायन उवा
च॥ ॥तेहत्वा स्त्रीचावरोहेणारथसंरथपुंगवः। शमीमभितिष्ठ्यां तेरथमारोप्य चोत्तरं। ती प्रहृष्टाणबुद्धा स्त्रत्र कुरूनां रथस
त्तमाः॥ वित्रस्तमनसः सर्वे धनंजयकृताद्भयात्। तानवेक्ष्य दतो श्याहानुत्यातानति चार्जुनानागुरुः॥ शास्त्रं तांश्चेष्टिनार
ह्वोग्न्यतायत वे ह्यश्ववानाः संवीतिरूक्षाः श्यार्करवर्ष्विणः॥ तस्यवर्मस्वकाशेतरत्समासंत्वतेनतः॥ कुरुवर्षाः॥ श्वजलदा
हश्रुंतेहुनुदर्शनाः॥ निःसरंतिवकोपेस्तः॥ शस्त्राणि विविधानिच। शिवाश्चविनदंत्येताः दीप्तायां दिशिदारुणाः॥ हयाश्चा
श्रूणि मुंचंति ध्वजाः कंपंत्यकल्पिताः॥ यत्तामवेतत्सिपष्ठं माश्वसंमनुयात्तितारुङ्धयमथित्वा स्त्रानेव्यूह्य वाहिनीमिवावि
त्रासंच परीमघरक्षे वायिगोधनं॥ याहस्यान्यत्र रूपाणि हश्यंते बकुलान्यपि॥ र्षवी शेमहे घामः सर्वे शास्त्रं तांवरः॥ भाग ४८
तेः

मरुजौदेवसंघैः॥ विकच्छतेबाधते। कला घोडशीनाशः॥ यलाशितीयत्रबकुलां।

रूजीवचेष्ठपार्थोनात्स्यवसमंजयः॥ पञ्चपार्थी विकांतः सव्यसाचीपरंतपः॥ नाबुर्द्धेन निवर्जेन सार्वैरपि मरुकौशैः॥ के
शिनस्त्रुवने स्परोवासवेनवज्ञिक्रितः॥ अमर्षवशमापन्नो योऽस्मिन्तेनात्र मे शया॥ नेहास्य इति घोरारमहेयसाक्रिकोरवाः॥ महा
देवोपियार्थेनस्पयते युधितोषितः॥ किरातवेषपचवनो गिरौ हिमवति प्रभुः॥ ॥कर्णउवाच॥ ॥सदा भवान्फाल्गुनस्य गु
णैरस्मान्विकच्छतेनचार्जुनः कलाप्रुर्णमिमडुर्योधनस्यवा॥ ॥दुर्योधनउवाच॥ ॥ययेष पार्थो राधेय कृतंकार्यंभ
वेन्मम। ज्ञाताः पुनश्चरिष्यंति द्वादशान्यान्दिवसरान्। अथैष कश्चिदेवान्यः कीववेषेन मानवः। शरैरेनं सुनिशितैः
पातयिष्यामि भूतले॥ ॥वैशंपायन उवाच॥ ॥तस्मिन्ब्रुवति तद्वाक्यं धार्तराष्ट्रे परंतप। भीष्मो द्रोणः कृपो द्रौणिः पौरुषं
तदपूजयन्॥ ॥महाभारते विराटपर्वणि उत्तरगोग्रहे॥ ॥वैशंपायन उवाच॥ ॥तां शमीमुपसंगम्य पार्थो वैराटिम
ब्रवीत्। सुकुमारं समाज्ञाय संग्रामे नातिकोविदं। समादिष्टो मया क्षिप्रं धनूंष्यवहरोत्तर। नेमानि हि त्वदीयानि सोढुं शक्यं
ति मे बलं। भारं वापि गुरुं वोढुं कुंजरं वा प्रमर्दितुं। मम वा बाहुविक्षेपं शत्रूनिह विजेष्यतः। तस्माद्भूमिंजय रोह शमीमेतां
पलाशिनीं। अस्यां हि पांडुपुत्राणां धनूंषि निहितान्युत। युधिष्ठिरस्य भीमस्य बीभत्सोर्यमयोस्तथा। ध्वजाः शराश्च

२१

महामात्रे शुभानने। सुवर्णेन विलसितं विचित्रं। अलं पर्याप्तं आवृत्य हि। आवं हनकमंबंधि।

विराट राणां दिव्यानि कवचानि च। अत्रैव च महावीर्यं धनुः पार्थस्य गांडिवं। एकं शतसहस्रेण संमितं राष्ट्रवर्धनं। व्यायामसहम
त्यर्थं तृणराजसमं महत्। सर्वायुधमहामात्रं शत्रुसंबाधकारकं। सुवर्णविकृतं दिव्यं श्लक्ष्णमायतमव्रणं। अलं भारं गुरुं वोढुं
दारुणं चारुदर्शनं। तादृशान्येव सर्वाणि बलवंति दृढानि च। युधिष्ठिरस्य भीमस्य यमयोश्च तथोत्तर॥ ॥इति विराटपर्वणि गो
ग्रहे॥ ॥उत्तर उवाच॥ ॥अस्मिन्वृक्षे किलोद्बद्धं शरीरमिति नः श्रुतं। तदहं राजपुत्रः सन्स्पृशेयं पाणिना क
थं। नैवंविधं मया युक्तमालब्धुं क्षत्रयोनिना। महता राजपुत्रेण मंत्रयज्ञविदा सता। स्पृष्टवंतं शरीरं मां शववाहमिवाशुचिं
कथमव्यवहार्यं वै कुर्वीथास्त्वं बृहन्नले॥ ॥बृहन्नलोवाच॥ ॥व्यवहार्यश्च राजेंद्र शुचिश्चापि भविष्यसि। धनूंष्येता
नि मा भैस्त्वं शरीरं नात्र विद्यते। दायादं मत्स्यराजस्य कुले जातं मनस्विनं। कथं त्वा निंदितं कर्म कारयेयं नृपात्मज॥ ॥वैशं
पायन उवाच॥ ॥एवमुक्तः स पार्थेन रथात्प्रस्कंद्य कुंडली। आरुरोह शमीवृक्षं विराटस्य सुतस्तदा। तमन्वशासच्छत्रुघ्नो र
थे तिष्ठन्धनंजयः। अवरोपय वृक्षाग्राद्धनूंष्येतानि मा चिरं। परिवेष्टनमेतेषां क्षिप्रं चैव व्यपानुद। सोऽपहत्य महार्हा
णि धनूंषि पृथुरक्षसां। परिवेष्टनपत्राणि विमुच्य समुपानयत्। तथा संनहनान्येषां परिमुच्य समंततः। अपश्यद्गांडिवं ५७

नागिनां सर्पाणां। निपातिता निवेशिताः सहस्रमसंख्याः कोशात्कोशा येषां विहंगा। ग्रहोत्तुष्टिः। विनक्का दिनिर्मिताः। लोमहृ

नव वर्त्तर्निरयतिः सह। तेषां विस्फुरमाणानां धनुषामर्कवद् इसां। विनिष्पेतुः प्रभा दिव्या प्रहाणाश्च द्यौ इवेह। स तेषां रूपमा
लोक्य नागिनामिव श्वसतां। हृष्टरोमा भयोद्विग्नः क्षणेन समपद्यत। संस्पृश्य तानि चापानि भानुमंति बृहंति च। विराटिरर्जुनं रा
जन्निदं वचनमब्रवीत्॥ ॥इति विराटपर्वणि गोग्रहे॥ ॥उत्तर उवाच॥ बिंदवो जातरूपस्य शतं यस्मिन्निपातिताः। स
हस्रकोटिः सौवर्णाः कस्यैतद्धनुरुत्तमं। वारणा यस्य सौवर्णाः पृष्ठे भासंति दंशिताः। सुपार्श्वं सुग्रहं चैव कस्यैतद्धनुरु
त्तमं। तपनीयस्य शुद्धस्य षष्टिर्यस्येंद्रगोपकाः। पृष्ठे विभक्ताः शोभंते कस्यैतद्धनुरुत्तमं। सूर्या यत्र च सौवर्णास्त्रयो भासं
ति दंशिताः। तेजसा प्रज्वलंतो हि कस्यैतद्धनुरुत्तमं। शालभा यत्र सौवर्णास्तपनीयविभूषिताः। सुवर्णमणिचित्रं च कस्यैतद्ध
नुरुत्तमं। इमे च कस्य नाराचाः सहस्रा लोमवाहिनः। समंतात्कलधौताग्रा उपासंगे हिरण्मये। विपाठाः पृथवः कस्य गार्ध्रपत्राः
शिलाशिताः। शरैः वर्णैः सुसमाः पीताः सर्वायसाः शराः। कस्यायमसितश्चापः पंचशार्दूललक्षणः। वराहकर्णव्यामिश्रा
न्धारयते [stain] दश। कस्येमे पृथवो दीर्घाः सर्वपारशवाः शराः। शतानि संति नाराचाः रुधिराशनाः। कस्येमे शुकपत्रा
भाः पूर्वैरर्द्धैः सुवाससः। उत्तरैरायसैः पीतैर्हेमपुंखैः शिलाशितैः॥
दिनः कुंडेन लक्षणयंत्र धेनां यस्याणि येषां असिता वा
पः कलसयुगाः वराहकर्णाः शरविशेषाः। दश दशसंख्याः सर्वपारशवाः सर्वायसाः। नाराचा नाराचजातयः। सुवाससः सुपक्षाः॥

सायकः खड्गः। गव्ये गोचर्ममयि निर्मिते। नैषधो निषधदेशीयः। लोहनखः पांचनखे। गाधस्य चर्मणि निर्मिते। शैक्यो विशुद्धलोहमयः। मार

विरा० ट
७

गुरुभारसहो दिव्यः शात्रवाणां भयंकरः। कस्यायं सायको दीर्घः शिलीपृष्ठः शिलीमुखः। कस्यायम् असितः खड्गः पंचशार्दूललक्षणः
ग। वराहकर्णव्यामिश्रः शरान्धारयते दश। विपाठा कादीर्घे निहतो हेमबिन्दुरुमहांस्तां। फल्गु स्थित्र कोषश्चात्र किं किरणास
य को महाशङ्ख कस्य हेमत्सरुर्दिव्यः खड्गः परमनिर्व्रणः। कस्यायं विमलः खड्गो गव्ये कोशे समर्पितः। हेमत्सरुरनाधृष्यो नैष
धो भारसाधनः। कस्य पंचनखे। कोषे सायको हेमविभूषितः। प्रमाणरूपसंपन्नः पीत आकाशसंनिभः। कस्य हेममये कोषे सुतप्त
पावकप्रभे। निस्त्रिंशोऽयं गुरुः पीतः शैक्यः परमनिर्व्रणः। निर्दिश त्वं यथातत्त्वं मया पृष्टो बृहन्नले। विस्मयो मे परो जातो दृष्ट्वा स
र्वमिदं महत्॥ इति महाभारते विराटपर्वणि उत्तरगोग्रहे॥ बृहन्नलोवाच॥ ॥यन्मां पूर्वमिहापृच्छः शत्रुसेनानिबर्हणं। गांडी
वमेतत्पार्थस्य लोकेषु विदितं धनुः। सर्वायुधमहामात्रं शातकुंभपरिष्कृतं। एतत्तदर्जुनस्यासीद्गांडीवं परमायुधं। यत्त
च्छतसहस्रेण संमितं राष्ट्रवर्धनं। येन देवान्मनुष्यांश्च पार्थो विषहते मृधे। चित्रमुच्चावचैर्वर्णैः श्लक्ष्णमायतमव्र
णं। अधारयच्छक्रो वर्षाणि दुर्गाणि चाष्टनवतिः। देवदानवगंधर्वाः शाश्वतीः समाः। एतद्वर्षसहस्रं तु ब्रह्मा पूर्वमधारयत्। ततोऽन
न्तरमेवाथ प्रजापतिरधारयत्। त्रीणि पंचशतं चैव शक्रोऽशीतिं च पंच च ५७

साधनं क्रियातिशय इत्यर्थः। त्रीणि पंचशतानि अशीतिं पंच चेति शोत्तरं शतानि मित्यर्थः॥

पार्थः पंच च षष्टिं च नराग्रस्थायामिति बोध्यं। अतीतानागतकालज्ञः त्रयंति कवित्वातादसमृगतं। अनिमब्रजन्मांतरमवे
क्षा इव वहि इह अधिगतधनुषो गाय्यद समयपंचदशो वर्षाणीति बंति। ततस्य कंति पयदिनानंतरं भाविनिनार तत्त्व इषो
सोमः पंच शतं राजा तथैव वरुणः शतं। पार्थः पंच च षष्टिं च वर्षाणि श्वेतवाहनः। महावीर्यं महद्दिव्यमेतद्धनुरुत्तमं।
एतन्मामवसंप्राप्तं वरुणाच्चारुदर्शनं। पूजितं सुरमर्त्येषु बिभर्ति परमं वपुः। सुपार्श्वं भीमसेनस्य जातरूपग्रहं धनुः। ये
न पार्थोजयत्कृत्स्नां दिशं प्राचीं परंतपः। इन्द्रगोपकचित्रं च यदेतच्चारुविग्रहं। राज्ञो युधिष्ठिरस्यैतद्वैराटे धनुरुत्तमं। सूर्या य
स्मिंस्तु सौवर्णाः प्रकाशंते प्रकाशिताः। तेजसा प्रज्वलंतो वै नकुलस्यैतदायुधं। शलभा यत्र सौवर्णास्तपनीयविचित्रिताः। ए
तन्माद्रीसुतस्यापि सहदेवस्य कार्मुकं। ये त्विमे क्षुरसंकाशाः सहस्रं लोमवाहिनः। एतेऽर्जुनस्य वैराटे शराः सर्पविषोप
माः। एते ज्वलंतः संग्रामे तेजसा शीघ्रगामिनः। भवंति वीरस्याक्षय्या व्यूहतः समरे रिपून्। ये चेमे पृथवो दीर्घाश्चंद्रबिंबार्ध
दर्शनाः। एते भीमस्य निशिताः रिपुक्षयकराः शराः। हारिद्रवर्णाः ये त्वेते हेमपुंखाः शिलाशिताः। नकुलस्य कलापोऽयं पंच
शार्दूललक्षणः। येनासौ व्यजयत्कृत्स्नां प्रतीचीं दिशमाहवे। कलापो ह्येष तस्यासीन्माद्रीपुत्रस्य धीमतः। ये त्विमे भास्कराकाराः

सर्वे तस्यास्त्रिमन्योर्वधस्य वर्तनीयस्यात्मा तदेव पड्विंशाद्ववर्षाणि पतानि। ततः क्रमेण पंच षष्टि वर्षसंतवः। जातरूपं सुवर्णं
। तन्मयो ग्रहो मुष्टिर्यस्य। सर्पैर्विषमाः सर्पाकाराः। विषोपमाः विषवत्तीव्राः। चंद्रबिंबार्धनिर्दर्शनाः अर्धचंद्राकाराः। कलाप इषु
धिः॥

चित्रक्रियोपेताः विचित्रत्सरुकाः॥ विचित्रकर्मयोग्याश्च। पराकार्य्यं दारयिता। रसपाचकः सूपकारः॥

मर्वपारशवाः शराः। एते चित्रक्रियोपेताः सहदेवस्य धीमतः॥ ये त्विमे निशिताः पीताः पृथवो दीर्घवाससः॥ हेम
पुंखास्त्रिपर्वाणो राजन्नेते महाशराः॥ यस्त्वयं सायको दीर्घः शिलीपृष्ठः शिलीमुखः॥ अर्जुनस्यैव संग्रामे गुरुभा
रसहो दृढः॥ वैयाघ्रकोशस्तु महान्भीमसेनस्य सायकः॥ गुरुभारसहो दिव्यः शात्रवाणां भयंकरः॥ सुफलश्चित्रकोश
श्च हेमत्सरुरनुत्तमः॥ निस्त्रिंशः कौरवस्यैष धर्मराजस्य धीमतः॥ यस्तु पांचनखे कोशे निहितश्चित्रितत्सरुः॥ नकुलस्यैष नि
स्त्रिंशो गुरुभारसहो दृढः॥ यस्त्वयं विपुलः खड्गो गव्ये कोशे समर्पितः॥ सहदेवस्य विद्ध्येनं सर्वभारसहं दृढं॥ ॥म
हाभारते विराटपर्वणि उत्तरगोग्रहे आयुधवर्णनं॥ ॥उत्तर उवाच॥ ॥सुवर्णविकृतानीमान्यायुधानि महात्म
नां॥ रुचिराणि प्रकाशंते पार्थानामाशुकारिणां॥ क्व नु स्विदर्जुनः पार्थः कौरव्यो वा युधिष्ठिरः॥ नकुलः सहदेवश्च भीम
सेनश्च पांडवः॥ सर्व एव महात्मानः सर्वामित्रविनाशनाः॥ राज्यमक्षैः पराकीर्य्य न श्रूयंते क्व ते गताः॥ द्रौपदी क्व च पांचा
ली स्त्रीरत्नमिति विश्रुता॥ जितानक्षैस्तदा कृष्णा तानेवान्वगमद्वनं॥ अर्जुन उवाच॥ ॥अहमस्म्यर्जुनः पार्थः सभास्ता
रो युधिष्ठिरः॥ बल्लवो भीमसेनस्तु पितुस्ते रसपाचकः॥ अश्वबंधोऽथ नकुलः सहदेवस्तु गोकुले॥ सैरंध्रीं द्रौपदीं विद्धि
यत्कृते कीचका हताः॥ ॥उत्तर उवाच॥ ॥ ५१

च

८

केवलाः संबंधाः॥ उत्तराभ्यां पूर्वाभ्यां फल्गुनीभ्यां जातः पूर्वोत्तरफल्गुनीभ्यां जातत्वम्॥ द्वयोरपि हि नाव काश्चिद्विचनं। दृढि

दश नामानि पार्थस्य यानि पूर्वं श्रुतानि मे॥ प्रब्रूयास्तानि यदि मे श्रद्दध्यां सर्वमेव ते॥ अर्जुन उवाच॥ ॥हंत तेऽहं समाचक्षे
दश नामानि यानि मे॥ वैराटे शृणु तानि त्वं यानि पूर्वं श्रुतानि ते॥ एकाग्रमनसा भूत्वा शृणु सर्वं समाहितः॥ अर्जुनः फाल्गुनो जिष्णु
ः किरीटी श्वेतवाहनः॥ बीभत्सुर्विजयः कृष्णः सव्यसाची धनंजयः॥ ॥उत्तर उवाच॥ ॥केनासि विजयो नाम केनासि श्वेतवाहन
ः॥ किरीटी नाम केनासि सव्यसाची कथं भवान्॥ अर्जुनः फाल्गुनो जिष्णुः कृष्णो बीभत्सुरेव च॥ धनंजयश्च केनासि प्रब्रूहि मम तत्व
तः॥ श्रुता मे तस्य वीरस्य केवला नामहेतवः॥ तत्सर्वं यदि मे ब्रूयाः श्रद्दध्यां सर्वमेव ते॥ अर्जुन उवाच॥ ॥सर्वाञ्जनप
दाञ्जित्वा वित्तमादाय केवलं॥ मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनंजयं॥ अभिप्रयामि संग्रामे यदहं युद्धदुर्मदान्॥ नाजित्वा
विनिवर्तामि तेन मां विजयं विदुः॥ श्वेताः कांचनसन्नाहास्पे तिष्ठंति मे हयाः॥ संग्रामे युध्यमानस्य तेनाहं श्वेतवाहनः॥ उत्त रथे
राभ्यां च पूर्वाभ्यां फाल्गुनीभ्यामहं दिवा॥ जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः॥ पुरा शक्रेण मे दत्तं युध्यतो दानवर्षभै
ः॥ किरीटं मूर्ध्नि सूर्याभं तेनाहुर्मां किरीटिनं॥ न कुर्यां कर्म बीभत्सं युध्यमानः कथंचन॥ तेन देवमनुष्येषु बीभत्सुरिति विश्रु
तः॥ उभौ मे दक्षिणौ पाणी गांडीवस्य विकर्षणे॥ तेन देवमनुष्येषु सव्यसाचीति मां विदुः॥ तेनेत्थ॥ पृथिव्यां चतुरंतायां वर्णो मे दु

तो पयुगे साचो वामोपि च सचतेऽयाक्ष यो मम दक्षस्येति सव्यसाची॥

कृष्णावदातस्य शुद्धकृष्णस्य वर्णस्य। आयुधानि निबध्यस्य येन तु स्व॥ ततव॥

वनण

र्नेमो मतः॥ कराग्निकर्म्मिकृल्कं चैतेन माम् अर्जुनं विदुः॥ अहं दुरापो दुर्धर्षो दमनः पाकशासनिः॥ तेन देवमनुष्येषु जिष्णुनामास्मि

विश्रुतः॥ कृष्ण इत्येव दशमं नाम चक्रे पिता मम॥ कृष्णावदातस्य सदा प्रियत्वाद्बालकस्य वै॥ ॥वैशंपायन उवाच॥ ततः पार्थं स

वैराटिरभ्यवादयत्समुपेतिकात्॥ अहं द्व भूमिंजयो नाम्ना नाम्नाहमपि चोत्तरः॥ दिष्ट्या त्वां पार्थ पश्यामि स्वागतं ते धनंजय॥ लोहिताक्ष महा तं

वाहो नागराजकरोपम॥ यदज्ञानादवोचं त्वां क्षंतुमर्हसि तन्मम॥ यतस्त्वया कृतं पूर्वं विचित्रं कर्म दुष्करं॥ ततो भयं व्यतीतं

मे प्रीतिश्च परमा त्वयि॥ महाभारते विराटपर्वण्युत्तरगोग्रहे॥ ॥उत्तर उवाच॥ आस्थाय विपुलं वीर रथं सारथिना म

या। कतमं यास्यसेऽनीकमुक्तो यास्याम्यहं त्वया॥ अर्जुन उवाच॥ प्रीतोस्मि पुरुषव्याघ्र न भयं विद्यते तव। सर्वान्नुदामि ते श

त्रून् रणे रणविशारद। स्वस्थो भव महाबुद्धे पश्य मां शत्रुभिः सह। युध्यमानं विमर्देस्मिन् कुर्वाणं भैरवं महत्। एतान्सर्वानुपासं

गान् क्षिप्रमादत्स्व मे रथे। एतं चाहर निस्त्रिंशं जातरूपपरिष्कृतं॥ ॥वैशंपायन उवाच॥ ॥अर्जुनस्य वचः श्रुत्वा त्व

रावानुत्तरस्तदा॥ अर्जुनस्यायुधान्सर्वान् रथे शीघ्रमुपाहरत॥ ॥अर्जुन उवाच॥ ॥अहं वै कुरुभिर्योत्स्या

म्यवजेष्यामि ते पशून्॥ संकल्पपक्षविक्षेपं बाहुप्राकारतोरणं॥ त्रिदंडधनुसंबाधमनेकध्वजसंकुलं। ५२

रथोपस्थेन क्रोडेन। परं न विष्यतीत्यत्रयः॥ तामव निरूपयति। संकल्पेन मनोरथेनैव पक्षविक्षेपः खंडनं यत्र। बाहुरेव प्रा

ज्याक्षेपणं क्रोधकृतं नेमीनिनददुंदुभि। नगरं ते मया गुप्तं रथोपस्थं भविष्यति। अधिष्ठितो मया संख्ये रथो गांडीवधन्वना।

अजय्यः शत्रुसैन्यानां वैराटे व्येतु ते भयं॥ उत्तर उवाच॥ बिभेमि नाहमेतेषां जानामि त्वां स्थिरं युधि॥ केशवेनापि सं

ग्रामे साक्षादिंद्रेण वा समं॥ इदं तु चिंतयन्नेव परिमुह्यामि केवलं। निश्चयं चापि दुर्मेधा न गच्छामि कथंचन। एवं युक्तांग

रूपस्य लक्षणैः सूचितस्य च। केन कर्मविपाकेन क्लीबत्वमिदमागतं। मन्ये त्वां क्लीबवेषेण चरंतं शूलपाणिनं। गंधर्वराजप्र

तिमं देवं वापि शतक्रतुं॥ अर्जुन उवाच॥ ॥भ्रातुर्नियोगाज्ज्येष्ठस्य संवत्सरमिदं व्रतं। चरामि ब्रह्मचर्यं वै सत्यमेतद्ब्र

वीमि ते। नास्मि क्लीबो महाबाहो परमं धर्मसंयुतः॥ समाप्तव्रतमुत्तीर्णं विद्धि मां त्वं नृपात्मज॥ उत्तर उवाच॥ परमोनुग्रहो मेद्य वास

हितर्को न मे वृथा॥ न हीदृशाः क्लीबरूपा भवंति तु नरोत्तमाः॥ सहायवानस्मि रणे युध्येयममरैरपि। साध्वसं तत्प्रणष्टं मे। किं करोमि

ब्रवीहि मा॥ अहं ते संग्रहीष्यामि रथं शत्रुरथारुजः॥ शिक्षितो ह्यस्मि सारथ्ये तीर्थतः पुरुषर्षभ। दारुको वासुदेवस्य यथा

शक्रस्य मातलिः॥ तथा मां विद्धि सारथ्ये शिक्षितं नरपुंगव। यस्य याते न पश्यंति भूमौ प्राप्तं पदं पदं॥

कारास्वर्णनयत्र। त्रिदंडं च त्रिवेणुः॥ ज्याक्षेपणं च विक्षेपो यत्र। क्रोधकृतं क्रोधमयं। नेमीचक्रतिस्तस्य निनद एव दुंदुभयो यत्र।

प्रस्थानके कार्यविशारदः तीर्थतो गुरोः॥ यातं गतं॥

धुरमग्निमं तारं। पाक्षिपिस्थाशागं। क्वचित्तोद्यतः शोत्तनो इयमः। निर्मुच्यावतान्यो हंडनयो रिवसनन्नादोपचयाः। तले।

व२० दक्षिणं यो धुरं युक्तः सुग्रीवसदृशो हयः। योयं धुरं धुर्यवरो वामं वहति शोभनः। तं मन्ये मेघपुष्पस्य जवेन सदृ
शो हयं। योयं काञ्चनसन्नाहः पार्ष्णिं वहति शोभनः। समं शैब्यस्य तं मन्ये जवेन बलवत्तरं। योयं वहति मे पार्ष्णिं दक्षि
वि णामभितः स्थितः। बलाहकादपि मतः स जवे वीर्यवत्तरः। त्वामेवायं रथो वोढुं संग्रामेर्हति धन्विनं। त्वं चेमं रथमास्थाय योद्धु
मर्हो मतो मम॥ वैशंपायन उवाच॥ ततो निर्मुच्य बाहुभ्यां वलयानि स वीर्यवान्। चित्रे दुन्दुभिसन्नादे प्रत्यमुञ्चत तले शु
भे। कृष्णान्भंगीमतः केशान्श्वेतेनोद्ग्रथ्य वाससा। अथासौ प्राङ्मुखो भूत्वा शुचिः प्रयतमानसः। अभिदध्यौ महाबाहुः सर्वा
स्त्राणि रथोत्तमे। ऊचुश्च पार्थं सर्वाणि प्राञ्जलीनि नृपात्मजं। इमे स्म परमोदाराः किं भानि
कराः पाण्डुनन्दन। प्रणिपत्य ततः पार्थः समालभ्य च पाणिना। सर्वाणि मानसानीह भवतेत्यभ्यभाषत। प्रतिगृह्य ततोस्त्राणि प्र
हृष्टवदनोभवत्। अधिज्यं तरसा कृत्वा गाण्डीवं व्याक्षिपद्धनुः। तस्य व्याक्षिप्यमानस्य धनुषोभून्महास्वनः। यथा शैलस्य म
हतः शैलेनैवाभिजघ्नुषः। स निर्घाताभवद्भूमिर्दिक्षु वायुर्ववौ भृशं। पपात महती चोल्का दिशो न प्रचकाशिरे। भ्रान्तध्वजं खं तदा च
सीत्प्रकंपितमहाद्रुमं। तं शब्दं कुरवोजानन्विस्फोटमशनेरिव। यदर्जुनो धनुःश्रेष्ठं बाहुभ्यामाक्षिपद्रथे॥ उत्तर उवाच॥ ५३

ज्याघातवारणोपल्यमुचत्। पिनद्धवान्। नेमिमतः कुटिलाच॥

सयावकः। सोयासंगः — — स्वान् यथावद्धुवमित्यनुश्रुते।

एकस्त्वं पाण्डवश्रेष्ठ बहूनेतान्महारथान्। कथं जेष्यसि संग्रामे सर्वशस्त्रास्त्रपारगान्। असहायोसि कौन्तेय ससहायाश्च कौरवाः।
अत एव महाबाहो भीतस्तिष्ठामि तेग्रतः॥ ॥वैशंपायन उवाच॥ ॥उवाच पार्थो मा भैषीः प्रहस्य स्वनवत्तदा। युध्यमानस्य मे वी
र धार्तराष्ट्रैर्महाबलैः। महाघोषे घोषयात्रायां कस्तदासीत्सखा मम। तथा प्रतिभये तस्मिन्देवदानवसंकुले। खाण्डवे युध्यमानस्य
कस्तदासीत्सहायवान्। निवातकवचैः सार्धं पौलोमैश्च महाबलैः। युध्यतो देवराजार्थे कः सहायस्तदाभवत्। स्वयंवरे तु पां
चाल्या राजभिः सह संयुगे। युध्यतो बहुभिस्तात कः सहायस्तदाभवत्। उपजीव्य गुरुं द्रोणं शक्रं वैश्रवणं यमं। वरुणं पावकं
चैव कृपं कृष्णं च माधवं। पिनाकपाणिनं चैव कस्मादेतान्न योधये। रथं वाहय शीघ्रं मे व्येतु ते मानसो ज्वरः॥ ॥महा
भारते विराटपर्वणि उत्तरगोग्रहे॥ ॥वैशंपायन उवाच॥ ॥उत्तरं सारथिं कृत्वा शमीं कृत्वा प्रदक्षिणं। आयुधं सर्वमादाय
८ त्त्रोद्दृणां पांडुनंदनः। ध्वजं सिंहं रथात्तस्मादपनीय महारथः। प्रणिधाय शमीमूले प्रायादुत्तरसारथिः। दैवीं मायां रथे युक्त्वा वि
हितां विश्वकर्मणा। काञ्चनं सिंहशार्दूलं ध्वजं वानरलक्षणं। मनसा चिन्तयामास प्रसादं पावकस्य च। स च तच्चिन्तितं ज्ञात्वा ध्व
जे भूतान्यचोदयत्। सपताकं विचित्राङ्गं सोपासङ्गं हिरण्मयं। स्वान्पार्थरथं तूर्णं दिव्यरूपं मनोरमं। अथार्यतं तं हृष्ट्वा द

त च

ध्वजं रथे प्रत्यागते दृष्ट्वा प्रदक्षिणमकरोदित्यन्वयः॥ संस्थाप्य स्थिरीकृत्य।

विराट

क्षिणं प्राकरोत्तदा॥ रथमास्थाय बीभत्सुः कौन्तेयः श्वेतवाहनः॥ बद्धगोधांगुलित्राणः प्रगृहीतशरासनः॥ ततः प्रायादुदीचीं
मकपिप्रवरकेतनः॥ स्वनवंतं महाशंखं बलवानरिमर्दनः॥ प्राधमद्बलमास्थाय द्विषतां लोमहर्षणं॥ ततस्ते जवना धुर्या
जानुभ्यामगमन्महीं॥ उत्तरश्चापि संत्रस्तो रथोपस्थ उपाविशत्॥ संस्थाप्य चाश्वान्कौन्तेयः समुद्यम्य च रश्मिभिः॥ उत्तरं च प
रिष्वज्य समाश्वासयदर्जुनः॥ ॥अर्जुन उवाच॥ ॥मा भैस्त्वं राजपुत्राग्र्य क्षत्रियोसि परंतप॥ कथं पुरुषशार्दूल शत्रुमध्ये वि
षीदसि॥ श्रुतास्ते शंखशब्दाश्च भेरीशब्दाश्च पुष्कलाः॥ कुंजराणां च नदतां व्यूढानीकेषु तिष्ठतां॥ स त्वं कथमिहानेन शंखश
ब्देन भीषितः॥ विषण्णरूपो वित्रस्तः पुरुषः प्राकृतो यथा॥ ॥उत्तर उवाच॥ ॥श्रुता मे शंखशब्दाश्च भेरीशब्दाश्च पुष्कलाः॥
कुंजराणां च नदतां व्यूढानीकेषु तिष्ठतां॥ ८ नैवंविधः शंखशब्दः पुरा जातु मया श्रुतः॥ ध्वजस्य चापि रूपं मे दृष्टपूर्वं न ही
दृशं॥ धनुषश्चापि निर्घोषः श्रुतपूर्वो न मे क्वचित्॥ अस्य शंखस्य शब्देन धनुषो निःस्वनेन च॥ अमानुषेण शब्देन भूतानां
ध्वजवासिनां॥ रथस्य च निनादेन मनो मुह्यति मे भृशं॥ व्याकुलाश्च दिशः सर्वा हृदयं व्यथतीव मे॥ ध्वजेनापिहिताः सर्वा
दिशो न प्रतिभांति मे॥ गांडीवस्य च शब्देन कर्णौ मे बधिरीकृतौ॥ ॥अर्जुन उवाच॥ ॥एकांते रथमास्थाय पद्भ्यां ५४

इत्यादिस्वाशायां दिशि॥ शकुनाः पक्षिणः॥ नोस्माकं॥ ७

त्वमवपीडय॥ दृढं च रश्मीन्संयच्छ शंखं ध्मास्याम्यहं पुनः॥ ॥वैशंपायन उवाच॥ ततः शंखमुपाध्मासीद्दारयन्निव पर्वतान्॥ दि
षतां डः स्वजनकं सुहृदां हर्षवर्द्धनं॥ गुहा गिरीणां च तदा दिशः शैलांस्तथैव च॥ उत्तरश्चापि संलीनो रथोपस्थ उपाविशत्॥ त
स्य शंखस्य शब्देन रथनेमिस्वनेन च॥ गांडीवस्य च शब्देन पृथिवी समकंपत॥ तं समाश्वासयामास पुनरेव धनंजयः॥ द्रोण उवाच॥
यथा रथस्य निर्घोषो यथा मेघ उदीर्यते॥ चकंपे च यथा भूमिर्नैषोन्यः सव्यसाचिनः॥ शस्त्राणि न प्रकाशंते न प्रहृष्यंति वाजिनः॥ अग्न
यश्च न भासंते समिद्धास्तन्न शोभनं॥ प्रत्यादित्यं च नः सर्वे मृगा घोरप्रवादिनः॥ ध्वजेषु च निलीयंते वायसास्तन्न शोभनं॥ शकुनाश्चापि स
व्या नो वेदयंति महद्भयं॥ गोमायुरेष सेनाया रुवन्मध्येऽप्रधावति॥ अनाहतश्च निष्क्रांतो महद्वेदयते भयं॥ भवतो रोमकूपाणि प्रहृष्टा
न्युपलक्षये॥ ध्रुवं विनाशो युद्धेन क्षत्रियाणां प्रदृश्यते॥ ज्योतींषि न प्रकाशंते दारुणा मृगपक्षिणः॥ उत्पाता विविधा घोरा
दृश्यंते क्षत्रनाशनाः॥ विशेषत इहास्माकं निमित्तानि विनाशने॥ उल्काभिश्च प्रदीप्ताभिर्बाध्यते पृतना तव॥ वाहनान्यप्र
हृष्टानि रुदंतीव विशांपते॥ उपासते च सैन्यानि गृध्रास्तव समंततः॥ तप्स्यसे वाहिनीं दृष्ट्वा पार्थबाणप्रपीडितां॥ पराभूता
च नः सेना न कश्चिद्योद्धुमिच्छति॥ विवर्णमुखभूयिष्ठाः सर्वे योधा विचेतसः॥ गाः संप्रस्थाप्य तिष्ठामो व्यूढानीकाः प्रहारिणः॥

तमर्थं। वनक्षिति सर्वेशावय।। अर्थानां कार्याणां। उत्तरं वेरावि।। अभिसंधाय उत्तरोध्मय। वा नियमाह।।

विराट महाभारते विराटपर्वणि एकुनरगोयदे।। वैशंपायन उवाच।। ।। अथ दुर्योधनो राजा समरे भीष्ममब्रवीत्।। द्रोणं च
रथश्रेष्ठं ईलेकृपं च सुमहारथं। उक्तो यमर्थं आचार्य्यो मया कर्णेन चासकृत्। पुनरेव च वक्ष्यामि न हि तृप्यामि तं ब्रुवन्। परा
जितैर्हि वस्तव्यं तैर्द्वादश समा वने। एकं जनपदे ज्ञातैरेष समयः कृतः।। तेषां न तावन्निर्वृत्तं वर्त्तते हि त्रयोदशं। अज्ञात
वासं बीभत्सुरथास्माभिः समागतः। अनिवृत्ते निवासे यदि बीभत्सुरागतः। पुनर्द्वादश वर्षाणि वने वत्स्यंति पांडवाः।। लो
भाद्वा ते न जानीयुरस्मान्वा मोह आविशत्। हीनातिरिक्तमेतेषां भीष्मो वेदितुमर्हति। अर्थानां च पुनर्द्वैधे नित्यं भवति संश
यः। अन्यथा चिंतितो ह्यर्थः पुनर्भवति चान्यथा।। स्वार्थे सर्वे विमुह्यंति येपि धर्मविदो जनाः।। उत्तरं मार्गमाणानां मत्स्यमेतं यु
युत्सतां। यदि बीभत्सुरायातस्तेन स्याकस्यापरो द्युमः। त्रिगर्त्तानां वयं हेतोर्मत्स्यान्योद्धुमिहागताः। मत्स्यानां विप्रकारांस्ते बहून्
नस्मानकीर्त्तयन्। ते भयेनाभिपन्नानां तदस्माभिः प्रतिश्रुतं। प्रथमं तैर्ग्रहीतव्यं मत्स्यानां गोधनं महत्। सप्तमीमपराह्णे वै तथा च ५५
तैः समाहितं। अष्टमी पुनरस्माभिरादित्यस्योदयं प्रति। इमा गावो ग्रहीतव्या गते मत्स्ये गवां पदे। ते वा गावः समानेष्यंति यदि वा ते पराजिता
।। अस्मान्वाप्यतिसंधाय कुर्युर्मत्स्येन संगतं।। अ

अनतिवाह्य राजा वै वै त्यर्थः।। आम्नायतः प्रणिधीयतां। अभिन्ने च व्यावर्जितान्। नराणां नामयिषि प्रविहातां। पुनः स्थित्वा अना
भवानानु पायानो मत्स्यो जानपदैः सह। सर्वया सेनया सार्द्धं संवृतो भीमरूपया। आयाह्य केवलां रात्रिमस्मान्योद्धुमुपागतः
तेषामेव महावीर्यः कश्चिदेव पुरःसरः। अस्मान्जेतुमिहायातो मत्स्यो वापि स्वयं नवेत्। यद्येष राजा मत्स्यानां यदि बीभत्सुराग
तः। सर्वैर्योद्धव्यमस्माभिरिति नः समयः कृतः। अथ कस्मात्स्थिता ह्येते रथेषु नरसत्तमाः। भीष्मो द्रोणः कृपश्चैव विकर्णो द्रौणि
रेव च। संभ्रांतमनसः सर्वे काले ह्यस्मिन्महारथाः। नान्यत्र युद्धाच्छ्रेयोस्ति तथात्मा प्रणिधीयतां। आच्छिन्ने गोधने स्माकमपि दे
वेन वज्रिणा। यमेन वापि संग्रामे को हास्तिनपुरं व्रजेत्। शरैरभिप्रणुन्नानां भग्नानां गहने वने। को हि जीवेत्पदातीनां भ वे
वेदृत्थं प्रसंशयः। आचार्यं पृष्ठतः कृत्वा तथानीतिर्विधीयतां। जानाति हि मतं तेषामतस्त्रासयतीव नः। अर्जुने चास्य संप्रीति
मधिकामुपलक्षये। तथाहि दृष्ट्वा बीभत्सुमुपायांतं प्रशंसति। यथा न विभ्रमेत्सेना तथा नीतिर्विधीयतां। हेषितं ह्युपशृण्व
त्या नद्योगे सर्वविध्वस्तितं। अदेशिका महारण्ये ग्रीष्मे शत्रुवशं गताः।। यथा न विभ्रमेत्सेना तथा नीतिर्विधीयतां। अश्वानां हे एवा
षितं श्रुत्वा कः प्रशंसा भवेत्परे। स्थाने वापि व्रजंतो वा सदा हेषंति वाजिनः। सदा च वायवो वांति नित्यं वर्षति वासवः। स्तन
यित्नोश्च निर्घोषः श्रूयते बहुशस्तथा। किमत्र कार्यं पार्थस्य कथं वा स प्रशस्यते। अन्यत्र कामाद्द्वेषाद्वा रोषाद्वास्मासु केवला
ग्रद्रि तो पार्थस्य
त्।
हत्या। हेष्यितमवस्थनं। विषाद्दृटिते विपरीतं। अदेशिका मार्गितिसहीनाः

उपासनं त्वा गान्या मनु॥ मंत्रकाले हि स्यात्॥ ममादितः म वतिरः॥ अवरोहानः॥

विराट

आचार्य्यो विकर्णोऽकः प्राज्ञा आम्नायदर्शिनः। तेन महान पेप्रासे मंस्थत्याः कथं स्वनाऽऽमा देशु विविधि त्रुगो द्रा क्षपा
सनेषु च। कथ्या दि विन्नाः कवाणाः पंडितास्तत्र शोभनाः। बहुन्याश्चर्यरूपाणि कर्वतो जनमं म दि। इष्टस्तेचा वैसंध्रते पंडि
तास्तत्र शोभनाः। एरषां विवरज्ञा ते मनुष्यचरितेषु च। अत्र संस्कारदा पशु पंडितास्तत्र शोभनाः। पंडिताः इष्टकमः स्वो
यरषां सुराणां दिनः। विधीयतां तथा नीतिर्यथा वध्येतवेपरः। गावश्चैव प्रतिष्ठंतां सेना व्यूहं तु मा चिरं। आरक्षाश्च विधी
यंतां यत्रायास्यामः परान्॥ विराटपर्वण्युत्तरगोयदे॥ कर्ण उवाच॥ सर्वानायुष्मतो भीतान् संत्रस्तानिव लक्षये। अयु
द्धमनसः सर्वेधनं जमकुतोऽद्यात्॥ यद्येष राजा मत्स्यानां यदि वीभत्सुरागतः। अहमावारयिष्यामि वेलेव मकरालयं। ममचापप्र
मुक्तानां शराणां नतपर्वणां। नाहं निगृहितामस्ति मध्यागामिव मप्यति। रुक्मपुंखाः सुतीक्ष्णाग्रा मुक्ता हस्तवतां मया। वादय
तु शराः पार्थं शलभाइव पादपं। शराणां पुंखसक्तानां मौर्व्याभिहतया दृढं। श्रूयतां तलयोः शब्दो भेर्योराहतयोरिव। समाहि
तो हि वीभत्सुर्वर्षाण्यष्टौ च पंच च। जातस्नेहश्च युद्धस्य मयि संप्रहरिष्यति। पात्रीभूतश्च कौन्तेयो ब्राह्मणो गुणवानिव। शरौघा ५६
न्प्रतिगृह्णातु मयोत्सृष्टान्सहस्रशः। एषचैव महेष्वासस्त्रिषु लोकेषु विश्रुतः। अहं चापि कुरुश्रेष्ठादर्जुनान्नावरः क्वचित्॥ ॥

- मुक्ता १

गार्द्धवाजितैः प्रपश्य पत्रामि दितिः। अंतरामद्ये। वाप्ति कार्य्यतामि तत्र सवस्थितानां। आचितं नाश्चर्यितं। सुतेजातैः सुसृष्टधारैः। अद्य

इतस्य तस्य निशितैः कांचन गार्द्धवाजितैः। रूपतामद्य विव्योमशलभैरिव संवृतं। तस्मादद्य हरामस्य युद्धवावाप ति
ष्ठुतं। अद्य दारापस्य दास्यामि निदत्त्य समारब्धं। अंतरा विद्यमानानां पुंखानां व्यलिकार्य्यतां। शलभानामिवाकाशे प्रचारः संप्रह
श्यतां। इंद्राशनिसमस्पर्शं महेंद्रसमतेजसं। अर्दयिष्याम्यहं पार्थमुल्काभिरिव कुंजरं। तमग्निमिव दुर्धर्षमसिशक्तिशरेंधनं। पां
६। वाग्निमहं हंतुं संप्रदहंतमिवाहितं। अश्ववेगपुरोवातो रथौघस्तनयित्नुमान्। शरधारामहामेघः शमयिष्यामि पांडवाग्निं कार्ष्णि
कविनिर्मुक्ताः पार्थमाशीविषोपमाः। शरासमभि सर्पंतां वल्मीकमिव पन्नगाः। सुतेजनै रुक्मपुंखैः सुपीतैर्नतपर्वभिः। आ
चितं पश्यं कौन्तेयं कर्णिकारैरिवाचलं। जामदग्न्यान्मया ह्यस्त्रं यत्प्राप्तमृषिसत्तमात्। तदुपाश्रित्य वीर्यं च युध्येयममरैरपि। ध्वजाग्रे रै
वानरस्तिष्ठन्हतो निहतो मया। आद्य वपतनां भूमौ वितनन्नरवान्नवान्। शत्रोर्मया विनिर्भिन्नानां भूतानां ध्वजवासिनां। दिक्षु शब्द
मागानामस्त्रैरा शोदिवं गमः। अद्य दुर्योधनस्याहं शल्यं हृदि चिरस्थितं। समूलमुद्धरिष्यामि वीभत्सुं पातयन्रथात्। हताश्वं वि
रथं पार्थं पौरुषे पर्यवस्थितं। निश्वसंतं यथा नागमद्य पश्यंतु कौरवाः। कामं गच्छंतु कुरवो धनमादाय केवलं। रथेषु वापि तिष्ठंतो
युद्धं पश्यंतु मामकं॥ ॥विराटपर्वण्युत्तरगोग्रहे कर्णस्याभिगर्जनं॥

अनिपन्नानां परान्हतानां॥ ॥व॥ ॥

अर्थानां धनानां प्रकृतिसंग्रहणं।नार्थानामिति पाठेऽर्थानां प्रयोजनानां प्रयोजकानां प्रकृतिस्थानां एवं मंत्रायमेवाऽस्तु त्वं धर्मोत्तरकालिकं
फलं आउद्धल्पेन प्रतिबोधन। अंतरं साम द्विषस्मात्। रसंप्रत्यकारस्य वदकैः न त्वयवस्य तिरथकाद्धि रथ निर्मातामयि दोरात्वेन त

विराट

अर्थता
क्रूपउवाच॥ ॥सदैव तव राधेय युद्धे क्रूरतरा मतिः।आत्मानं प्रकृतिं वेत्सि नानुबंधमवेक्षसे।तथा हि बहवः संति शास्त्राण्येषा। ॥आत्मानं पाव
चिंत्यानि चिंतितानि।तेषां युद्धं पापिष्ठं वदंति पुराविदः।देशकालेन संयुक्तं युद्धं विजयदं भवेत्।हीनकालं तदेवेह फलवन्न नार्थीनां पाव॥
भवत्युत।देशकाले च विक्रांतं कल्याणाय विधीयते।आनुकूल्येन कार्याणामंतरं संविधीयते।भावं हि रथकारस्य न व्यवस्यंति प
तितं डिताः।परिचिंत्य तु पार्थेन संनिपातो न नः क्षमः।एकः कुरूननुप्राप्तो रक्षन्नग्निमतर्पयत्।एकश्च पंच वर्षाणि ब्रह्मचर्यमधारय
त्।एकः सुभद्रामारोप्य द्वैरथे कृष्णमाह्वयत्।एकः किरातरूपेण स्थितं रुद्रमयोधयत्।अस्मिन्नेव वने कृष्णां हृतामभ्यजयत्।एक
स्तु पंच वर्षाणि शक्रादस्त्राण्यशिक्षत।एकः सोऽयमरीन् जित्वा कुरूणामकरोद्यशः।एको गंधर्वराजानं चित्रसेनमरिंदमः।विजिग्ये तरसा संख्ये
सैन्यं चास्य सुदुर्जयम्।तथा निवातकवचाः कालखंजाश्च दानवाः।दैवतैरप्यवध्यास्ते एकेन युधि पातिताः।एकेनापि कृता कर्ण किं त्वया
मेव कर्मणा।एकेन हि पृथ्वी तेन भूमिपाला वशीकृताः।इंद्रोऽपि न हि पार्थेन संयुगे योद्धुमर्हति।यस्तेनाशंससे योद्धुं कर्तव्यं तन्महत्त्वया।
आशीविषस्य क्रुद्धस्य पाणिमुद्यम्य दक्षिणं।अविमृश्य प्रदेशिन्या दंष्ट्रामादातुमिच्छसि।अथवा कुंजरं मत्तमेक एव चरन् वने।अनंकुशः
॥समारुह्य नगरं गंतुमिच्छसि। ५७
प्रा
स्य वाऽऽनन्दो यथैवैते प्रकृतेरप्यकारस्य स्वतन्त्रान्तीयस्य तव विराड्रूणां सुकरमेव तत्स्त्वनारान्नपेवपतिष्यन्।
तिभावः।अथवा रथकारस्य प्रायः हतो नो वा रथलक्षणाघटनादिलक्षणं तं पंडितानव्यवस्यंति तैर्निर्वाचरितं कर्म साधवोन च रवंतो तानि नलव
द्विरोधः कर्तुं नोचितमित्यर्थः।पार्थेनेति।आत्मप्रसकृत्याशर्वमाशानैः।स्तोजयइत्येन॥

समिद्धं पावकं वापि घृतमेदोवसाहुतं।घृताक्षी चीरवासास्त्वं मध्येनोत्तर्तुमिच्छसि।आत्मानं यः समुद्बध्य

समिद्धं पावकं वापि घृतमेदोवसाहुतं।घृताक्षी चीरवासास्त्वं मध्येनोत्तर्तुमिच्छसि।आत्मानं यः समुद्बध्य कंठे बद्ध्वा महाशिलां।
समुद्रं प्रतरेद्दोर्भ्यां तत्र किं नाम पौरुषं।अकृतास्त्रः कृतास्त्रं वै बलवंतं सुदुर्बलः।तादृशं कर्ण यः पार्थं योद्धुमिच्छेत्स दुर्म
तिः।अस्माभिरेष निकृतो वर्षाणीह त्रयोदश।सिंहः पाशविनिर्मुक्तो न नः शेषं करिष्यति।एकांते पार्थमासीनं कूपेऽग्निमि
व संवृतं।अज्ञानादभ्यवस्कंद्य प्राप्ताः स्मो भयमुत्तमं।सह युध्यामहे पार्थमागतं युद्धदुर्मदं।सैन्यास्तिष्ठंतु संनद्धा व्यूढानीका
प्रहारिणः।द्रोणो दुर्योधनो भीष्मो भवान्द्रौणिस्तथा वयं।सर्वे युध्यामहे पार्थं कर्ण मा साहसं कृथाः।वयं व्यवसिताः पा
र्थं वज्रपाणिमिवोद्यतं।षड्रथाः प्रतियुध्येम तिष्ठेम सहिता यदि।व्यूढानीकानि सैन्यानि यत्ताः परमधन्विनः।युध्यामहे
ऽर्जुनं संख्ये दानवा वासवं यथा॥ ॥इति विराटपर्वणि गोग्रहणे एकोनपंचाशोऽध्यायः॥ अश्वत्थामोवाच॥ न च तावज्जिता गावो न च सीमां
तरं गताः।न हास्तिनपुरं प्राप्तास्त्वं च कर्ण विकत्थसे।संग्रामान्सुबहूञ्जित्वा लब्ध्वा च विपुलं धनं।विजित्य च परां भूमिं नाहुः किं
चन पौरुषं।दहत्यग्निरवाक्यस्तु तूष्णीं भाति दिवाकरः।तूष्णीं धारयते लोकान्वसुधा सचराचरान्।चातुर्वर्ण्यस्य कर्माणि विहि
तानि मनीषिभिः।धनं यैरधिगंतव्यं यच्च कुर्वन्न दुष्यति।अधीत्य ब्राह्मणो वेदान्याजयेत यजेत च।क्षत्रियो धनुराश्रित्य यजेतैव न
॥याजयेत्॥
पाशविमुक्तो बेति वा पाशाद्धस्त्यर्थः।पाशाद्विनिर्मुक्त इत्यपि पाठः।कूपे कंभोवस्कंद्य मत्तुपेत्य।सैन्याः सेनायकाः॥

ब्रह्मकर्माणि ब्राह्मणार्थानि कृत्यानि। चेतसा संबंधितानि चेतं मिकः पठिता। कर्म चाकर्षं विलक्षणं। कारयथाः कारयेत्तवान् इति

दिक्षेपो धिगम्य विज्ञानि कृषिकर्माणि कारयेत्। सहस्त्रस्तु स्पर्शणा कुर्याद्वित्तु वत्सांस्तु नित्यशः॥ वंचना योग विधिनि वेशनमीह त्वि
मास्थिताः॥ वर्त्तमाना यथा गा स्वं प्राप्य च। ऐमहीमिमां। सकुर्वतिमहानागा उरु स्त्रस्तु विगुणानपि। प्राप्य हीतेन को राजपदं नियस्तु
ष्टिमर्हति। नयाः रवः सरूपेण यथान्यान्याः कृतो जनः। ततो निगम्य वित्तानि कोषिकाद्वहिचरणां। निःकृत्या वचनाया गे
श्वर हितैसिको यथा। कतमोहिरथस्तु इयत्ता जेषी धनंजयं। नकुलं सहदेवं वा धनोपश्यपांडवया कृते। युधिष्ठिरो जितः कस्मिन्नी
मो वा सदिनां वरः। इंद्र इवेन्द्रो वया कस्मिन्नेव या मे स्थि जितः उरा। तत्र वकनमहा युद्धं यस्मिन्कृष्णा जिताः श्रपा। एकवस्त्रा सभां नीता नाउषक
र्मत्र जस्वला। मृतमेषां महत्कृतं सारथी वृहन्नंयया। कर्मकार इवाधीरः स्तत्र किं विद्वेत् ब्रवीतु। यथा शक्तिमतुष्याणां यममाल हृ गे॰
यामहे श्राप्यषा चेव सवाना मपि कीटपिपीलिकाः॥ डोपयास्त्रप रिक्लेशान सं तु पांडवा वादिति। स्तपायधर्मं राज्ञां या पांडवेनोध
नंजयः। हेकृतः पंडितो स्वाद्यां वंदकुमितादीमि। विरांतकरणं जिष्णुर्नवंशं पकरिष्यति। नेषा स्वान गंधर्वानास्तु रानवरं सिमा
स्वानवास्तिदिवस्तुधो तिकंतो त्रुद्धो धनंजयः। यथमेषो नि मंकुरुः संयामे निपतिष्यति। हस्ते गांडवे गोवा विनिहत्यतमेष्यातोवृत्तो विशि
ष्टेषां पांडवस्यमराहूसमं। वासुदेवसमं युद्धे पार्थं को बा नशुजायता॥ ॥ ५८

समुपस्थांति। आलंभयामहे। निप निष्पत्त्युपेति। वाचा सुअपस्य॥

अनंतरोऽश्वमित्रः। अस्या रूपाद्रा का त्राकृतेन च तुर्थ। द्वापरं हिकं। अंतरा रुमध्येषु॥ नानियोक्रमोनो पालंभनाय॥

दिवेन देवे युध्येतमानुषेणच मानुषं। अस्त्रेणास्त्रं समाहन्यात्कोऽर्जुनेन समः पुमान्॥ पुत्रादनंतरः शिष्य इति धर्मविदो विदुः
एतेनापि निमित्तेन प्रियो द्रोणस्य पांडवः॥ यथाविसमकर्मा स्तूतमिद्यस्त्रं यथा हरः। यथा निषीः स्मत्तां कृष्णांतथा युद्धस्व पांडवं॥
अयं तमान्ननप्रास्त्रस्ताच्च धर्मविदो विदुः। उष्ट्रेन दवीगांधारः शकुनि र्दुष्यतामिद॥ नासान्ह्यपतिगांडो। वंनकृते द्वापरं न
चाज्वलतानि शितान्। ना श्रीणान्क्षीरणाज्ञीपतिगांडिवं। न दिगांडीवनिर्मुक्ताणार्द्धपत्रा सुतेजनाः। अंतरा वर्त्तते होति गि
रोणां। सपि दारणाः॥ अंतकोपवनो हृस्तु त्वयाग्निर्वडवा मुखः। कुर्यु रतेक ष्ठितेषं न तु कुरुं धनंजयः। युध्यतां कामगमा चार्य
ना हं योत्स्ये धनंजयं। मत्स्यो हस्मान्निराधार्यो गो यथयाग्नौजवांपदं॥ ॥ इति विराटपर्वण्युत्तरगोग्रहे द्रोणवाक्यं॥ ॥
नीलकंठव्याख्या॥ मा धुरवपंश्ति विदोषाः कृतस्य साधु पश्यति। कर्मस्तु ज्ञात्वधर्मेण यथा बुद्ध्योर्भुष्ठिति। आचायोनात्ति योऽयं
नवखरुषेण। विजानता। देशकालो तु संशेष्यपोष्य मितिमे मतिः। यस्मस्त्वंप्रसमाः पंचसपत्नाः स्वः प्रद्वारितः। कथम न्तु
दयांतनानघ्युत्यतपडितः। स्वार्थमार्वविशुद्धं तिर्यषिधर्मविदोजनाः। तस्मा द्रोणं जन ब्रवीम्येतदाकर्णतयदिरोचताक
र्त्तो यदृष्टवो धुनस्तु जः संजननायनतु। आचार्य प्रवचः स्मृतो महाकार्यमुपस्थितं। नायं कालो विरोधस्य कौंतेये समुपस्थिते

नतत्त्वं। अपिनिमज्यमानेऽस्मिन्मोक्षे॥ हतं मिनोति। परं शत्रुं॥

विराट शवत्वं नवता सर्वेभ्यो वा धर्मार्थकुशलाः। नयतां हि कृतास्त्वं यथाहि तस्य प्रज्ञातथ। यथा चेदमसौ लक्ष्म्या। सर्वदानापकृष्य
ता। एवं नवसु ब्राह्मणाद्ब्रह्मास्त्रं वपति हितं। चतुर्वारएकलो वेदाः द्वात्रिंशत्कवनदस्य ता। नितसमस्ततु नयं कस्मिंश्चिद्वसु
श्रुतं। अन्यत्र नारातचायात्मपुत्रादिति मे मता। ब्रह्मास्त्रं ब्रह्मविद्या च नितदन्य च हरूपात। आचार्यपुत्रः समतानाय
कालस्वने दने। सर्वे संदत्त्य युधामः पाकशासनिमागतं। बलस्य व्यसनानादित्यान्सुरूपा। निमनी विन्नि॥ सुख्यो। नादादि तषां
उपाधिषो विदधां मतं॥ ॥द्रोणिरुवाच॥ नैवं न्याय्यमिदं वाक्यमस्माकं कुरुपुङ्गव। किं तु रागपरीतेन सुरूराणामाचित
गुणाः शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि। सर्वथा सर्वयत्नेन पुत्रे शिष्ये हितं वदेत्॥ दुर्योधन उवाच॥ आचार्य
एष क्षमतां शान्तिरस्मि विधीयतां। अत्र सत्यमात्मनः दोषैः हृतं गणकारितं॥ ॥वैशंपायन उवाच॥ ततो दुर्योधनो द्रोणं
क्षमयामास भारत। सह कर्णेन भीष्मेण कृपेण च महात्मना॥ द्रोण उवाच॥ यदेतत्प्रथमं वाक्यं भीष्मः शान्तनवोऽब्रवीत्। तेन
नैवाहं प्रसन्नो वि परमत्र विधीयतां। यथा दुर्योधनः पार्थैर्नोपसर्पति संगरे। यथा दुर्योधनेनेदमाराः स्पृशति सेनिकानृ। सा ५८
हसाद्यदि वा मोहान्न ग्यानाति विधीयतां। वनवासस्य निर्वृत्ते दर्शयेन्न स्वमर्जुनः धनं वालभमानातारनाद्य नः संदमर्ह
ति।

ज्योतिषां महत्क्रद्दादीनां उपचीयातं अधिको नवतः। सार्द्धवर्षद्वयेनैकोऽधिमासः पततीत्यर्थः। पंचामपंचामवर्षे द्विमासावु
पचीयतपयामप्यधिकामासाः पंच च द्वादश स्याः। त्रयोदशानां वर्षाणामिति मिवर्तते मतिः। द्वाविति वाप्ता पाषो ध्याः। उपची
यतउपचीयते वर्द्धेता। इति यावत्। बंडकोक्तामितिः। राशयः। नत्याचस्मृतिः एवमर्द्धहतायानामहानामधिमासकं। यान्म
यथान्यायं समासु ज्येष्ठानां हंकं पवचन। यथा वृद्धराजस्य त्वयानीति विधीयतां। उक्तं दुर्योधनेनापि पुरस्तात् वाक्यमीदृ
शं। तदेवस्नत्यगामतो यथावद्वक्तुमर्हति॥ ॥महाभारते विराटपर्वणि उत्तरगोग्रहे॥ भीष्म उवाच॥ काल
तस्मात सुत्य ज ग्रहकृर्ता अदिनानिचार्द्धमासाश्च मासाश्च नक्षत्राणि ग्रहास्तथा। ऋतवश्चापि युज्यन्ते तथा संवत्सरा अपि॥ त
एवं कालविभागेन कालचक्रं प्रवर्तते। तेषां कालातिरेकेण ज्योतिषां च व्यतिक्रमात्। पंचमे पंचमे वर्षे द्वौ मासावुपचीयतः
।एषामभ्यधिका मासाः पंच च द्वादश क्षपाः। त्रयोदशानां वर्षाणामिति मे वर्तते मतिः। सर्वं यथावच्चरितं यद्यद्भिः परि
श्रुतं॥

जनयतः पूर्वं यच्छ्रिच मे हे त्रुपक्षि ममिति। अस्यार्थः। वर्षद्वयस्य वर्षार्द्धस्य चान्ते चैत्रादेश्च पूर्वमधिमासं
जनयतः। एतन्मासद्वयं पदं मिति। ग्रीष्ममाधवादिषट्के एतद्वोस्रगिंकवाउक्तो। दशमाफाल्गुनादानापामाघ।
स्य कश्चिदित्यतोक्त्वात्। एतेषां वदति भीतानां। सो रवर्षाणां त्रयोदशानामित्यर्थः। आधिका। एषां द्वादशकविनाति
विद्यंतइत्यर्थः। द्वादशार्द्धमासाः। द्वादशापक्षपाः। शाकमाया। धीवादि। षड्दोरात्रइत्यर्थः। एवं सपाशद्धो त्रुस्यगो

ण हत्यौ। वारो दिने ववर्तते। तन ष ह्निनानि। पञ्चात्र यक्ष्येति मि लि त्वा वादशाल्पाः। नत्वहादशाहोरात्राः इति
विराट शेषदिनवेनगडहगडः खमादादिजनकनषायाजनसन्नवादिनमपिरात्रि तयाव्यपदिष्ट मिति। एवं च पंच
मासप्रचामवर्षे दैवाजत्रयोदशवर्षपूर्तिरिति नी षष्या मि आयः। एषामप्यधिकाङ्स्याद्धनन्तदर्शिनेतस्सो रत्र
यो दशवर्षाणां षड्दिनाधिकं पंच मासमन्तर्नतामनि। एतनवाङा दवराक्तिनीशेषामिश्रायः। एतादक्यक्तीन निष्पत्ति।
यथा युधिष्ठिरो राजा इत्यादौ। अयं चन्द्रे स्पष्टचतुर्विंशतिदिनोत्तरपञ्चमासाधिकसौरद्वादशवर्षैसुसमञ्जव। सेऽत्र योदशा
वर्षस्त्रौ। सचचतुर्विंशो ह्येषस्य तस्मिन्स्कला इमानसर्वं मम संपाद्यलिगो यदः। धर्मात्मा सम्पमसमर्भी। मित्युक्तवान्॥
दुर्योधनस्य युधिष्ठिरादीनेघस्वघो दशावर्षाणि एणीकृतानि नानि च। सौरमतस्त्रागामिका त्रिकसंकालामेपूर्णी
निनविप्यति। एतदन्तरवार्जुनोदृष्टः तत्र च नीष्मादयो नाकिमपि वदन्ति चाडा दरपवन्ति न तु सावनादरः। सौराद
रावेति। यदि हि तयो रकतरादवरणाशास्त्रीयस्यात्तेदतेस्मिन्त्रो डेत्र यो दशावर्षपूर्तिदिनसावनाद्यसमासोधर्मव र
प्रत्नावनदुर्योधनादिभिर्जुनो न ज्ञातः स्यात्। नीष्मस्या पिन्त्रातवमापद्येत। येषां युधिष्ठिरो राजा ते कथं धर्मपरा ६७
न्युत्तरिति नीष्मोक्तं युधिष्ठिरस्य धर्मशास्त्रज्ञतं व्याहन्येत। यस्मिन्नादिने योऽयदात स्मिन्नेव पनिष्ठांडत्रयोदशवर्षपूर्त्ति

रितिकाकतालायन्यायादेव पूर्वदिने च योदशवर्षस्तैर्युधिष्ठिरणा नामसप्तदशास्पाटनानि षेधएवमानं। यस्तेते दिन इ
यानंतर विपाटेन तिष्ठुधिष्ठिरादयः प्रकटाबभूवुः। तत्कया विपरीपाद्यास्तन पदिना। टी स्तव एकाचा यों मिति। अन्नच विराटे
तदेव सौरसावनचान्द्रमतान्नाकिमादरणीयमिति सिद्धान्तनजानतः सर्वशास्त्रनत्वं भीष्म एवो न्नो बोध्यः। अयमेना वः। दिवसस्य
हरस्पर्क ष हि नागमनौयतः। कंरोत्येकमद्रूपेदंतयोर्विकंवचं डमाङ्स्तुकरीत्या षण्मासाधिकद्वादशवर्षत्रयं च मासास्य
तेति। एवंमासस्तु पंचदिनानिं च वदिक्षदशादंडाः चतुर्विंशतिदिने अपृष्ठवारिदंडा। अष्टपंचाशदंदेसुदंडद वमित्यिष्टि
दंडाः तिथिहीनानि इति। उपेष्टचतुर्विंशदिनमादित्वा कान्ति कसंक्रान्त्यासौरत्रयोदशवर्षपूर्तिः। दवीदि हूतन्नि ता याप्या
वनवासाज्ञातवासयोरत्रयोदशावर्षाणि परांकृतवंतस्वषोदशस्थाङ्गएव ग्राह्यः। तत्सौरपक्षमाति नं दुर्योधनं प्रति भीष्मेणाडम
तो नसंशातमादाक्रनस्थाप दृत्युक्तं नि मन्तुविवादस्तुतो इष्ट एवबोध्यः। अन्तवचतुर्विंशादिनत्रमतनेमोदाघरस्योवाऽन्नितन
रोकिस्वतंतृतीयदिवसेऽङ्गतिमगवडन्कम्बविजयदिनस्चचतुर्विंशास्पष्टत्वायुद्धस्वपर्याप्ताः। तेषां उपस्पष्टदिशान्तु
प्रकाशः। तस्यसंभावितिकवदिनहादिरप्रहनौयेति। नतस्त्रुपंचषड्दिनान्तरएव चन्द्रतानावपक्षव्यात् हारकागमनं। हार
कातस्थाभिमन्युप्रकृतीनां उपज्ञप्यागमनं बोध्यं। नत्र च विकटिरवाहदूरपं। तेषां तत्कालीनानां युक्तपर्वणिां यागगांत्र वदत्तुप

विराट
४५वैवैवम
हाभानः ४

हीनानांलोकोत्तरचरितावात्॥ अन्यथास्वोपदर्शिणि। एतावानिहसंवासोविहितस्तेमयासह। पञ्चमासान्पञ्चमेमासिचंवीर।
निधनंगतइतिअभिमन्युवचनंश्रुत्वा। वेलाग्रवचनंविरुध्यतइति। मार्गेशीर्षेपंचमदिने। दिवअभिमन्युपतनं॥ त्यक्त्वादक्षिणमार्गं

एवमेतद्ध्रुवंज्ञात्वाततोबीभत्सुरागतः॥ सर्वेधर्मार्थकोविदाः। येषांयुधिष्ठिरोराजाकस्माद्धर्मेपराधुयुः। अलुब्धाश्चैवकौ
न्तेयाःकृतवन्तश्चदुष्करं। नचापिकेवलंराज्यमिच्छेयुस्तेनुपायतः। तदैवतेहिविक्रान्ताईषुःकौरवनंदनाः। धर्मपाशनिबद्धा
स्तेनचेलुःक्षत्रियव्रताः। यच्चानृतमितिख्यायेद्यश्चगच्छेत्पराभवं। वृणुयुर्मरणंपार्थानानृतत्वंकथंचन। प्राप्तेकालेतुप्राप्तव्यं
नात्स्यजेयुर्नरर्षभाः। अपिवज्रभृतागुप्तंतथावीर्याहिपांडवाः। प्रतियुध्यामसमरेसर्वशस्त्रभृतांवरं। आगतंफाल्गुनंराज
न्सर्वैस्तेनसंशयः। तस्माद्यदत्रकल्याणंलोकेसद्भिरनुष्ठितं। तत्संविधीयतांशीघ्रंमानाद्यर्थोत्यगात्परं। नहिपश्यामिसं
ग्रामंकदाचिदपिकौरव। एकांतसिद्धिराजेंद्रसंप्राप्तश्चधनंजयः। संप्रवृत्तेतुसंग्रामेभावाभावौजयाजयौ। नहिपश्यामि
संग्रामेकदाचिदपिकौरव अवश्यमेकंस्पृशतोदृष्टमेतन्नसंशयः। तस्माद्युद्धावचरितंकर्मवाधर्मसंहितं। क्रियतामाशुराजें
द्रसंप्राप्तोहिधनंजयः॥ दुर्योधनउवाच॥ नाहंराज्यंप्रदास्यामिपांडवानांपितामह। युद्धावचरितंयत्तुतच्छीघ्रंविधीयतां॥
॥ भीष्मउवाच॥

शिरस्ममसमोभवतीति। अस्यपद्यस्यविविधव्याख्याविद्वन्निराहृताः॥ अस्माभिस्तानदृष्ट्वातत्सार्वज्ञंहिन
कस्यचिदिति॥ ॥ अनुपायतःअधर्मतः। परंमत्यगात्। युद्धावचरितंयुद्धोपयिकं। धर्मसंहितंधर्म्यप्रधानं॥ ॥श्री॥ ॥ ६१

मामिकामदीया। उपायात्समीपमागमत्। रौरवीतिअत्यर्थंरौति। प्रणुदतीतिप्रणुत्। गच्छतुस्व

अत्रयामामिकाबुद्धिःश्रूयतांयदिरोचते। सर्वथाहिमयाश्रेयोवक्तव्यंकुरुनंदन। क्षिप्रंबलचतुर्भागेगृह्यपुरंप्रतिततो
परश्चतुर्भागोगाःसमादायगच्छतु। वयंत्वर्धेनसैन्येनप्रतियोत्स्यामपांडवं। अहंद्रोणश्चकर्णश्चद्रौणिःशारद्वतस्तथा॥
प्रतियोत्स्यामबीभत्सुमागतंकृतनिश्चयं। मत्स्यंवापुनरायातमागतंवाशतक्रतुं॥ ॥वैशंपायनउवाच॥ ॥तद्वाक्यंरुरुचे
तेषांभीष्मेणोक्तंमहात्मना। तथैवचकरद्राजाकौरवाणामनंतरं। भीष्मःप्रस्थाप्यराजानंगोधनंतदनंतरं। सेनामुख्यान्व्य
वस्थाप्यव्यूहितुंसंप्रचक्रमे॥ ॥भीष्मउवाच॥ ॥आचार्यमध्येतिष्ठत्वमश्वत्थामातुसव्यतः। कृपःशारद्वतोधीमान्पा
र्श्वंरक्षतुदक्षिणं। अग्रतःसूतपुत्रस्तुकर्णस्तिष्ठतुदंशितः। अहंसर्वस्यसैन्यस्यपश्चात्स्थास्यामिपालयन्॥ ॥इतिमहाभा
रतेविराटपर्वणिउत्तरगोग्रहे॥ ॥वैशंपायनउवाच॥ ॥तथाव्यूढेष्वनीकेषुकौरवाणांमहारथैः। उपायादर्जुनस्तूर्णं
रथघोषेणनादयन्। ददृशुस्तेध्वजाग्रंवैशुश्रुवूरथस्वनं। दोधूयमानस्यभृशंगांडीवस्यचनिःस्वनं। ततःसर्वंसमा
लोक्यद्रोणोवचनमब्रवीत्। महारथमनुप्राप्तंदृष्ट्वागांडीवधन्विनं॥ ॥द्रोणउवाच॥ ॥एतद्ध्वजाग्रंपार्थस्यदूरतःसंप्र
काशते। एषघोषःसजलदोरोरवीतिचवानरः। एषतिष्ठन्रथश्रेष्ठेरथीरथवरप्रणुत्। उत्कर्षतिधनुःश्रेष्ठंगांडीवमशनि

शंकेत क्रियामि। निरामिषं निरुयादानं।

विराट

निरस्त्वनं। इमौ हि बाणौ सहितौ पादयोर्मे व्यवस्थितौ। अपरौ चव्यतिक्रांतौ कर्णौ संस्पृश्य मे गुरो॥ निर्वर्त्य हि वने वासं कृत्वा
कर्मातिमानुषं। अभिवादयते पार्थः श्रोत्रे च परिपृच्छति॥ चिरदृष्टोयमस्माभिः प्रज्ञावान्बांधवः प्रियः। अतीव ज्वलितो लक्ष्म्या
पांडुपुत्रो धनंजयः॥ रथी शरी चारुतली निषंगी शिखी पताकी कवची किरीटी। खड्गी च धन्वी च विराजते पार्थः शिखीवृतः स्रुग्भिरि
वावसिक्तः॥ ॥अर्जुन उवाच॥ ॥इषुपाते च सेनाया हयान्संयच्छ सारथे। यावत्समीक्षे सैन्येस्मिन्क्वासौ कुरुकुलाधमः॥ सर्वाना
न्याननादृत्य दृष्ट्वा तमतिमानिनं। तस्य मूर्ध्नि पतिष्यामि तत एते पराजिताः॥ एष व्यवस्थितो द्रोणो द्रौणिश्च तदनंतरः॥ भीष्मः कृ
पश्च कर्णश्च महेष्वासा व्यवस्थिताः॥ राजानं नात्र पश्यामि गाः समादाय गच्छति। दक्षिणं पथमास्थाय शंके जीवपरायणः॥ उ
त्सृज्यैतद्रथानीकं गच्छ यत्र सुयोधनः॥ तत्रैव योत्स्ये वैराटे नास्ति युद्धं निरामिषं। तं निहत्य निवर्तिष्ये गाः समादाय सर्वशः॥
वैशंपायन उवाच॥ ॥एवमुक्तः स वैराटिर्हयान्संयम्य यत्नतः। नियम्य च ततो रश्मीन्यत्र ते कुरवो गताः॥ अचोदयत्ततो
वाहान्यतो राजा सुयोधनः। उत्सृज्य रथवंशं तु प्रयाते श्वेतवाहने। अभिप्रायं विदित्वास्य द्रोणो वचनमब्रवीत्॥ नैषांतरेण
राजानं बीभत्सुः स्थातुमर्हति। तस्य पार्ष्णिं ग्रहीष्यामि जवेनाभिप्रयास्यतः॥ नह्येनमभिसंक्रुद्धमेको युध्येत संयुगे। अन्यो देवा ६२

पुरअग्रतः॥ नाहंतामनाहंतो।

त्सहस्राक्षात्कृष्णाद्वा देवकीसुतात्। किं नो गावः करिष्यंति धनं वा विपुलं तथा। दुर्योधनः पार्थजले पुरा नौरिव मज्जति॥ तथैव
गत्वा बीभत्सुर्नाम विश्राव्य चात्मनः। शलभैरिव तां सेनां शरैः शीघ्रमवाकिरत्॥ कीर्यमाणाः शरौघैस्तु योधास्ते पार्थचोदितैः॥
नापश्यन्नावृतां भूमिमंतरिक्षं च पत्रिभिः। तेषां नात्मनो युद्धे नापयाने च तत्समतिः॥ शीघ्रत्वमेव पार्थस्य पूजयंति स्म तेजसा।
ततः शंखं प्रदध्मौ स द्विषतां लोमहर्षणं। विस्फार्य च धनुःश्रेष्ठं ध्वजे भूतान्यचोदयत्॥ तस्य शंखस्य शब्देन रथनेमिस्वनेन
च। गांडीवस्य च घोषेण पृथिवी समकंपत। अमानुषाणां सर्वेषां भूतानां ध्वजवासिनां॥ ऊर्ध्वं पुच्छान्विधुन्वानाः धावमा
नाः समंततः। गावः प्रतिन्यवर्तंत दिशमास्थाय दक्षिणां॥ ॥इति विराटपर्वणि उत्तरगोग्रहे॥ ॥वैशंपायन उवाच॥ ॥स
शत्रुसेनां तरसा प्रणुद्य गास्ता विजित्वाथ धनुर्धराग्र्यः। दुर्योधनस्याभिमुखं प्रयातो भूयोऽरणं प्रियमाचिकीर्षुः॥ गोषु स्प
प्रयातासु जवेन मत्स्यान् किरीटिनं कार्यवंतं मत्वा। दुर्योधनायाभिमुखं प्रयांतं कुरुप्रवीराः सहसा निपेतुः॥ तेषामनी
कानि बहूनि गाढं व्यूढानि दृष्ट्वा बहुलध्वजानि। मत्स्यस्य पुत्रं द्विषतां निहंता वैराटिमामंत्र्य ततोऽभ्युवाच॥ एतेन तूर्णं प्रति
पादयेमान् श्वेतान्हयान्कांचनरश्मियुक्तान्। जवेन सर्वेण कुरु प्रयत्नमासादयैतं रथसिंहवृंदं। गजो गजेनेव मया

यै ततरू

विराट

सुवर्णकक्ष्यैः सुवर्णरश्मिभिः। विपाठक्षुरनाराचैर्जातिविशेषैः। नगो हयः नगाग्रान्गिरिशिखराणि। वालरूपो वायु म॰भा॰

सुतस्त्वयोद्धुमाकांक्षति स्म तत्र। तमेवमाश्राव्य राजपुत्रः कुबेरोऽधनायाथ प्रजातदर्पः। ततो हार्यवर्णाजनावेधी। विंशत्रो ६

विराटस्य सुवर्णकक्ष्यैः। व्यूढं स ययौ दक्षिणामनीकं ततो वहन्त्याडवमाजिमध्ये। तं चित्रसेनो विशिखैर्विपाठैः संग्रामजि

च्छत्रुसहो जयश्च। प्रत्युद्ययुस्तं रमापतन्तं महारथाः कर्णमभीप्समानाः। ततः स तेषां कुरुप्रवीरः शरासनार्चिः शरवेग

तापः। व्रातं रथानामदहत्समन्युर्वनं यथाग्निः कुरुपुंगवाख्यः। तस्मिंस्तु युद्धे तुमुले प्रवृत्ते पार्थं विकर्णोऽतिरथं रथेन। वि

पाठवर्षैः कुरुप्रवीरो भीमेन भीमानुजमाससाद। ततो विकर्णस्य धनुर्विकृष्य जांबूनदाग्र्यापचितं दृढज्यं। अपातयद्ध्व विराटप॰ गा॰या॰

जमस्य मथ्य छिन्नध्वजः सोऽप्यपयाज्जवेन। तं शात्रवाणां गणबाधितारं कर्माणि कुर्वाणममानुषाणि। शत्रुंतपः कोपमम

र्ष्यमाणः समार्दयत्कूर्मनखेन पार्थं। स तेन राज्ञातिरथेन विद्धो विगाहमानो ध्वजिनीं कुरूणां। शत्रुंजयं पंचभिराशु विध्वा

ततोऽस्य सूतं दशभिर्जघान। ततः स विद्धोऽत्तरवर्मणा बाणेन गात्रावरणातिगेन। गतासुराजौ निपपात भूमौ नगो न

गाग्रादिव वातरुग्णः। रथर्षभास्ते तु रथर्षभेण वीरा रणे वीरतरेण नुन्नाः। चकंपिरे वातवशेन काले प्रकंपितानीव ६३

महावनानि। हतास्तु पार्थेन नरप्रवीरा भूमौ युवानः सुषुपुः सुवेषाः। वसुप्रदा वासवतुल्यवीर्याः पराजिता वासव

जेन संख्ये। सौवर्णकार्ष्णायसवर्मनद्धा नागा यथा हैमवताः प्रवृद्धाः। तथा स शत्रून्समरे निहत्य गांडीवधन्वा पुरुषप्रवीर

श्चचार संख्ये प्रदिशो दिशश्च दहन्निवाग्निर्वनमातपान्ते। प्रकीर्णपर्णानि यथा वसंते विशातयित्वाप्यनिलो नुदन्खे। तथा

सपत्नान्विकिरन्किरीटी चचार संख्येऽतिरथो रथेन। शोणाश्ववाहस्य हयान्निहत्य वैकर्तनभ्रातुरदीनसत्वः। एकेन

संग्रामजितः शरेण शिरो जहाराथ किरीटमाली। तस्मिन्हते भ्रातरि सूतपुत्रो वैकर्तनो वीर्यमथाददानः। प्रगृह्य दंता

विव नागराजो महर्षभं सिंह इवाभ्यधावत्। स पांडवं द्वादशभिः पृषत्कैर्वैकर्तनः शीघ्रमुपाजघान। विव्याध गात्रेषु र

थांश्च सर्वान्विराटपुत्रस्य करे निजघ्ने। तमापतंतं सहसा किरीटी वैकर्तनं वै तरसाभिपत्य। प्रगृह्य वेगं न्यपतत्स वे

ननागं गरुत्मानिव चित्रपक्षः। तावुत्तमौ सर्वधनुर्धराणां महाबलौ सर्वसपत्नसाहौ। ततस्तयोर्युद्धमतीव घोरं दिदृक्ष

माणाः कुरवोऽवतस्थुः। स पांडवस्तूर्णमुदीर्णकोपः कृतागसं कर्णमुदीक्ष्य संख्ये। क्षणेन साश्वं सरथं ससूतमंतर्दधे घो

रशरौघवृष्ट्या। ततः सुविद्धाः सरथाः सनागा योधा विनेदुर्भरतर्षभाणां। अंतर्हिता भीष्ममुखाः सहाश्वा योधाः किरीटिना कर्ण

रथप्रवाणैः। स चापि तानर्जुनबाहुमुक्तान् शरान्गणाशः प्रतिहत्य कर्णः। ततो महात्मा सधनुः सबाणः सविस्फुलिंगाग्नि

धृत्तोत्रमानां -- कुलनीष्यणां ष्टनां नार मेघावकाशेन॥

रिवासकर्मा॥ अंतर्दधे पार्थमिषुप्रवर्षैर्निशातैर्दोर्गुकुरुराजयोधाः॥ ततस्तु जज्ञे तलतालशब्दः संशोरवभेरीपणवप्रणादः
प्रक्ष्वेडितन्यातलक्षुत्तदंते विकर्णनं प्रत्युद्ययौ ताकुरुणां॥ उद्भूतलांगूलपताकयायं ध्वजोत्तमानां कुलनीष यंता॥ गांडीवनि
र्घोषकृतप्रणादं किरीटिनं वेक्ष्यननाटकर्मा॥ पादर्धोयविकर्णं महेषुचित्वासाद्यसमस्तंच पृषत्कवर्षैः॥ ततोववर्षप्रसभंकि
रीटी पितामहं द्रोणकृपौ च दृष्ट्वा सचापि पार्थं बहुभिः पृषत्कैर्विकर्णनामेघइवाभ्यवर्षत॥ तद्येवकर्माणिच किरीटमालीष
गादयामास शितैः शरौघैः॥ ततः स जंतो समरस्थ रोषाद्व न्योन्यघोरा रक्त विमर्द निष्ठेरा स्थे निषण्णा विवर्धेड स्थ्योधशरौघ
कारेण दृढ शल्लोकः॥ अथ सुकारीवकुरस्तु रंगान्न्यार्थस्य विव्याधशरैस्तु कर्मा॥ त्रिभिस्तु यंतारम मृष्यमाणो विव्याध तस्मै
त्रिभिरवकेतुं॥ ते नातिविद्धः समरावमर्दी प्राबोधितः सिंह इव प्रसुप्तः॥ गांडीवधन्वा प्रवरः कुरूणामजिह्मगैः कलितैवा
यवाणैः॥ सशल्यहृष्टान्निहतो महात्मा प्राङ्मुखकारस्य समोघकर्मा॥ प्रावादयत्कर्ण रथं पृषत्कैर्लोकातिमानूर्द्ध्वइवं
मुज्ञालि॥ सपांडवं ग्राहवशतिः पृषत्कैर्विकर्णनाः शीघ्रमुपाजगाम॥ विव्याधगात्रेषु हयांश्च सर्वान्विराटपुत्रंच कारनिशंद्धं॥ ६७
सहस्त्रिनेवाविहतो गजेंद्रः प्रहृष्टान्नहत्वा निशिताग्निषंगात॥ ज्याकर्ण पुर्णं चधनुर्विकृष्य विव्याधनारौर स्थस्त्रपुत्रं॥ अथास्य

संग्रामशिरस्याभूत्वं येघाय्यथावत्॥ आ इयत्॥ ग्राप्यवं तः॥ आवीतनिपाव समागनाः शरैरुपलक्षिताः दूरस्य वृंदरवनया
बाहुरुशिरा तलसायीवावरंगामिवलावमही॥ क्षितस्यबालोद्भिपि निर्भिन्ने रगांडीवप्रक्षिरवानिष्कालोः सपार्थस्तु क्षिति
शिखिःप्रपुन्नोगनोगजेनेवह्नस्त्ररत्सा॥ विहाय संग्रामशिरः प्रयातो विकर्णनः पांडवबाणतप्तः॥ ॥इति विराटपर्वणि उत्तर
गोग्रहे कर्णापयाने॥ ॥वैशंपायन उवाच॥ ॥अपयाते तु राधेये दुर्योधनपुरोगमाः॥ अनीकेन समासाद्य शरैः पांड
वमार्दयन्॥ बहुधा तस्य सैन्यस्य व्यूढस्यापततः शरैः॥ अवारयत वेगं सावेलाइव महोदधेः॥ ततः प्रहस्य बीभत्सुः कौंतेयः श्वे
तवाहनः॥ दिव्यमस्त्रं प्रकुर्वाणः प्रत्ययाद्रथसत्तमः॥ यथा रश्मिभिरादित्यः प्रच्छादयति मेदिनीं॥ तथा गांडीवनिर्मुक्तैः शरैश्चादयद्दि
शो दश॥ न रथानां न चाश्वानां न ध्वजानां न वर्मिणां॥ विनिर्भिन्नैः शितैर्बाणैरासीद्द्व्यंगुलमंतरं॥ दिव्ययोगाच्च पार्थस्य हयानामुत्तरस्य
चाशिक्षाशिल्पोपपन्नत्वादस्त्राणां च परिक्रमात्॥ वीर्यवत्त्वाद्रुतं चाग्र्यं दृष्ट्वा जिष्णोरपूजयन्॥ कालाग्निमिव बीभत्सुं निर्दहंतं मि
व प्रजाः॥ नारयः प्रेक्षितुं शक्ताज्वलंतमिव पावकं॥ अनीकान्यरीणां नीरंजनरञ्जनिमार्गणैः॥ शोलंबितानवान्नाणि व्याप्ता नाना
वर्णरश्मिभिः॥ अशोकानां वनानीव कुसुमानि कुसुमैः॥ स्पृष्टानि॥ अस्तु पार्थशरैर्गंधकद्राः सैन्या निमास्ता प्रसागमतमाज्ञाय वैराटि
पार्थमब्रवीत्॥ आस्थाय रुचिरं पार्थ रथं सारथिना मया॥ कतमं यास्यसि नाकं शुक्लो यास्याम्यहं त्वया॥ ॥अर्जुन उवाच॥

णतवाह्॥ अंतस्यवकाशं॥ कौलेयं मितानायगं नव्यपरिज्ञानाया च्यनिज्ञानायमत्राय तिपावेच्छनितानम विपर्ययज्ञानतस्मे हितः पवयव॥ क्षि
ताज्जोगोगजोस्य तरनेतरमिस्यादिनामात्रुक्तनआज्ञायसम्यक्ज्ञात्वा॥ रुचिरमिति यान॥ याधिरोषणं अदिष्टध्वजविकृधर्मनिरादान॥

शोणाश्वं शोणाश्वैर्वे। सुप्रसन्नमनाः सन्नतिकुलवान्। नागो हस्ती। केतनं पताका। नागकक्षा हस्तिकक्ष्या बलारुचिरा काञ्चननिर्मिता यन्तः प्रयच्छ॥

विराट लोहिताश्वमरिष्टं यं वियाद्यमनुपश्यसि। नीलां पताकामाश्रित्य रथे तिष्ठन्तमुत्तर। कृपस्यैतद्रथानीकं प्रापयस्वैतदेव मां। एतस्य द
र्शयिष्यामि शीघ्रास्त्रं महात्मनः। कमण्डलुर्ध्वजे यस्य शातकुम्भमयः शुभः। आचार्य एष हि द्रोणः सर्वशस्त्रभृतां वरः। सुप्रसन्नमना
वीरः कुरुष्वैनं प्रदक्षिणं। अत्रैव चावरोधं च मे प्रधर्मः सनातनः। यदि मां प्रथमं द्रोणः शरीरे प्रहरिष्यति। ततोऽस्मै प्रहरिष्या
मि नास्य कोपो भवेदथ। अस्याविदूरे तु धनुर्ध्वजाग्रे यः प्रदृश्यते। आचार्यस्यैष पुत्रो वै अश्वत्थामा महारथः। सदा ममैष मान्यश्च स
र्वशस्त्रभृतामपि। एतस्य त्वं रथं प्राप्य निवर्तेथाः पुनः पुनः। य एष तु रथानीके सुवर्णकवचावृतः। सेनाग्र्येण तृतीयेन व्यवहार्येण ति
ष्ठति। यस्य नागो ध्वजाग्रे वै हेमकेतनसंश्रितः। धृतराष्ट्रात्मजः श्रीमानेष राजा सुयोधनः। एतस्याभिमुखं वीर रथं परथारुजं। प्रा
पयस्वैष राजाद्य प्रमाथी युद्धदुर्मदः। एष द्रोणस्य शिष्याणां शीघ्रास्त्रः प्रथमो मतः। एतस्य दर्शयिष्यामि शीघ्रास्त्रं प्रथमं
रणे। नागकक्षा तु रुचिरा ध्वजाग्रे यस्य तिष्ठति। एष वैकर्तनः कर्णो विदितः पूर्वमेव ते। एतस्य रथमासाद्य राधेयस्य दुरा
त्मनः। यत्तो भवेथाः संग्रामे स्पर्धत्येष सदा मया। यस्तु नीलानुसारेण पञ्चतारेण केतुना। हस्तावापी बृहद्धन्वा रथे तिष्ठ
ति वीर्यवान्। यस्य तारार्कचित्रोऽसौ रथे ध्वजवरः स्थितः। यस्यैतत्पाण्डुरं छत्रं विमलं मूर्ध्नि तिष्ठति॥ ६५

वाद्यानीलानुसारेण नीलपताकान्तकेतुना ध्वजेन। हस्तावापी काण्डस्तुष्टिमान्॥

सूर्यवत्सूर्यदर्शनं यानं बलं च शुशुभे इति पूर्वेणान्वयः। शतं कल्याणरूपं शतमिति यावेदीशिमता त्रयस्त्रिंशदिति

महतो रथवंशस्य नानाध्वजपताकिनः। बलाहकाग्रे सूर्यो वा यः प्रमुखतः स्थितः। हेमं चन्द्रार्कसंकाशं कवचं यस्य दृश्यते।
जातरूपशिरस्त्राणस्त्रासयन्निव मे मनः। एष शान्तनवो भीष्मः सर्वेषां नः पितामहः। राजश्रिया वर्धमानो दुर्योधनवशानुग
ः। पश्चादेष प्रयातव्यो न मे विघ्नकरो भवेत्। एतेन युध्यमानस्य यत्तः संयच्छ मे हयान्। ततोऽभ्यवहदव्यग्रो विराटिः स
व्यसाचिनं। यत्रातिष्ठत्कृपो राजन्योत्स्यमानो धनंजयं॥ ॥इति महाभारते विराटपर्वणि उत्तरगोग्रहे॥ ॥वैशंपायन उ
वाच॥ ॥तान्यनीकान्यदृश्यन्त कुरूणामुग्रधन्विनां। संसर्पन्ति यथा मेघा घर्मान्ते मन्दमारुताः। अभ्याशे वाजिनस्तस्थुः समा
रूढाः प्रहारिभिः। भीमरूपाश्च मातङ्गास्तोमराङ्कुशचोदिताः। अस्त्राणां च बलं तेषां मनुष्येषु प्रयुज्यतां। तच्च घोरं महद्युद्धं भीष्मा
र्जुनसमागमे। द्रष्टुमभ्यागता देवा विमानैः स्वैः पृथक् पृथक्। शतं शतसहस्राणां यत्र स्थूणा हिरण्मयाः। मणिरत्नमयाश्चा
न्याः प्रासादमुपधारयन्। तत्र कामगमं दिव्यं सर्वरत्नविभूषितं। विमानं देवराजस्य शुशुभे खेचरं शुभं। तत्र देवास्त्रयस्त्रिं
शत्तिष्ठन्ति सहवासवाः। गन्धर्वा राक्षसाः सर्पाः पितरश्च महर्षयः। तथा राजा वसुमना बलाक्षः सुप्रतर्दनः। अष्टकश्च शिबिश्चै
व ययातिर्नहुषो गयः। मनुः क्षुपो रघुर्भानुः कृशाश्वः सगरो नलः। विमाने देवराजस्य समदृश्यन्त सुप्रभाः। अग्नेरीशस्य सो
कुपः क्षु

अष्टौ वसव रुद्रा एकादश द्वादशादित्या अश्विनौ वेति॥

ह्यमं तु सोग्रसेनां यां गंधर्वाणां हे मनोः डानूत्व वमालिकरत्नान्॥१

विराट

मस्य वरुणस्य प्रजापतेः॥ तथा धातुर्विधातुश्च कुबेरस्य यमस्य च॥ अलंबुषोग्रसेनानां गंधर्वस्य च तुंबरोः॥ यथा भागं यथोद्देशं
विमानानि चकाशिरे॥ सर्वा देवनिकायाश्च सिद्धा ब्रह्मर्षयस्तथा॥ अर्जुनस्य कुरूणां च द्रष्टुं युद्धमुपागताः॥ दिव्यानां तत्र माल्या
नां गंधः पुण्योथ सर्वशः॥ प्रससार वसंतादौ वनानामिव पुष्प्यतां॥ आनयत्राणिवासांसि छत्राणि व्यजनानि च रक्तारक्तानि
देवानां समदृश्यंत तिष्ठतां॥ योतेष्वाम्रजोर्जौ मसर्वव्यासमरीचिभिः॥ दिव्यागंधानुपादाय वायुर्योधानसेवत॥ प्रभासित
मिवाकाशं चित्ररूपमलंकृतं॥ संपतद्भिः स्थितैश्चापि नानारत्नावभासितैः॥ विमानैर्विविधैश्चित्रैरुपानीतैः सुरोत्तमैः॥
नां वज्रभृच्छुशुभे तत्र विमानस्थः सुरैर्वृतः॥ बिभ्रन्मालां महातेजाः पद्मोत्पलसमायुतां॥ निरीक्षमाणो बलभिन्नातृप्यत्सुमहा
हवे॥ ॥इति महाभारते विराटपर्वणि उत्तरगोग्रहे॥ ॥दृष्ट्वा व्यूढान्यनीकानि कुरूणां पांडुनंदनः॥ तत्र वैराटिमासाद्य पांड
वो वाक्यमब्रवीत्॥ जांबूनदमयी वेदी ध्वजे यस्य प्रकाशते॥ तस्य दक्षिणतो याहि कृपः शारद्वतो यतः॥ ॥वैशंपायन उवा
तरस्मबवते च॥ ॥धनंजयवचः श्रुत्वा॥ ॥श्रुत्वा वैराटिस्त्वरितस्तदा॥ हयान्रजतसंकाशान्हेमभांडानचोदयत्॥ आनुपूर्व्यात्तु तत्सर्वं जवमास्था
य चोत्तमं॥ प्राहिणोच्चंद्रसंकाशान्कुपितानिव तान्हयान्॥ स गत्वा कुरुसेनायाः समीपं हयकोविदः॥ पुनरावर्तयामास तान् ६६

मास्यंदनः॥ देवदत्तं ददोद्द्ये॥ वीर्यवतः अतिवध्य शक्तिमत्॥ संरब्धाः कुरवः॥ महोदधिं तं शंखं॥ नाराचान् सर्पफलककोंडान्॥ अ

न्यान्स्वा तरस्वसः॥ प्रदक्षिणमुपावृत्य मंडलं सव्यमेव च॥ कुरूनसंमोहयामास मत्स्यो यानेन तत्त्ववित्॥ कृपस्य रथमास्था
य वैराटिरकुतोभयः॥ प्रदक्षिणमुपावृत्य तस्थौ तस्याग्रतो बली॥ ततोर्जुनः शंखवरं देवदत्तं महास्वनं॥ प्रदध्मौ रथमास्थाय
नाम विश्राव्य चात्मनः॥ तस्य शब्दो महानासीद्धम्यमानस्य जिष्णुना॥ यथा वीर्यवतः संख्ये पर्वतस्येव दीर्यतः॥ पूजयांचक्रिरे
शंखं कुरवः ससैनिकाः॥ अर्जुनेन समाध्मातः शतधा यन्न दीर्यते॥ दिवमावृत्य शब्दस्तु निवृत्तः शुश्रुवे पुनः॥ सृष्टो मघवता वज्रः
प्रपतन्निव पर्वते॥ एतस्मिन्नंतरे वीरो बलवान्सत्यविक्रमः॥ दृष्ट्वा पार्थं शारद्वतः कृपः॥ अर्जुनं प्रति संरब्धो युद्धार्थी
स महारथः॥ महोदधिजमादाय दध्मौ वेगेन वीर्यवान्॥ स तु शब्देन लोकांस्त्रीनावृत्य रथिनां वरः॥ धनुरादाय सुमहज्ज्याशब्दम
कारयत्॥ तौ वीरौ सूर्यसंकाशौ योत्स्यमानौ महाबलौ॥ शारदाविव जीमूतौ व्यरोचेतां व्यवस्थितौ॥ ततः शारद्वतस्तूर्णं पार्थं द
शभिराशुगैः॥ विव्याध परवीरघ्नं निशितैर्मर्मभेदिभिः॥ पार्थोपि विश्रुतं लोके गांडीवं परमायुधं॥ विकृष्य चिक्षेप बहून्नारा
चान्मर्मभेदिनः॥ तानप्राप्ताञ्छितैर्बाणैर्नाराचान्रक्तभोजनान्॥ कृपश्चिच्छेद पार्थस्य शतशोथ सहस्रशः॥ ततः पार्थश्च संक्रुद्ध
श्चित्रान्मार्गान्प्रदर्शयन्॥ दिशः प्रच्छादयामास बाणैः प्रदिशस्तथा॥ एकच्छायमिवाकाशं प्रकुर्वन्सर्वतः प्रभुः॥ प्राच्छादयदमे

घासास्त्वत्रुंतरास्तिनात्॥

विराट

सपार्थः शरजालेन कृत्वा गौरवं प्ररुद्धं। हस्तावापं हस्तस्तिवं कांडवृष्टिं। अवपीडयदन्नारः कवचात् कवचेन रथस्य शक्तिरथो वा शारा को।

सपार्थः शरजालेन रूपं। महारोरहीतः क्रुद्धः ज्वलितरश्मिशिखोपमैः। शरैः शतसहस्रेण पार्थमप्रतिमौजसं। अर्द्दयित्वा महा
नादं ननाद समरे कृपः। ततः कनकपुंखाग्रैर्वीरः सन्नतपर्वभिः। धनुरादाय विव्याध पार्थं दशभिराशुगैः। शरस्तु गांडीवनिर्मु
क्तैरर्जुनेन महात्मना। जितः। चतुर्भिश्चतुरस्रो। घोरविध्यत्परमेषुभिः। तदृष्ट्वा विशिखैस्त्याजिताल्लक्ष्मीः पावकोपमैः। तउत्स
हमानर्ककृपः स्थानादधोव्यवत। च्युतं गौतममालोक्य स्थानात् कुंतीसुतस्तदा। नाविध्यत्परवीरघ्नो रक्षमाणोस्य गौरवं। स लब्ध
लक्ष्यस्तु नग्स्तानं गौतमः सव्यसाचिनं। विव्याध दशभिर्वाणैस्त्वरितः कंकपत्रिभिः। ततः पार्थो धनुस्तस्य भल्लेन निशितेन ह। चिच्छेद क
नकपुंखस्य प्राणथादरत। अथास्य कवचं बाणैर्निशितैर्मर्मभेदिभिः। व्यधमन्नत्र पार्थोस्य शरीरमवपीडयत्। तस्य निर्मुच्य
मानस्य कवचात् काय आबभौ। समये मुच्यमानस्य सर्पस्येव तनुर्यथा। छिन्ने धनुषि पार्थेन सोन्यदादाय कार्मुकं। चकार गौतमः
सज्यं तदद्भुतमिवाभवत्। स तदप्यस्य कौंतेयश्चिच्छेद नतपर्वणा। एवमन्यानि चापानि बहूनि कृतहस्तवित्। शारद्वतस्य चिच्छेद पांडवः
परवीरहा। स छिन्नधनुरादाय रथशक्तिं प्रतापवान्। प्राहिणोत् पांडुपुत्राय प्रदीप्तामशनीमिव। तामर्जुनस्तदायांतीं शक्तिं हेमविभूषि
तां। वियद्गतां महोल्काभां चिच्छेद दशभिः शरैः। सापतद्दशधा छिन्ना भूमौ पार्थेन धीमता। युगमध्ये तु भल्लैस्तु ततः स सध ६७

६ धन्वैव नः तैस्तु ततः

प्रतिमार्गमथागता पांचालात् रक्षितुमिच्छता। अमर्कं विसृतानीमेलकं अपाजहुः पलायितं वतः। हेहेत्स्वरवत यान्यान्येरथ्य

नुः कृप। तमाशु निशितैः पार्थो विव्याध दशभिः शरैः। ततः पार्थो महातेजा विशिखानग्नितेजसः। चिक्षेप म
मरक्तश्च युयादश शिलाशितान्। अथास्य युगमेकेन चतुर्भिश्चतुरो हयान्। षष्ठेन च शिरः कायात्सा
रथेः पत्रिणा तथा। त्रिभिस्त्रिवेणुं समरे द्वाभ्यामक्षं महारथः। द्वादशेन च भल्लेन चकर्तास्य ध्वजं तथा। ततो वज्र
निकाशेन फाल्गुनः प्रहसन्निव। त्रयोदशेनेंद्रसमः कृपं वक्षस्यविध्यत। स छिन्नधन्वा विरथो हताश्वो हतसारथिः
गदापाणिरवप्लुत्य तूर्णं चिक्षेप तां गदां। सा तु मुक्ता गदा गुर्वी कृपेणासुपरिष्कृता। अर्जुनेन शरैर्नुन्ना प्रतिमार्गम
थागता। ततो योधाः परीप्संतः शारद्वतममर्षणं। सर्वतः समरे पार्थं शरवर्षैरवाकिरन्। ततो विराटस्य सुतः सव्य
मावृत्य वाजिनः। यमकं मंडलं कृत्वा तान् योधान् प्रत्यवारयत्। ततः कृपमुपादाय विरथं ते नरर्षभाः। अपाजहुर्महा
वेगाः कुंतीपुत्राद्धनंजयात्।। ।।महाभारते विराटपर्वणि उत्तरगोग्रहे कृपापयाने।। ।।वैशंपायन उवाच।। कृ
पेपनीते द्रोणस्तु प्रगृह्य विपुलं धनुः। अभ्यद्रवदनाधृष्यः शोणाश्वः श्वेतवाहनं। स तु रुक्मरथं दृष्ट्वा गुरुमायांतमंतिकात्
अर्जुनो रथिनां श्रेष्ठ उत्तरं वाक्यमब्रवीत्।। अर्जुन उवाच।। अत्रैषा कांचनी वेदी प्रदीप्ताग्निशिखोपमा। उच्छ्रिता
प्रवरे दंडपताका भिरलंकृता। अत्र मां वह भद्रं ते द्रोणानीकाय मारिष। अश्वाः शोणाः प्रकाशंते बृहंतश्चारुवा

हे

आचार्य्यशिष्यौ द्रोणार्जुनौ। इतिकर्म्मप्रतिकूलं कर्म्म दुर्य्योधनस्य॥

विराट दिनः॥ स्निग्धविद्रुमसंकाशास्ताम्रास्याः प्रियदर्शनाः॥ युक्ता रथवरे यस्य सर्वशिक्षाविशारदाः॥ दीर्घबाहुर्महातेजा बल
रूपसमन्वितः। सर्वलोकेषु विख्यातो भारद्वाजः प्रतापवान्॥ बुद्ध्या तुल्यो ह्युशनसा बृहस्पतिसमो नये॥ वेदास्तथैव च
त्वारो ब्रह्मचर्य्यं तथैव च। ससंहाराणि दिव्यानि सर्वाण्यस्त्राणि मारिष॥ धनुर्वेदश्च कार्त्स्न्येन यस्मिन्नित्यं प्रतिष्ठितः॥ क्षमा द
मश्च सत्यं च आनृशंस्यमथार्जवं॥ एते चान्ये च बहवो यस्मिन्नित्यं द्विजे गुणाः॥ तेनाहं योद्धुमिच्छामि महाभागेन संयुगे॥ त
स्मात्त्वं प्रापयाचार्य्यं क्षिप्रमुत्तर वाहय॥ वैशंपायन उवाच॥ अर्जुनेनैवमुक्तस्तु वैराटिर्हेमभूषितान्॥ चोदयामास
तानश्वान् भारद्वाजरथं प्रति। तमापतन्तं वेगेन पाण्डवं रथिनां वरं॥ द्रोणः प्रत्युद्ययौ मत्तो मत्तमिव द्विपं॥ ततः प्राध्मा
पयच्छंखं भेरीशतनिनादितं॥ प्रचुक्षुभे बलं सर्वमुद्धूत इव सागरः॥ अथ शोणान्सदश्वांस्तान्हंसवर्णैर्मनोजवैः॥ मि
श्रितान्समरे दृष्ट्वा व्यस्मयन्त रणे नराः॥ तौ रथौ वीर्य्यसंपन्नौ दृष्ट्वा संग्राममूर्द्धनि॥ आचार्य्यशिष्यौ विजितौ कृतविद्यौ मनस्विनौ।
समा श्लिष्टौ तदान्योन्यं द्रोणपार्थौ महारथौ॥ दृष्ट्वा प्राकंपत मुहुर्भरतानां महद्बलं॥ हर्षयुक्तस्ततः पार्थः प्रहसन्निव वीर्य्यवान्॥ ६८
रथं रथेन द्रोणस्य समासाद्य महारथः॥ अभिवाद्य महाबाहुः सान्त्वपूर्वमिदं वचः॥ उवाच श्लक्ष्णया वाचा कौन्तेयः पर
वीरहा। उषिताः स्मो वने वासं प्रतिकर्म्म चिकीर्षवः॥

प्रहर्त्तेप्रहारस्मात॥ आचार्य्यदय्य दचवारितवान्॥

कर्त्तुं नार्हसि कोपं नः सदा समरदुर्जय। त्वया तु प्रहृते पूर्वं प्रहरिष्याम्यहं तव। इति मे वर्त्तते बुद्धिस्तद्भवान्क्षन्तुमर्हति
। ततोऽस्मै प्राहिणोद्द्रोणः शरानधिकविंशतिं॥ अप्राप्तांश्चैव तान्पार्थश्चिच्छेद कृतहस्तवत्॥ ततः शरसहस्रेण रथं पार्थस्य
वीर्यवान्। अवाकिरत्ततो द्रोणः शीघ्रमस्त्रं विदर्शयन्॥ हयांश्च रजतप्रख्यान्कंकपत्रैः शिलाशितैः॥ अवाकिरदमेयात्मा पार्थं
संकोपयन्निव। एवं प्रववृते युद्धं भारद्वाजकिरीटिनोः॥ समं विमुंचतोः संख्ये विशिखान्दीप्ततेजसः॥ तावुभौ ख्यातकर्माणावुभौ
वायुसमौ जवे। उभौ दिव्यास्त्रविदुषावुभावुत्तमविक्रमौ॥ क्षिपंतौ शरजालानि मोहयामासतुर्नृपान्॥ व्यस्मयंत ततो योधाः सर्वे
तत्र समागताः॥ शरान्विसृजतोस्तूर्णं साधु साध्विति पूजयन्॥ द्रोणं हि समरे कोऽन्यो योद्धुमर्हति फाल्गुनात्॥ रौद्रः क्षत्रियधर्मोऽयं गुरु
णा यदयुध्यत। इत्यब्रुवन्जनास्तत्र संग्रामशिरसि स्थिताः॥ तौ वीरौ वति संरब्धौ संनिकृष्टौ महारथौ॥ छादयेतां शरव्रातैरन्योन्यमप
राजितौ॥ विस्फार्य्य सुमहच्चापं हेमपृष्ठं दुरासदं॥ संरब्धोऽथ भरद्वाजः फाल्गुनं प्रत्ययुध्यत। सायकैर्मायैः कीर्णैरर्जुनस्य रथं प्रति। भानु
मद्भिः शिलाधौतैर्भानोः प्राच्छादयत्प्रभां। पार्थं च स महाबाहुर्महावेगैर्महारथः॥ विव्याध निशितैर्बाणैर्मेघो वृष्ट्येव पर्वतं॥ तथैव दिव्य
गांडीवं धनुरादाय वार्जुनः॥ शत्रुघ्नं वेगवान्हृष्टो भारसाधनमुत्तमं। विससर्ज शरांश्चित्रान्सुवर्णविकृतान्बहून्॥ नाशयन्भर

विराट

मन्नाविरहषन्नाविनिशापः॥

वर्षाणि भारद्वाजस्य वीर्यवान्॥ हर्षयंश्चापि विमुक्तान्ति तदद्भुतमिवाभवत्॥ परस्थेन च रत्नपार्थः प्रेक्षणीयो धनंजयः॥ युगपद्दिक्षु स
र्वास्तु सर्वशस्त्राणि दर्शयन्॥ एकच्छायमिवाकाशं बाणैश्चक्रे धनंजयः॥ नादृश्यत तदा द्रोणो नीहारेणेव संवृतः॥ तस्याभवत्तदा रू
पं संवृतस्य शरोत्तमैः॥ यथा ज्वलमानस्य पर्वतस्येव सर्वशः॥ दृष्ट्वा पार्थस्य तु रणे शरैः स्वरथमावृतं॥ स विस्फार्य धनुःश्रेष्ठं मे
घस्तनितनिस्वनं॥ अग्निचक्रोपमं घोरं॥ विकर्षन्परमायुधे॥ व्यपातयत्स्वाणांस्तान्बाणान् द्रोणः समरशोभनः॥ महान्वत्ततः शब्दो
वंशानामिव दह्यतां॥ जांबूनदमयैः पुंखैश्चित्रचापवरातिगैः॥ प्राच्छादयदमेयात्मा दिशः सूर्यस्य च प्रभाः॥ ततः कनकपुंखानां श
राणां नतपर्वणां॥ वियच्चराणां वियति दृश्यंते बहवो व्रजाः॥ द्रोणस्य पुंखसक्ताश्च प्रभवंतः शरासनात्॥ एको दीर्घ इवादृश्यद
काशे संहतः शरः॥ एवं तौ स्वर्णविकृतान्विमुंचंतौ महाशरान्॥ आकाशं संवृतं वीरावुल्काभिरिव चक्रतुः॥ शरास्तयोश्च वि
बभ्रुः कंकबर्हिणवाससः॥ पंक्तिः शरदि खस्थानां हंसानांवरतामिव॥ युद्धं समभवत्तत्र संरब्धं महात्मनोः॥ द्रोणपांडवयोर्घोरं वृत्र
सवयोरिव॥ तौ गजाविव संरब्धौ विषाणाग्रैः परस्परं॥ शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः॥ तौ व्यवहरंतौ शूरौ संरब्धौ रणशोभिनौ ५३

६५

७सुविशाणामिवस्तनतःप्लायमानांद्रौणकृपायांगतावितिधनंजयो॥

उदीरयंतौ समरे दिव्यान्यस्त्राणि नानाशः॥ ऋ यत्नाचार्यमुख्येन शरान्स्तान्हि शिलाशितान्॥ न्यवारयच्छितैर्बाणैरर्जु
नो जयतां वरः॥ दर्शयन्वीक्षमाणानामस्त्रमुग्रपराक्रमः॥ इषुभिः सूक्ष्ममाकाशं बहुभिः समवाहृणोत्॥ जिघांसंतं नरव्याघ्रम
र्जुनं तिग्मतेजसं॥ आचार्यमुख्यः समरे द्रोणः शस्त्रभृतां वरः॥ अर्जुनेन सहाक्रीडच्छरैः सन्नतपर्वभिः॥ दिव्यान्यस्त्राणि मुंचन्तमा
रवानो महारणे॥ अस्त्रैरस्त्राणि संवार्य फाल्गुनं समयोधयत्॥ तयोरासीत्संप्रहारः क्रुद्धयोर्नरसिंहयोः॥ अमर्षिणोस्तदान्योन्यं देव
दानवयोरिव॥ ऐंद्रं वायव्यमाग्नेयमस्त्रमस्त्रेण पांडवः॥ द्रोणेन मुक्तं मुक्तं तु ग्रसति स्म पुनः पुनः॥ एवं शूरौ महेष्वासौ विसृजंतौ नि
शितान्शरान्॥ एकच्छायं चक्रतुस्तावाकाशं शरवृष्टिभिः॥ ततोऽर्जुनेन मुक्तानां पततां शरीरिषु॥ पर्वतेष्विव वज्राणां श्रूयते स्वनः॥ न
तो नागा रथाश्चैव सादिनश्च विशांपते॥ शोणिताक्ता व्यदृश्यंत पुष्पिता इव किंशुकाः॥ आकाशानांवनानादबत्रानिकुसुमेनरैः॥
रक्षः पाणौ शरैस्तत्र तदा सैन्यानि भारत॥ बाहुभिश्च सकेयूरैर्विचित्रैश्च महारथैः॥ सुवर्णचित्रैः कवचैर्ध्वजैश्चापि नि
पातितैः॥ योधैश्च निहतैस्तत्र पार्थबाणप्रपीडितैः॥ बलमासीत्समुद्विग्नं द्रोणार्जुनसमागमे॥ विधुन्वानौ तु तौ वीरौ धनुषी
भारसाधने॥ आच्छादयंतावन्योन्यं तितक्षुरपुंगिनः॥ तयोः समभवद्युद्धं तुमुलं लोमहर्षणं॥ द्रोणकौंतेययोस्तत्र बलिवा

शलीमठः॥

विराट

हस्तलाघविते ममइत्ता कृतेनश्रुपाखन्नाहे द्रोरितिग॥ ॥

सव्यसाचि। अथ हस्तलाघवात्स्राष्टेः शरैः सन्नतपर्वभिः। व्यदारयेतामन्योन्यं प्राणद्यूते प्रवर्तितौ। अथार्जुनो रथोदारो द्रोणं

तत्र प्रत्यं मतो। दुष्करं कृतवान्द्रोणो यदर्जुनमयोधयत्। प्रमाथिनं महावीर्यं दृढमुष्टिं दुरासदं। जेतारं देवदैत्यानां सर्पाणां च म

हारथं। अविश्रमं च शिक्षां च लाघवं दूरपातितं। पार्थस्य समरे दृष्ट्वा द्रोणस्याभूच्च विस्मयः। ततो गाण्डीवमुद्यम्य दिव्यं धनु

रमर्षणः। विचकर्ष रणे पार्थो बाहुभ्यां भरतर्षभ। तस्य बाणमयं वर्षं शलभानामिवायतिं। नच बाणान्तरप्यस्य रा[illegible]न

र्पितुं। अनिशं संदधानस्य शरानुत्सृजतस्तथा। ददृशे नान्तरं किंचित्पार्थस्याददतोपि च। तथा शीघ्रास्त्रयुद्धे वर्त

मानस्तु दारुणे। शीघ्राच्छीघ्रतरं पार्थः शरानन्यानुदीरयत्। ततः शतसहस्राणि शराणां नतपर्वणां। युगपत्प्रापतंस्तत्र द्रोणस्य रथ

मंतिकात्। आकीर्यमाणे द्रोणे तु शरैर्गाण्डीवधन्वना। हाहाकारो महानासीत्सैन्यानां भरतर्षभ। पाण्डवस्य तु शीघ्रास्त्रं मघवा प्र

त्यपूजयत्। गंधर्वाप्सरसश्चैव ये च तत्र समागता। ततो वृन्देन महता रथानां रथयूथपः। आचार्यपुत्रः सहसा पाण्डवं

प्रत्यवारयत्॥ अश्वत्थामा च तत्कर्म हृदयेन महात्मनः। पूजयामास पार्थस्य कोपं चास्याकरोद्भृशं। समन्युवशमाप ७०

न्नः पार्थमभ्यद्रवद्रणे॥ किरन्शरसहस्राणि पर्जन्य इव वृष्टिमान्। आवृत्य तु महाबाहुर्यतो द्रोणस्ततो हयान्॥

अंतरं विदधे। शीघ्रास्त्रं शीघ्रास्त्रं। शरैः सांद्रीकृतनिरंतरीकृत। पार्वांतरे छायात्रतेरुत इत्यर्थः। नवयामो व्यवछिन्नो नवे न

अंतरं प्रददौ पार्थो द्रोणस्यापसर्पितुं। स तु लब्ध्वान्तरं तूर्णमपायाज्जवनैर्हयैः। छिन्नवर्मध्वजः शूरो निकृत्तः परमेषुभिः॥

इति विराटपर्वणि उत्तरगोग्रहे द्रोणापयाने॥ ॥वैशंपायन उवाच॥ ततो द्रौणिर्महावीर्यः प्रययावर्जुनं रणे। तं

पार्थः प्रतिजग्राह वातोल्लोगमिवोद्धतः। शरजालेन महता वर्षमाण इवाम्बुदः। ततो देवासुरसमः सन्निपातस्तयोरभू

त्। किरतोः शरजालानि वृत्रवासवयोरिव। न स्म सूर्यो दिवा भाति न च वाति समीरणः। शरसंघैः कृते व्योम्नि छादिते कृते सम शरैःसांद्री कृतेपावः।

ततः महाश्चट्चटाशब्दो योधयोर्युध्यमानयोः। दह्यतामिव वेणूनामासीत्परपुरंजय। हयानस्यार्जुनः सर्वान्कृतवानल्पजी

वितान्। राजन्न निर्ज्ञानैतिदिशं कांचन माद्दिना। ततो द्रौणिर्महावीर्यः पार्थस्य विचरिष्यतः। विवरं सूक्ष्ममालोक्य ज्या

छिच्छेद क्षुरेण सः। तदस्यापूजयन्देवाः कर्म दृष्ट्वातिमानुषं। द्रोणो भीष्मश्च कर्णश्च कृपश्चैव महारथः। साधु साध्विति भाषन्तः पू

जयन्कर्म तस्य तत्। ततो द्रौणिर्धनुःश्रेष्ठमपकृष्य रथर्षभः। पुनरेवाहनत्पार्थं हृदये कंकपत्रिभिः। ततः पार्थो महाबाहुः

प्रहस्य स्वनवद्वदा। योजयामास नवया मौर्व्या गाण्डीवमोजसा। ततोर्धचन्द्रमावृत्य तेन पार्थः समागमत्। वारणेन

मत्तेन मत्तो वारणयूथपः। ततः प्रववृते युद्धं पृथिव्यामेकवीरयोः। रणमध्ये द्वयोरेव सुमहल्लोमहर्षणं। तौ वीरौ द

विराट

विजयं तिशिखं जयं॥

दृष्ट्वाः सर्वे कुरवो विस्मयाविष्टाः॥ युध्यमानौ महावीर्यौ द्वैरथ्यया विवसन्तौ॥ तौ समाजग्मतुर्वीरावन्योन्यं तु रुषषर्षितौ॥
शरैराशीविषाकारैर्ज्वलद्भिरिव पन्नगैः॥ अर्जुनस्याविशुद्धारिर्वीरो पांडवस्य महात्मनः॥ ततः पार्थो गाण्डीवं
गिरिरिवाचलः॥ अश्वत्थामास्तु नहानाद्विषमन्यस्य तेरणे॥ जग्मुः परिक्षयं रक्षसमन्देनाधिको र्जुनः॥ ततः कर्णो
महद्धापविस्फार्य स्पाध्यधिकं रुषा॥ अवाक्षिपन्नतः शब्दो हाहाकाराः महानभूत्॥ ततश्चक्षुर्दधे पार्थो यत्र विस्फार्यत
धनुः॥ ददर्श तत्र राधेयं क्रोधस्तस्मान्नवर्द्धतः॥ स रोषवशमापन्नः कर्णमेव जिघांसया॥ संप्रेक्षत विवृत्ताभ्यां नेत्राभ्यां
कुरुपुंगवः॥ तथा तु विमुखं पार्थ्यं द्रोणपुत्रस्य सायकान्‌ चक्रिताः कुरवो राजन्‌ गुणानिन्यः सहस्रशः॥ उत्सृज्य तु म
हाबाहुः द्रोणपुत्रं धनंजयः॥ अभिदुद्राव सहसा कर्णमेव सपत्नजित्॥ तमभिद्रुत्य कौन्तेयः क्रोधसंरक्तलोचनः॥ का
मयन्द्वैरथे तेन तमिदं वचनमब्रवीत्॥ ॥इति विराटपर्वणि उत्तरगोग्रहे अश्वत्थामयुद्धं॥ ॥कर्ण यत्तत्सभामध्ये ब
हुवाचो विकत्थितं॥ न मे युधि समो स्तीति तदिदं समुपस्थितं॥ सो द्य कर्ण मया सार्द्धं व्यवहृत्य महामृधे॥ ज्ञास्यस्यबलमा ७१
त्मीयं न चान्यानवमंस्य से॥ अवाचः परुषा वाचो धर्ममुत्सृज्य केवलं॥ इदं तु दुष्करं मन्ये यदिदं ते चिकीर्षितं॥ यत्त्वया
कथितं पूर्वं मामनासाद्य किंचन॥

अतिशेत इति तिवाक्यं कर्इकर्माणि शते कर्माणि कामति यावानिर्दे॥ तथा तव क्रियारास्तीति ख्यातमवदृष्टियां नाचत्त्वाधमाणां तरथद्वयमि सादृशाया
मयामाप्स्यमिति यदुक्तं तत्सत्यादाय इति पुनस्पराक्रमं दृष्ट्वा नाच दृष्टो दर्शितः पराक्रमो मम मतः पराक्रम इति भावः॥ तस्त्वाके तेनि वापार्थः॥

तद्य कुरुराधेय कुरुमध्ये मया सह॥ यस्मनायां च पांचाली क्लिश्यमानां दुरात्मभिः॥ दृष्टवानसि तस्याद्य फलमाप्नुहि केवलं॥ ध
र्मपाशनिबद्धेन यन्मया मर्षितं पुरा॥ तस्य कोपस्य राधेय विपाकं पश्य मे मृधे॥ वने द्वादशवर्षाणि यानि सोढानि दुर्मते॥ त
स्याद्य प्रतिकोपस्य फलं प्राप्नुहि संगरे॥ एहि कर्ण मया सार्द्धं प्रतिपद्यस्व संगरे॥ प्रेक्षकाः कुरवः सर्वे भवन्तु तव सैनिकाः॥
कर्ण उवाच॥ ब्रवीषि वाचं यां पार्थ कर्मणा तां समाचर॥ अतिशेते हि ते वाक्यं कर्मेति प्रथितं भुवि॥ यत्त्वया मर्षितं पूर्वं तदशा
क्तेन मर्षितं॥ इतिगृह्णामि ते पार्थ दृष्ट्वा ते पराक्रमं॥ धर्मपाशनिबद्धेन यदि ते मर्षितं पुरा॥ तथैव बद्धमात्मानमबद्धमिव मन्यसे
॥ यदि तावद्वने वासो यथोक्तश्चरितस्त्वया॥ तत्त्वं धर्मार्थविक्लिष्टः समयं छेत्तुमर्हसि॥ यदि शक्रः स्वयं पार्थ युध्यते तव कारणात्‌॥ तथा
पि न व्यथा काचिन्मम स्याद्विक्रमिष्यतः॥ अयं कौन्तेय कामस्ते नचिरात्समुपस्थितः॥ योत्स्यसे हि मया सार्द्धमद्य द्रक्ष्यसि केवलं
॥ अर्जुन उवाच॥ इदानीमेव तावत्त्वमपयातो रणान्मम॥ तेन जीवसि राधेय निहतस्त्वनुजस्तव॥ भ्रातरं घा
तयित्वा कस्त्यक्त्वा रणशिरश्च कः॥ त्वदन्यः पुरुषः सत्सु ब्रूयादेवं व्यवस्थितः॥ वैशंपायन उवाच॥

नत्वक्तं धर्मपाशनिबद्धेन तितत्स्वत्पाद धर्मपाशेनेतिऋव मन्यमानस्यानवमन्यासवयमविहांम इति बुध्यमानस्य नरितिन्यावा॥ वनवासो द्वादशवर्षा
त्मकः कृच्छ्रं तत्र योद्धव पार्थिकं ते तु मिच्छमित्रयो द्वावर्षम्यामस्यकुचालचादिति भावः॥ नयंच कृष्णमिदनः शिथिलभवद्भिः मिथ्याधिजिनादमनप्र

विराट

निर्गमस्या

।मार्जुनोऽभ्यद्रव्यमाणोऽभ्यसद्मानाः।निषंगस्यावलंबनं रज्जं उपासंगात्तूणात्।उदकोशात् हासीत्यकारात्॥

इतिकर्णंब्रुवन्नेवबीभत्सुरपराजितः।अभ्ययाद्विसृजन्बाणान्कायावरणभेदिनः।प्रतिजग्राहतान्कर्णः शरानग्निशि
खोपमान्।शरवर्षेणमहतावर्षमाणइवांबुदः।उत्पेतुः शरजालानिघोररूपाणिसर्वशः।अविध्यदश्वान्बाहोश्चहस्ता
वापंपृथक्पृथक्॥सोऽमृष्यमाणःकर्णस्यनिषंगस्यावलंबनं।निशिताग्रेणचिच्छेदशरेणानतपर्वणा।उपासंगादुपा
दायकर्णोबाणानथापरं।विव्याधपांडवंहस्तेतस्यमुष्टिरशीर्यत।ततःपार्थोमहाबाहुःकर्णस्यधनुरच्छिनत्।सशक्तिंप्राहि
णोत्तस्मैतांपार्थोव्यधमच्छरैः।ततोऽभिपेतुर्बहवोराधेयस्यपदानुगाः।तांश्चगांडीवनिर्मुक्तैःप्राहिणोद्यमसादनं।ततोऽस्य
श्वाञ्छरैस्तीक्ष्णैर्बीभत्सुर्भारसाधनैः।आकर्णमुक्तैरभ्यघ्नंस्तेहताःप्रापतन्भुवि।अथापरेणबाणेनज्वलितेनमहौजसा
विव्याधकर्णंकौंतेयस्तीक्ष्णेनोरसिवीर्यवान्॥तस्यभित्त्वातनुत्राणंकायमभ्यगमच्छरः।ततःसतमसाविष्टोनस्मकिंचि
८ त्प्रजज्ञिवान्।सगाढवेदनोहित्वापार्थंप्रायादुदङ्मुखः।ततोऽर्जुनउदक्रोशदुत्तरश्चमहाबलः॥ इतिमहाभारतेविराटपर्वणिगो
त्तरगोग्रहेकर्णापयाने॥ वैशंपायनउवाच॥ ॥ततोवैकर्तनंजित्वापार्थोवैराटिमब्रवीत्॥ एतन्मांप्रापया
नीकंयत्रतालोहिरण्मयः।यत्रशांतनवोभीष्मोरथेऽस्माकंपितामहः।कांक्षमाणोमयायुद्धंतिष्ठत्यमरदर्शनः।अथ ७२
सैन्यंमहद्दृष्ट्वारथनागहयाकुलं।अब्रवीदुत्तरःपार्थ

संवतिपावः

संयतिसंग्राम।समागमेऽपप्लवतउपप्लवः।पार्वंतरस्यपृष्ठंमंडलाकारं।संकुलानलमंगारसंस्पन्नामरोणचक्राकार॥

नातिविद्धःशरैर्नाहं।नशक्ष्यामिवीराहंनियंतुंतवयोत्तमान्।विषीदंतिममप्राणामनोविह्वलतीवमे।अस्त्राणामिवदिव्या
नांप्रभावसंप्रयुज्यतां।ह्ययानेकुरुनिर्मुक्तंसमंताद्विशोदश।गंधेनमूर्छितश्चास्मिवसामेदोसृजस्तथा।दृश्यदत्तमनोमे
द्वैधासमिवप्रपश्यत।अदृष्टपूर्वःशूराणांमयासैन्यसमागमे।गदानांपाततांचैवशंखानांनिस्वनेनच।सिंहनादैश्च
नागानांगजानांबृंहितैस्तथा।गांडीवस्यचनिर्घोषेणवज्रघोषसमेनच।श्रुतिःस्मृतिश्चमेवीरप्रनष्टाहिमनसः।अलात
चक्रप्रतिमंमंडलंसततंत्वया।व्याक्षिप्यमाणंसमरेगांडीवंचापिपश्यतः।दृष्टिर्विचलितावीरहृदयंदीर्यतीवमे।वपुश्चोग्रंचते
वीरक्रुद्धस्येवपिनाकिनः।व्यायच्छतःशरान्ननंदृष्ट्वामेभीर्भवत्यपि।नाददानंनसंधानंनमुंचंतंशरोत्तमान्।त्वामहंसंपश्य
मिपश्यन्नपिविचेतनः।अवसीदंतिमेप्राणाभ्रमतीवचमेधरा।नचप्रतोदंरश्मींश्चसंयंतुंशक्तिरस्तिमे॥ ॥अ
र्जुनउवाच॥ ॥माभैषीःस्तंभयात्मानंत्वयापिनरपुंगव।अत्यद्भुतानिकर्माणिकृतानिरणमूर्धनि।राजपुत्रोऽसिभद्रं
तेकुलेजातश्चविश्रुतः।जातस्त्वंशत्रुदमनानविषीदितुमर्हसि।धृतिंकृत्वासुविपुलांराजपुत्ररथेस्थितः।युध्यमान
स्यमेसमरेहयान्यच्छस्वशत्रुहन्॥ वैशंपायनउवाच॥ एवमुक्त्वामहाबाहुर्वैराटिंनरसत्तमः।अर्जुनोरथिनां

नटन

यावक्कस्यपदेशान्तन्युमंधनतःतमम्यग्रणांमत्यपषपस्माचवो।संधनमितिचापावः।यत्तसंधनंतवेतिशेषः॥

स्तनयित्नोर्मेघस्याकुरूणां चनं वनमिव च्छेत्स्यं पाणपादयः शाखावाइवशा खास्तु त्यक्त्वाना। निर्निरंतरं कृत्यं तेन प्राप्या। नैवतयात्र

विराट अष्टः स्तुतराखेदमब्रवीत्। सिन्यायमास्तु नीषाम्पशाम्याम्पत्वेतदेवमं॥ अत्रोस्यामपृह ममतस्य धनुज्यामिपिचादवे। अस्यंतं दिव्य

मस्त्रं मा चित्रमहा निशाम या शत्रूरामि वायां तेस्त्वन यित्नो रिवांबरं। सुवर्णपृष्टं गांडीवं ददृश्यं तिकरवोमम। दक्षिणेनाथ वामन

कृतारणा विदूस्यति। इति मामं गताः सार्वतश्च यिष्यंति शात्रवः। शोणितोदां रथावर्त्तां नागनक्रां दुरत्यया। नंदीप्रस्कंदयिष्या मिप

रलोकप्रवाहिनीं। पाणिपादशिरः पृष्टबाहुशाखा निरंतरं। वनं कुरूणां छेत्स्यामि शरैः सन्नतपर्वभिः। जयतः कौरवीं सेनां

कुरू समय्येकं ममधन्विनः। शतं मार्गा भविष्यंति पावकस्येव कानने। मया चक्रमिवाविद्धं सैन्यं द्रक्ष्यति केवलं। इष्वस्त्रे

शिक्षितं चित्रमद्य दृशीयितं। स्मितं। असंभ्रांतारय्यति ष्ठनसम मतुविषामस्तुवा। दिवमाहत्य तिष्ठंतं गिरिं शिघांम्मपत्रिनि

:॥ अहं मिंद्रस्य वचनात्संग्रामेऽभ्यहनं पुरा। पौलोमान्कालकंजांश्च सहस्राणि शतानि च। अहमिंद्राद्दृढां मुष्टिं ब्रह्मणः कृत

स्तांः प्रगाढं तुमुलं चित्रमत्यशिक्षं प्रजापतेः। अहं पारं समुद्रस्य हिरण्यपुरवासिनां। जित्वा षष्टिसहस्राणि रथिनामुग्रधन्विनां

।शाप्यमाणा निन्हता निग्रहात्मनवब्रासुता। मयाकुरुणांहृदानिपात्यमाना निपतस्वे। ध्वजवृक्षे पत्तितृणं रथसिंहगणाकुले। एवं

माहायथिष्या मिकुरूणा मस्त्रतेजसा। तानहं रथमध्यस्थां चारेः सन्नतपर्वभिः। यतास्रवानतिबलान्योत्स्यमानान्वधिनान्। बन

यविध्यमित्यवाहादिवमाहत्यतिष्ठंतां सुष्टिदाद्यामिवानि। निनोषाणामिस्वरसात्। विकृष्यध्वजन्यपातयदिव्यव्रयः। तदिष्य स्त्ररथं

चक्र ५

विराटपर्व ॥ ७३

उपाहस्यप्रसाहत्यतमपि विकर्णमपिसविकर्णः कुर्योधिनश्चाता॥

दुःशल्स्त्रै वरुणा

पकःसंकालयिष्यामि वज्रपाणिरिवासुरान्॥ रोडंरुडोदेवि वारुणं। अस्तुमा मयमगेश्च वायव्यं यातरिश्वनः। वज्रादीनितथा

स्त्राणिशक्रादहमवाप्नवान्। धार्तराष्ट्रवनं घोरं नरसिंहाभिरक्षितं। अहमुत्सादयिष्यामि विराटात्मज तत्वतः॥ ॥वैशंपायन उवा

च॥ एवमाश्वासितस्तेन वैराटिः सव्यसाचिना। अवगाह्य तदानीकं भीमं भीष्माभिरक्षितं। तमायांतं महाबाहुं जिगीषंतं र

णे कुरून्। अभ्यवारयदव्यग्रः क्रूरकर्मा पगासुतः। तस्य जिष्णुरुपावृत्य ध्वजं मूलेन्य कृंतत। विकृष्य कलधौताग्रैः पृषत्कैः पात

यद्यात्। तं चित्रमाल्याभरणाः कृतविद्या मनस्विनः। आगच्छन्भीमधन्वानं चत्वारस्तु महाबलाः। दुःशासनो विकर्णश्च

दुःसहो थ विविंशतिः। आगत्य भीमधन्वानं बीभत्सुं पर्य्यवारयन्। दुःशासनस्तु भल्लेन विद्ध्वा वैराटिमुत्तरं। द्वितीयेना

र्जुनं वीरः प्रत्यविध्यत्स्तनांतरे। तस्य जिष्णुरुपावृत्य पृथुधारेण कार्मुकं। चकर्त गार्द्धपत्रेण जातरूपपरिष्कृतं। अथैनं

पंचभिः पश्चात्प्रत्यविध्यत्स्तनांतरे। सोपयातो रणं हित्वा पार्थबाणप्रपीडितः। तं विकर्णः शरैस्तीक्ष्णैर्गार्द्धपत्रैरजिह्मगैः

विव्याध परवीरघ्नमर्जुनं धृतराष्ट्रजः। ततस्तमपि कौंतेयः शरेणानतपर्वणा। ललाटेऽभ्यहनत्तूर्णं स विद्धः प्रापतद्रथात्। तत

<विं> :पार्थमभिद्रुत्य दुःसहः सविविंशतिः। अवाकिरच्छरैस्तीक्ष्णैः परीप्सन्भ्रातरं रणे। तावुभौ गार्द्धपत्राभ्यां निशिताभ्यां धनंजयः विध्वा

श्चयंश्चस्तद्द्यत्सारितो वाज्ञरथोपस्थानि रक्षितान्यश्ववेगेन स्थानानि तत्र न्पःपतितेरथवेगने ॥ ज्ञातरूपस्वजानि ज्ञातरूपस्यध्वगास्य

विराट स्तुगपदव्यवस्त्रातावाहानस्तद्द्यत ॥ तोदितास्त्रौ वि विशीर्णो ध्वजराज्ञान्महात्मनां ॥ अनिपद्यगेयरन्पेरपतीनोपदाङ्गे: ॥ सर्वांदिशश्चा

न्यपतदीनस्तुरपशाजितः ॥ किरीटमाली कौंतेय्यालघलक्षो महाबलः ॥ महाभारते विराटपर्वणि उत्तरगोग्रहे ॥ वैशंपायन

उवाच ॥ ॥ अथ संगम्य सर्वे तु कौरवाणां महारथाः ॥ अर्जुनं सहिता यत्ताः प्रत्ययुध्यन्त भारत ॥ स सायकमयैर्जालैः सर्वतस्तान्म

हारथान् ॥ आच्छादयदमेयात्मा नीहार इव पर्वतान् ॥ नदद्भिश्च महानागैर्हेषमाणैश्च वाजिभिः ॥ भेरीशंखनिनादैश्च स शब्दस्तु

मुलोभवत् ॥ नागाश्वकायान्निर्भिद्य लोहानि कवचानि च ॥ पार्थस्य शरजालानि विनिष्पेतुः सहस्रशः ॥ त्वरमाणः शरानस्यन् पा

ण्डवः स बभौ रणे ॥ मध्यंदिनगतो दीप्तः शरदीव दिवाकरः ॥ उपप्लवन्त वित्रस्ता रथेभ्यो रथिनस्तदा ॥ सादिनश्चाश्वपृष्ठेभ्यो भूमौ

चापि पदातयः ॥ शरैः संताड्यमानानां कवचानां महात्मनां ॥ ताम्रराजतलोहानां प्रादुरासीन्महास्वनः ॥ छन्नमायोधनं सर्वं शरीरैर्गत

चेतसां ॥ गजाश्वसादिभिस्तत्र पार्थबाणप्रपीडितैः ॥ रथोपस्थाभिपतितैरास्तृता मानवैर्मही ॥ अनृत्यदिव संग्रामे चापहस्तो धनंजयः ॥ प

श्रुत्वा गांडीवनिर्घोषं विस्फूर्जितमिवाशनेः ॥ त्रस्तानि सर्वभूतानि व्यगच्छन्त महाहवात् ॥ कुंडलोष्णीषधारीणि जातरूपस्रजानि ॥

पतितानि स्म दृश्यन्ते ॥ शिरांसि रणमूर्धनि ॥ विशिखोन्मथितैर्गात्रैर्बाहुभिश्च सकार्मुकैः ॥ सहस्ताभरणैश्चान्यैः प्रच्छन्ना भाति मेदि ७४

नी ॥

स्वतामालायुशिरस्तस्रजाज्ञदृष्टावंतावाचाणिरविवत ॥

इति स्तंतराम ध्येञ्जवरुद्धाउमा ॥ अवरुह्मिति पार्वेत्वा त्मानमित्यस्य विशेषणं ॥ शांतियशाः स्वजा वनतत्परा: ॥ धनंजरा

शिरसां पात्यमानानामंतरा निशितैः शरैः ॥ अश्मवृष्टिरिवाकाशे ह्यभवद्भरतर्षभ ॥ दर्शयित्वा तथात्मानं रौद्रं रुद्र

पराक्रमं ॥ अवरुद्धश्चरन्पार्थो वर्षाणि त्रयोदश ॥ क्रोधाग्निमोक्षणं घोरं धार्तराष्ट्रेषु पांडवः ॥ तस्य तद्दहतः सैन्य

६७ दृष्ट्वा घोरं पराक्रमं ॥ सर्वे शांतिपरा योधा धार्तराष्ट्रस्य पश्यतः ॥ वित्रास्य तत्सर्वसैन्यं विद्राव्य च महारथान् ॥ अर्जुनो जयतां श्रेष्ठ

ःपर्यवर्तत भारत ॥ प्रावर्तयन्नदीं घोरां शोणितोदां तरंगिणीं ॥ केशशैवलसंबाधां युगांते कालनिर्मितां ॥ शरचापप्लवां घोरां शो

णितोदां तरंगिणीं ॥ केशशैवलसंबाधां युगांते कालनिर्मितां ॥ शरचापप्लवां घोरां मांसशोणितकर्दमां ॥ तन्त्रीमत्स्यसमाबाधां

नागकूर्मीरथोडुपां ॥ मेदोवसासृक्प्रवहां महाभयविवर्धिनीं ॥ रौद्ररूपां महाभीमां श्वापदैरभिनादितां ॥ तीक्ष्णशस्त्रमहाग्रा

हां क्रव्यादगणसेवितां ॥ मुक्ताहारोर्मिकलिलां चित्रालंकारभूषितां ॥ शरसंघमहावर्तां नागनक्रां दुरत्ययां ॥ महारथमहाद्वी

पां शंखदुंदुभिनिस्वनां ॥ चकार महतीं पार्थो नदीं दुस्तरमस्रशोणितां ॥ आददानस्य विशिखान्संधयानस्य मुंचतः ॥ विकर्ष

तश्च गांडीवं न किंचिद्दृश्यतेंतरं ॥ ॥ इति विराटपर्वणि उत्तरगोग्रहे ॥ वैशंपायन उवाच ॥ अथ दुर्योधनः कर्णो दुःशासनविविंशती ॥ द्रोणश्च सह पुत्रेण कृपश्चातिरथो रणे ॥ पुनराययुः संरब्धा धनंजयजिघांसवः ॥ विस्फारयन्तश्चापानि बल

वन्ति दृढानि च ॥ तान्प्रकीर्णपताकेन रथेनादित्यवर्चसा ॥ प्रत्युद्ययौ महाराज समस्तान्वानरध्वजः ॥

दृश्यमानो रथे पार्थः धनंजरा इष्यसेन्यानां संवध्वा वृत्तचर्मा तु सर्वविशिरोरेष्वं तान्यां संकटानां गाढस्थितिनः पद्मवत् कर्मार्चरं सया

तान्समस्तामित्यन्वयः॥ लोमवाहिभिः सुरतीक्ष्णैः॥ बलाहक इति कस्य वर्षमिवार्जुनस्य रथाद्दिशः पतन्ते शस्त्र चित्रा निच्छ

विराट वंति हृद्यानि च। तान्श्वकाणिपताकेन रथेनादित्यवर्च्चसा। प्रत्युपयौ महाराज समंताद्वानरध्वजः॥ ततः स्वप्रभुकर्णस्थो रोग्ध्र र
थिनां वरः॥ तं महास्त्रैर्महावीर्यं परिवार्य धनंजयं। शरैर्घान्समागम्य तोजीमूता इव शारदाः॥ ववर्षुः शारवर्षाणि प्रतपंतं किं
रीटिनं। इषुभिर्बहुभिस्तूर्णं समरे लोमवाहिभिः॥ अदृश्यत्वप्रस्थायहस्त्यामा सुराहतां॥ मघावत्काम्स्य चातीहिव्यस्त्रै
ः समंततः॥ ततस्यष्टुंगुलमंपि विवृतं समदृश्यत॥ ततः प्रहस्य बीभत्सुर्दिव्यामैन्द्रमहारथः॥ अस्त्रं नादित्यसंकाशं गांडीवसम
योजयत्॥ समरश्मिभिरिवादित्यः प्रतपन्समरे॥ रवत्नी॥ किरीटमाली कौंतेयः सर्वान्प्राच्छादयत्कुरून्॥ यथा बलाहके विद्युत्पा
वको वा शिलोच्चये॥ तथा गांडीवमभवदिंद्रायुधमिवाततं॥ यथा वर्षति पर्जन्यो विद्युद्विभ्राजते दिवि॥ द्योतयंती दिशः सर्वाः

९ ःसु थिवीं च समंततः॥ तथा दशदिशस्त्व पतन्गांडीवमाहृणोत्॥ त्रस्ता रथस्था छिन्नास्त्व त्वदुःसर्वे नागाः॥ सर्वे शांति परा
न्भूचास्त्र चित्रा निनलेनिरा॥ एवं तासेनिका सात्र धर्मात्रीगंडस्य पतमन्तः॥ संग्रामं विमुखाः सर्वे योधास्ते हतचेतसः॥ एवं सर्वाणि
सैन्यानि भग्नानि भरतर्षभ॥ व्यद्रवन्त दिशः सर्वा निराशानि स्वजीविते॥ महाभारते विराटपर्वणि गोग्रहणे उत्तरगोग्रहे सेनापलायने॥
वैशंपायन उवाच॥ ततः शांतनवो भीष्मः सुदुर्धर्षः प्रतापवान्॥ वध्यमानेषु योधेषु धनंजयमुपाद्रवत्॥ प्रगृह्य कार्मुकश्रेष्ठं जा ७५
तरूपपरिष्कृतं॥ यमदहमसमीतितिनि इतिकाइत्यर्थः॥

मर्मच्छेदनूवीर पृथ्यमनशीलान्॥ धाराधरं मेघं॥ तान्दृष्ट्वां चिरं यानुरथवादेरथाः॥ प्रत्यगृह्णात्कौंतेयो वाद्यावात्र यथा महामेघोम्बु
शरान्नाह्ययती गृह्णात्॥ समर्मच्छेदनूसगाथिनः॥ पांडुरेणातपत्रेण ध्रियमाणेन मूर्धनि॥ शुशुभे स नरव्याघ्रो गिरिः सूर्योदये यथा
॥ प्रध्माप्य शंखं गांगेयो धार्तराष्ट्रान्प्रहर्षयन्॥ प्रदक्षिणमुपावृत्य बीभत्सुं समवारयत्॥ तमुदीक्ष्य समायांतं कौंतेयः प
धा३ रवीरहा॥ प्रत्यगृह्णात्प्रहृष्टात्मा धाराधरमिवाचलः॥ ततो भीष्मः शरानष्टौ ध्वजे पार्थस्य वीर्यवान्॥ समर्पयन्महावेगान्श्वस दे४
मानानिवोरगान्॥ ते ध्वजं पांडुपुत्रस्य समासाद्य पतत्रिणः॥ ज्वलंतं कपिमाजघ्नुर्ध्वजाग्रनिलयांश्च तान्॥ ततो भल्लेन महता पृथु
धारेण पांडवः॥ छत्रं चिच्छेद भीष्मस्य तूर्णं तदपतद्भुवि॥ ध्वजं चैवास्य कौंतेयः शरैरभ्यहनद्दृढं॥ शीघ्रकृद्रथवाहौ च तथोभौ
पार्ष्णिसारथी॥ अमृष्यमाणस्तद्भीष्मो जानन्नपि च पांडवं॥ दिव्येनास्त्रेण महता धनंजयमवाकिरत्॥ तथैवाप्यंडवो भीष्मे दिव्य
मस्त्रमुदीरयन्॥ प्रत्यगृह्णादमेयात्मा महामेघमिवाचलः॥ तयोस्तदभवद्युद्धं तुमुलं लोमहर्षणं॥ भीष्मस्य सह पार्थेन बलि
वासवयोरिव॥ प्रैक्षंत कुरवः सर्वे योधाश्च सह सैनिकाः॥ भल्लैर्भल्लाः समागच्छन्भीष्मपांडवयोर्युधि॥ अंतरीक्षे व्यराजंत ख
द्योताः प्रावृषीव हि॥ अग्निचक्रमिवाविद्धं सव्यदक्षिणमस्यतः॥ गांडीवमभवद्राजन्पार्थस्य सृजतः शरान्॥ ततः संछाद
यामास भीष्मं शरशतैः शितैः॥ पर्वतं वारिधाराभिश्छादयन्निव तोयधरः॥ ततो वेलामिवोद्धूतां शरवृष्टिं समुत्थितां॥ पांडवस्य र

वलं व्याशोभीत्यर्थः॥ आविद्धं भ्रमितं॥ वेलामिव सागरजलवृत्तिमिव॥ उद्धूतं बुद्धिधृतौ वेलेत्यमरः॥ समवारयद्व्याप्तवत्व
मयामारयत्॥ शरदृष्टिं चाशरणं दृष्टिं॥ अस्येव विशेषणं कनकपुंखानामिति॥ उपस्थितां समीपगतानां॥

आयतिं श्रेणिं। युद्धं परयुद्धं। अस्त्रयुद्धं बाणयुद्धं। शस्त्रयुद्धं खड्गादियुद्धं यतः। अस्त्रयुद्धं देवास्त्रयुद्धं शस्त्रयुद्धं मानुषास्त्रयुद्ध

विराट थान्तरीक्षज्वलनानिवाग्निं। व्यधमत्तान्पुनस्तस्य भीष्मः शरशतैः शितैः। ततस्ते कुरवः सर्वे साधु साध्वित्यपूजयन्। दुष्क

रं कृतवान्भीष्मो यदर्जुनमयोधयत्। बलवांस्तरुणो दक्षः क्षिप्रकारी च पांडवः। कोन्यः समर्थः पार्थस्य वेगं धारयितुं रणे

ऋते शांतनवाद्भीष्मात्कृष्णाद्वा देवकीसुतात्। आचार्यप्रवराद्वापि भारद्वाजान्महाबलात्। अस्त्रैरस्त्राणि संवार्य क्रीडंतौ पु

रुषर्षभौ। चक्षूंषि सर्वभूतानां मोहयंतौ महारथौ। प्राजापत्यं तथैवैंद्रमाग्नेयं च सुदारुणं। कौबेरं वारुणं याम्यं तथा वाय

२१ व्यमेव च। प्रयुंजानौ महात्मानौ समरे तौ विरेजतुः। विस्मितान्यथ भूतानि तौ दृष्ट्वा संयुगे तदा। साधु पार्थ महाबाहो साधु भी

ष्मेति चाब्रुवन्। नेमं युक्तं मनुष्येषु योयं संदृश्यते महान्। महास्त्राणां हि संयोगः समरे भीष्मपार्थयोः॥ ॥वैशंपाय

नायंयुक्तो न उवाच॥ ॥एवं सर्वास्त्रविदुषोरस्त्रयुद्धमवर्तत। अस्त्रयुद्धे तु निर्वृत्ते शस्त्रयुद्धमवर्तत। अथ जिष्णुरुपावृत्य

क्षुरधारेण कार्मुकं। चकर्त भीष्मस्य तदा जातरूपपरिष्कृतं। निमिषांतरमात्रेण भीष्मोन्यत्कार्मुकं रणे। समा

दाय महाबाहुः सज्यं चक्रे महारथः। शरांश्च सुबहून्क्रुद्धो मुमोचाशु धनंजये। अर्जुनोपि शरांस्तीक्ष्णान्भी ७६

ष्माय निशितान्बहून्। चिक्षेप सुमहातेजास्तथा भीष्मश्च पांडवे। तयोर्दिव्यास्त्रविदुषोरस्यतोर्निशितान्शरान्

अतीत्य अतिक्रम्येव। श्वेतवाहनोर्जुनः। वाहंते स्मन्दृतौ। चित्रसेन श्चित्ररथः। रथनिर्हाराः संग्राममनमार्गाः। निरिंधनानि तिवा

न विशेषं तदा राजल्लक्ष्यते स्म महात्मनोः। अथ प्राहिणोद्दश दिशः शरैरतिरथस्तदा। किरीटमाली कौंतेयः शरैः शांत

नवस्तथा। अतीव पांडवो भीष्मं भीष्मश्चातीव पांडवं। बभूव तस्मिन्संग्रामे राजल्लोके तदद्भुतं। पांडवेन हताः शूरा भीष्मस्य र

थरक्षिणः। शेरते स्म महाराज कौंतेयस्याभितो रथं। ततो गांडीवनिर्मुक्ता निरमित्रं चिकीर्षवः। आगच्छन्पुंखसंश्लिष्टाः

श्वेतवाहनपत्रिणः। निष्पतंतो रथात्तस्य धौता हैरण्यवाससः। आकाशे समदृश्यंत हंसानामिव पंक्तयः। तस्य तद्दिव्यम

स्त्रं हि विगाढं चित्रमस्यतः। प्रेक्षंते स्मांतरिक्षस्थाः सर्वे देवाः सवासवाः। तद्दृष्ट्वा परमप्रीतो गंधर्वश्चित्रमद्भुतं। शशंस देवरा

जाय चित्रसेनः प्रतापवान्। पश्यमान्नृप निर्दिशन्संसक्तानिव गच्छतः। चित्ररूपमिदं जिष्णोर्दिव्यमस्त्रमुदीर्यतः। ने

दरू दं मनुष्याः श्रद्दध्युर्न हीदं तेषु विद्यते। वारुणानां महास्त्राणां विचित्रोयं समागमः। आददानस्य च शरान्संधाय च विमुंचत

छ ः। विकर्षतश्च गांडीवं नांतरं समदृश्यत। मध्यंदिनगतं सूर्यं प्रतपंतमिवांबरे। नाशक्नुवंत सैन्यानि पांडवं प्रतिवीक्षितुं।

तथैव भीष्मं गांगेयं द्रष्टुं नोत्सहते जनः। ततो विश्रुतकर्माणावुभौ तीव्रपराक्रमौ। उभौ सदृशकर्माणावुभौ ज्यो

युधि दुःसहौ। इत्युक्तो देवराजस्तु भीष्मपार्थसमागमं। पूजयामास दिव्येन पुष्पवर्षेण भारत। ततो भीष्मः शांतनवो वाम

पार्श्वे समार्पयत्॥

पावः। स संधानपरिच्छेदाः। पुंजो रुक्मानित्यर्थः। दारुणानां बाणानां प्रहारकाणां। अंतरमवकाशः। समाप्पर्य

प्रहारमितिशेषः॥

विराट

विहतं चिह्नं ध्वजसीवाध्वजे। दीर्घसु चिरं। अतुराव्याधितश्वस्त्रमागोरक्षत्। विरूपाक्षमर्जुनार्जुनमयासरक्षत्युध्वस्तव्याक्रुरंनय
उदय वीर्यवरूपराक्रमं। अस्त्रज्ञानाविविध्याद्यायं वा कुत्व उदयं वरूलं वरूअस्तुवां मितनञ्च तिताद्रोन। पावांतारतिरथ्या तेन

अस्यातःप्रविसंधनयविहृतंसव्यसाचिनः। ततःप्रतस्पवीनस्तुः इषुधमारणाकार्मुकं। चकर्तगांडीवधन्वागाना भस्या मितानउस
॥अथेनंदशानिवीणैः। इत्य विध्यस्तनांतरे। यतमानपराक्रांतं कृतेतास्त्राधनंजयः। सपीडितोमहाबाहुःकृष्ट्वीवारथकूबरं। गांग
योयुधिष्ठिरर्षस्तर्वोदीर्घइवाचलः। नविसंज्ञमयोवाद्भसंयंतारथवाजिनो। उपादाम तस्मृत्यरक्षमाणोमहारथं॥ इतिविराटपर्व
एत्युत्तरगोग्रहेभीष्मापयानं॥ विशंपायनउवाच॥ नीष्मेथसंग्रामशिरो विहाय पलायमानेधृतराष्ट्रपुत्रः। उच्छ्रित्य वाणंविनद
न्महात्मास्वयंविगृह्यार्जुनमाससाद। समीपंध्वानासुवस्य वीर्यधनंजयं शत्रुगणावरंत। आकर्णपूर्णायतचोदितेन भल्लेनवि
व्याधललाटमध्ये। सतेन बाणेनसमर्पितेनजांबूनदाभ्यशसुसंक्षितेन। राजराजन्महनीयकर्मा यथैकपर्वारुचिरेकशृंगः। अ
पास्यमहेनविदारितस्यप्राउर्बभूवास्रगनल्पमुष्णं। सतस्यजांबूनदपुष्पचित्रामालेवचित्राभिविराजतिस्मामातन वीणा। निट
तस्तरसाउर्योधनेनोद्धतमन्युवेगः। शरानुपादायविषाग्निकल्पान्विव्याधराजानमदीनसत्वा। दुर्योधनश्चापितमुग्रतेजाःपा
र्थंश्चदुर्योधनमेकवीरः। अन्योन्यमाजौपुरुषप्रवीरौ समंसमाजघ्नतुराजमीढौ॥
एकपर्वानीलगिरिरिकस्पशृंगोरुपोन्नमस्पपर्वम।
शोभवोयस्मिन्निति रुचिरेकशृंगइत्युपस्तोपमा। एकपर्वमिडकेशतिकेचित्। सेतिपक्षेरस्यमानमाला विशेषण। अतिचित्रास्या अर्ध्यरूपा
नेत्रकमवरहणेनमिहांतेनेसादृ। जांबूनदपुष्पविचित्रा। जांबूनदपुष्पंरक्तकांचनपुष्पं तद्वच्चित्रा मनोरमाय दाचित्रज्ञानेश्च नातिस्वतिरूपणा
हे

अभिन्नेनमत्तेन। पुनरित्यनेनविकर्णो दुर्योधनस्यानाकुलयोर्विभागोयसावन्मध्ये। विविंशतेर्वोक्तः। अभ्युदागं तं रक्षितदगल
नयो। नत्वनेनतरं किंइत्यभिन्यनज्ञा। नतोगजइति। अगजोगजा नोवसनिहतइतिकेचित्यठंति। तथान्ततो समाहत्यनिह

ततः प्रभिन्नेनमहागजेनमहीधराभेनपुनर्विकर्णः। रथैश्चतुर्भिर्गजपादरक्षैःकुंतीसुतं जिष्णुमथाभ्यधावत्। तमाप
तंतंत्वरितंगजेंद्रं धनंजयःकुंभविभागमध्ये। आकर्णपूर्णेनदृढायतेन बाणेनविव्याधमहाजवेन। पार्थेनसृष्टःसतुगा
र्द्धपत्रआपुंखदेशात्प्रविवेशनागं। विदार्यशैलप्रवरप्रकाशं यथाशनिःपर्वतमिंद्रसृष्टः। शरप्रतप्तःसतुनागराज
:प्रवेपितांगोव्यथितांतरात्मा। संसीदमानोनिपपातमह्यां वज्राहतं शृंगमिवाचलस्य। निपातितेदंतिवरेपृथिव्यां
त्रासाद्विकर्णःसहसावतीर्य। तूर्णंपदान्यष्टशतानिगत्वाविविंशतेःस्यंदनमारुरोह। निहत्यनागंतुशरेणतेनवज्रोप
मेनाद्रिवरांबुदाभं। तथाविधेनैवशरेणपार्थोदुर्योधनंवक्षसिनिर्बिभेद। ततोगजेराजनिचैवभग्ने भग्नेविकर्णे
चसपादरक्षे। गांडीवमुक्तैर्विशिखैःप्रणुन्नास्ते योधमुख्याःसहसापजग्मुः। दृष्ट्वैवबाणेनहतंतुनागं योधांश्चसर्वा
न्द्रवतोनिशम्य। रथंसमावृत्यकुरुप्रवीरोरणात्प्रदुद्राव यतोनपार्थः। तंभीमरूपंत्वरितंद्रवंतं दुर्योधनंशत्रुस
होनिषंगी। प्राक्ष्वेडयद्योद्धुमनाःकिरीटी बाणेनविद्धंरुधिरंवमंतं॥ ॥अर्जुनउवाच॥ ॥विहाय कीर्तिं विपुलंय
शश्चयुद्धात्परावृत्यपलायसेकिं। नतेद्यतूर्याणिसमाहतानि यथावदुद्यंतिगतस्यराज्यात्। युधिष्ठिरस्यास्मिनिदेशका

र्यपलो यशश्च तृतीयःपृथिवीसुतोहं। यस्य वलोयत्रशत्रुसहोर्जुनस्यातिप्रगात्यपरिषंशासाविम्भातानयंतं नीतरूपेवाप्राक्षेपयतश्चाद्विपर॥ हानादित्यन्न
वाकीर्तिः वशोर्थो दिप्रनवयश इतिभेदः। शौर्यस्याथानवेकीर्तिः। यशःशत्रुवधेप्रत्येतिभेदः॥

विराट

अहत्वा निवृत्तान् रणे शत्रून् हत्वा युद्धे प्राणत्यागात् कृतं। हे नरेन्द्र स्तुपहासे हन्तेयूनजयादि किंचा। त्वनाममहिहित्वा दिवकर्षमि
रीपार्थः स्मृती यो युधि चस्थितो स्मितान देवमाहत्य स्तुपेयपथ हंतुं नरेन्द्र हतं सारथी नराङ्गमोहात वेदं तु विनामयेयं दुर्योधने ती
दरूतं तु स्नातानाच हदुर्योधनतानवाक्तिपलायमानस्य रणं विहाय। ततेपुरस्तादथ दृष्टतो वाथ श्याम दुर्योधनरविह
तारं। पारेहि युद्धेन कुरुप्रवीर प्राणानुप्रियानुपांडवतो हरस्व॥ ॥महाभारते विराटपर्वणि उत्तरगोग्रहे दुर्योधनतंगः॥
विशंपायन उवाच॥ ॥आकृश्यमानस्तु मतेन संख्ये महात्मना वै धृतराष्ट्रपुत्रः। निवर्तितस्तस्य वचोऽकुशेन महागजो मत्त
इवांकुशेन। सोऽमृष्यमाणो वचसाभिमृष्टो महारथेनातिरथस्तरस्वी। पर्याववर्त्ताथ रथेन वीरो भोगी यथा पादतला
भिमृष्टः। तं प्रेक्ष्य कर्णः परिवर्त्तमानं निवृत्य संस्तभ्य च विद्धगात्रं। दुर्योधनस्योत्तरतोऽभ्यगच्छत्पार्थं नवीरो युधि हेममाली।
भीष्मस्ततः शान्तनवो निवृत्य हिरण्यकक्ष्यांस्त्वरयंस्तुरंगान्। दुर्योधनं पश्चिमतोऽभ्यरक्षत् पार्थान्महाबाहुरधिज्यधन्वा। द्रोण
:कृपश्चैव विविंशतिश्च दुःशासनश्चैव निवृत्य शीघ्रं। सर्वे पुरस्ताद्वितते षुचापा दुर्योधनार्थं त्वरयाभ्युपेयुः। स तान्यनीका
न्निवर्तमानान्यालोक्य पूर्णौघनिभानि पार्थः। हंसो यथा मेघमिवापतन्तं धनञ्जयः प्रत्यपतत्तरस्वी। ते सर्वतः संपरिवार्य पार्थं शस्त्रा
णि दिव्यानि समाददानाः। ववर्षुरभ्येत्य शरैः समन्तान्मेघा यथा भूधरमम्बुवेगैः। ततोऽस्त्रमस्त्रेण निवार्य तेषां गाण्डीवधन्वा कुरुपुंग
वानां॥ ७८
त्याहा। मोघमिति युद्धे नरक्षितारमित्यन्वयः। पारेहि पलायस्व। यद्वा। युद्धेन पारेहि आहत्य प्राणावरक्षाहेतोः। अजिह्म
गो लक्षितो सर्हिं नहितिशावत्। भोगी सर्पः परैरभ्यभिदृष्टः रिति यावत्। पुरस्तादथ दृष्टतो पीतु कानदृष्टाः कर्णाद्या प्रदेकैर्वैमित्र

शक्रसदृशः। उन्निशावृषसेनोऽर्जुनः। ऐंद्रं वक्रं। ऐंद्रिरिति ख्यातश्चार्जुनः। शांतिपराः स्वैरस्वरापराः। निसंज्ञाश्चेतनाः। निर्याहि हात्या हिप हार्दस्य
संमाददे नं शत्रुसहोऽन्यस्त्रं पांडवः कारेंडमिवारणाय। ततो दिशः संप्रदिशो वि हत्य शरैः सुधारैर्निशितैः सुडांखेः। गांडीव
घोषेण मनांसि तेषां महाबलः प्रव्यथयन्चकार। ततः पुनर्भीमरवं प्रगृह्य दोर्भ्यां महाशंखमुदारघोषं। व्यनादयत्स प्रदिशो दिशः
खं भुवं च पार्थो द्विषतां निहंता। ते शंखनादेन कुरुप्रवीराः संमोहिताः पार्थसमीरितेन। उत्सृज्य चापानि दुरासदानि सर्वे तदा शांति
परा बभूवुः। तथा विसंज्ञेषु परेषु पार्थः स्मृत्वा च वाक्यानि तथोत्तरायाः। निर्याहि मध्यादिति मत्स्यपुत्रमुवाच यावत्कुरवो विसंज्ञा
:। आचार्यशारद्वतयोः सुशुक्ले कर्णस्य पीतं रुचिरं च वस्त्रं। द्रौणेश्च राज्ञश्च तथैव नीले वस्त्रे समादत्स्व नरप्रवीर। भीष्मस्य संज्ञां तु तथैव
मन्ये जानाति मेऽस्त्रप्रतिघातमेषः। एतस्य वाहान्कुरु सव्यतस्त्वमेवं हि यातव्यममूढसंज्ञैः। रश्मीन्समुत्सृज्य ततो महात्मा र
थादवप्लुत्य विराटपुत्रः। वस्त्राण्युपादाय महारथानां तूर्णं पुनः स्वं रथमारुरोह। ततोऽन्वशासच्चतुरः सदश्वान्पुत्रो विराटस्य हिर
ण्यकक्षान्॥ ते तद्व्यतीयुर्ध्वजिनामनीकं श्वेता वहंतोऽर्जुनमाजिमध्यात्। तथा प्रयांतं तु कुरुप्रवीरं भीष्मः शरैरभ्यहनत्तरस्वी। सचा
पि भीष्मस्य हयान्निहत्य विव्याध पार्श्वे दशभिः पृषत्कैः। ततोऽर्जुनो भीष्ममपास्य युद्धे विद्ध्वास्य यंतारमरिष्टधन्वा। तस्थौ विमुक्तो
रथवृंदमध्याद्राहुं विदार्येव सहस्ररश्मिः। लब्ध्वा तु संज्ञां स कुरुप्रवीरः पार्थं समीक्ष्याथ महेंद्रकल्पं॥

स्तानि विराटिमात्मानं प्रति पयाद्धं कचित्स्वस्तिका मऊकां यपार्श्वे वाने श्राचार इत्यादि। एवं सति। अमूढा संज्ञा बुद्धिर्येषां तैः तस्मान्निर्मि रिति
वापावः। ते। नर्थ भीममर्जुनस्योरुभिरथ्या विनशसिता॥

विराट

नाह्कणादिरा। नरस्त्वदादिविशाषः॥ बुद्धिर्नि श्चयात्मिकांतःकरणवृत्तिः वीर्य्यं ज्ञानं बाऊसामर्थ्यं परान्स्य। आत्मस्य दार्ढ्यं तु वस्य पदेशांतिमिव
शांतिमरणमिवआस्थितःप्रासाऽस्त्रं नत्वत्तदिंकथं मातद्दत वानित्यतआह। नाहं ति। नानसमर्थस्य वृयः। तत्रादत्तुमपापाऽदतिनत्त्वत्तरंतः। कि
मितिनहतवानतआह। त्रैलोक्येऽपि। किं त्वत्तं ड मात्रह्ह। तारिति। नत्वधुना किंकर्तव्यमित्यतआह। हे पार्थमितिमिल्वकौर्थो शापलक्षणः। निम

रथाद्दिभुक्तस्थितमकमाशेनेधार्त राष्ट्रस्त्रिरिंतवमाषे। अयंकथंचित् दृश्वा विमुक्तस्त्वं विषम स्थानयचानमुच्येत। तमब्रवीत्तं सनवः स्यदस्य
फणोने ताबुद्धिरस्तत्कवीर्य्यं शांतिपराग्रस्यय दास्थितान्तरुक्तस्त्वबाणाश्चवनुश्चचित्रा। नाहंत्वबीनस्तुरलंचचंाम कर्तुंतथा। न स्यमतो। नि
विष्टं। त्रैलोक्याद्दातार्नजिदा स्त्वधर्मत स्मान्न सर्वेनिहताराणेनं। क्षिपं कुरू तया। हि कुरु प्रवीरविजित्यगाः संप्रतियातुपार्थः। मा तेस्त्व
कार्योनिपपात। मा दानसविधातव्यमशिश्व वृज्ञ॥ ॥वैशंपायनउवाच॥ ॥डुर्योधनस्तस्यतुतन्निशम्यपितामहस्यात्म हितंच
यु॰ वाक्यं। अतीतकामोयुधि चाप्यमर्षी राजा विनिश्वस्य वचस्तु तूष्णीं। तद्धाप्यवाक्यं हितमीक्ष्यमाणे धनंजयात् मिश्चविवर्द्धमानं। निवर्त्तनं ताये
व मतिं निरैक्षु डुर्योधनं तपरिरक्ष्यमाणाः। नानुपत्तिनाद्र धीतमनाः सपार्थो धनंजयः प्रेक्ष्यकुरू प्रवीरान्। अनापमाणोत्थुयातो ऽ
त्र्यं सहृद्धा येसत्रकुरूत्महात्मा। पितामहं द्रोणमथ वंद्य मूर्ध्ना द्रौणिं कृपं चैवकुरूंश्च मान्याञ्च शरैर्वि
चित्रैरभिवाद्यचैव डुर्योधनस्योत्तमरत्नचित्रं चिच्छेदपार्थो मुकुटं शरेण। आमंत्र्य वीरांश्च ततोयथैव मान्यानश्रगांडीव घोषेण विनाद्यलोकान्॥
मध्देवदत्तं सहसा विनाद्य विदार्यचारातिमतानि मानसि। ध्वजेनसर्वान्नभिभूय शत्रून् सहेमजालेन विराजमानं। दृष्ट्वा प्रयातांस्तु कुरून्किरीटी

नेत। नश्चेत मोहादनवधानात्। तजाज्जसंविधनतव्यं रक्षितव्यं मातेद्यस्कोपइतिपाठश्चेद्य तनकोपोमा। निपतत। नश्चेत गोपतिस्तु तस्कोमतिपत्तवंसं
विधातव्यं रक्षितव्यं। अतीतकामो धाराम्मनोरथः। ईक्ष्य समीक्ष्यालोच्य। पश्यमाणोवर्द्धतः। अनाममाणोऽनुपयोऽश्चत्सृतवा ता। शुरून्न्हितिसर्वचेतः। शी
विविलवाः डुर्योधनस्य शिरोधम्मात लक्रं नारहं नगावत्सा वामुरास्वस्य शास्य धमेवे निमवतः पश्यपत्तु इतिस्वायिऽमिवऽ। याधिनस्य ब्रूकुटं पार्श्व

अवर्णयातुम रणाचिवर्त्यय यास्वस्थाना निक्रमेण प्रतीताकृष्टाः। स्थानितर्हि प्रतीतास्तेत्यमरः॥ ॥गोरूपत्तोगोधनमस्येवा

लष्टो ब्रुवीतत्रसमस्य पुत्रं। आवर्त्तयाश्चानुयशा वोजितास्तेयानाः परेयाहि पुरं प्रहृष्टः॥ लष्टास्तु दृष्ट्वा सहदेवत्तु नंतपुत्रं कु
रूणां सह फाल्गुनेन। जग्मुर्यथास्वं नवनं प्रतीताः पार्थस्य कर्माणि विचिंतयंतः॥ ॥इतिमहाभारते विराटपर्वणिगुत्तगो
ग्रहेनाम॥ ॥वैशंपायनउवाच॥ ॥विजित्य चैव संग्रामे कुरून्स वृषभेक्षणाः। समानयामास तदा विराटस्य धनं महत्॥
गतेषु तेषु भग्नेषु धार्तराष्ट्रेषु सर्वशः। वनान्निष्क्रम्य गहनाद्दहवः कुरुसैनिकाः॥ भयात्संत्रस्तमनसः समाजग्मुरितस्ततः॥
मुक्तकेशा व्यदृश्यंत स्थिताः प्रांजलयस्तदा। क्षुत्पिपासापरिश्रांता विदेशस्था विचेतसः॥ ऊचुः प्रणम्य संभ्रांताः पार्थ किंक
रवाम हे॥ ॥अर्जुनउवाच॥ ॥स्वस्ति व्रजत भद्रं वो न भेतव्यं कथंचन। नाहमार्तान्जिघांसामि भृशमाश्वासयामि वः॥ ॥वैशं
पायनउवाच॥ ॥तस्य तामभयां वाचं श्रुत्वा योधाः समागताः। आयुःकीर्तियशोदाभिस्तमाशीर्भिरनंदयन्॥ ततोऽर्जुनं नागमिव
प्रभिन्नमुत्सृज्य शत्रूंश्च निवर्तमानं। विराटराष्ट्राभिमुखं प्रयांतं नाशक्नुवंस्तं कुरवोऽभियातुं॥ ततः सतं मेघमिव प्रमुक्तं विद्र
प्रद्रुतं सर्पात्ततो। कुरुसैन्यमुग्रं तमभ्यमुत्तं द्विषतां निहंता वचो ब्रुवीन्संपरिरभ्य हृष्टः॥ पितुः सकाशे तव तात सर्वे वसंति पार्था
विदिता स्तथैव। तान्मानसं मेने नगरं प्रविश्य तीतः प्रणाशयेन समस्य राजः॥ मदाजिता साध्वजिनी कुरूणां मया च गावो विजिता

॥ हि कीयस्य सनयाह रूपने ऋषयोरितिमेदिनीकरः। गोरूपनेऽरूपा इत्यर्थः॥

७८

विराटपर्वणि भा॰ टी॰

प्रतीति

विराट हि यज्ञः। प्रीतिकामेन नगरं प्रवेष्टुं समागमनः कर्म्म कृतं ब्रवीहि॥ ॥उत्तर उवाच॥ ॥यत्नेन कृतं कर्म्म निवारणीयं तत्कर्म केन चैमम ना
ऊरु स्तिशक्तिः। तत्वां प्रवक्ष्यामि पितः सकाशे यावच्च यं वक्ष्यामि शृणु वीर॥ ॥वैशंपायन उवाच॥ ॥सशत्रुसेनामवजित्य जित्वा वैजित्य
सर्वं च धनं कुरुभ्यः स्वयमेत्य। गतमागम्य पुनः शमीं नामध्येत्य तस्मोत्तारविक्रितं नाम॥ ततः सवक्रिप्रतिमो महाकपिः सदेव सर्वाहिर्वस्तुत्पा
ना। तथैव माया विहिता बलवद्ध्वजं च सिंहं सुयुजे रथे पुनः॥ निधाय तत्रायुधमाजिवर्द्धनं कुर्वमाना मिथुधीश्च जग्मुः। प्रायात्समक्षा
नगरं प्रहृष्टः किरीटिना सारथिना महात्मा। पार्थस्तु कृत्वा परमार्य्यकर्म्म निहत्य शत्रून् द्विषतां निहंता। विधाय वेणीं च तथैव बन्ध्वा ज
ग्राह रश्मीन् पुनरुत्तरस्य। विवेश हृष्टो नगरं महात्मा बृहन्नलारूपमनुप्रपन्नः॥ ॥वैशंपायन उवाच॥ ॥ततो निवृत्ताः कुरवः
प्रभग्नाश्च समागताः। येषां तु पसंगम्य फाल्गुनो वाक्यमब्रवीत्। राजपुत्रं प्रत्यवेक्षस्व समानीतानि सर्वशः। गोधनानि महाबाहो वी
र गोपालकैः सह। इतोपराह्णे यास्यामो विराटनगरं प्रति। आश्वास्य पाययित्वाश्च परिप्लाव्य च वाजिनः। गच्छंतु त्वरितास्तत्र गो
पालाः प्रेषितास्त्वया। नगरे प्रियमाख्यातुं घोषयंतु च ते जयं॥ ॥वैशंपायन उवाच॥ ॥अथोत्तरस्त्वरमाणः स दूतानाज्ञा ६
पयद्वचनादर्जुनस्य। आचक्षध्वं विजयं पार्थिवस्य भग्नाः परे विजिताश्चापि गावः॥ ॥वैशंपायन उवाच॥ ॥इत्येवं ८७

तौ पांडवमत्स्यपुत्रौ वा संन्यसंगम्य पुनः शमीं तां। अभ्येत्य तस्थौ विजयेन तुष्टौ वुत्सृज्य मारोपयतां च तां तां। सशत्रुसेनामभि
भूय सर्वा माहित्य सर्वं च धनं कुरुभ्यः। वैराटिरायान्नगरं प्रतीतो बृहन्नलासारथिरेकवीरः॥ ॥इति महाभारते विराटपर्व
णि॥ ॥वैशंपायन उवाच॥ ॥धनं चापि विजित्याशु विराटो वाहिनीपतिः। प्राविशन्नगरं हृष्टश्चतुर्भिः पांडवैः सहा स
ताजितः सार्त्मेन्यो घढतिं च समस्समगदा। विसर्जयामास तदा द्विजोप्युकृतीमथ्या। ततः स राजा मत्स्यानां विराटो वाहिनीप
तिः। उत्तरं परिपप्रच्छ क्व यातस्तु इति चाब्रवीत्। आचख्युस्तस्य संहृष्टाः स्त्रियः कन्याश्च वेश्मनि। अंतःपुरचराश्चैव कुरुभि
र्गोधनं हृतं। विजेतुमभिसंरब्ध एक एवातिमानतः। बृहन्नलासहायश्च निर्यातः पृथिवीजयः। उपायातानतिरथान् द्रो
णं शांतनवं कृपं। कर्णं दुर्योधनं चैव द्रोणपुत्रं च षड्रथान्॥ ॥वैशंपायन उवाच॥ ॥राजा विराटोथ भृशाभितप्तः श्रु
त्वा सुतं ह्येकरथेन यातं। बृहन्नलासारथिमाजिवर्द्धनं प्रोवाच सर्वानथ मंत्रिमुख्यान्। सर्वथा कुरवस्ते हि ये चान्ये वसुधा
न धिपाः। त्रिगर्त्तान्निर्जितान् श्रुत्वा न स्थास्यंति कदाचन। तस्मात्गच्छन्तु मे योधा बलेन महता वृताः। उत्तरस्य परीप्सार्थं ये त्रिगर्त्तैर्वि
र्विक्षताः। हयांश्च नागांश्च रथांश्च शीघ्रं पदातिसंघांश्च ततः प्रवीरान्। प्रस्थापयामास सुतस्य हेतोर्विचित्रशस्त्राभरणोपप

स ष

विराट तान्॥ ॥वैशंपायन उवाच॥ ॥एवं राजा स मत्स्यानां विराटो वाहिनीपतिः। आदिदेश ततो शीघ्रं वाहिनीं चतुरंगिणीं। कुमारमाशु जा राजउत्तरश्च जिर
नीत यदि जीवति वा न वा। यस्य यंता गतः षंढो मन्ये हं न स जीवति। तमब्रवीद्धर्मराजः प्रहस्य विराटमार्तं कुरुभिः प्रतप्तं। बृहन्न
ला सारथिर्यस्य नरेंद्र परे न नेष्यंति तवाद्य गास्ताः। सर्वान्महीपान्सहितान्कुरूंश्च तथैव देवासुरयक्षनागान्। अलं विजेतुं स
मरे सुतस्ते स्वनुष्ठितः सारथिना हि तेन॥ ॥वैशंपायन उवाच॥ ॥अथोत्तरेण प्रहिता दूतास्ते शीघ्रगामिनः। विराटनगरं प्रा
प्य जयमावेदयंस्तथा। राज्ञस्तत्सर्वमाचख्यौ मंत्री विजयमुत्तमं। पराजयं कुरूणां चाप्युपायांतं तथोत्तरं। सर्वा विनिर्जिता गा
वः कुरवश्च पराजिताः। उत्तरः सह सूतेन कुशली नगरं तथा॥ ॥युधिष्ठिर उवाच॥ ॥दिष्ट्या ते निर्जिता गावः कुरवश्च परा
जिताः। दिष्ट्या ते जीवितः पुत्रः श्रूयते पार्थिवर्षभ। नाद्भुतं त्वेव मन्येहं यत्ते पुत्रो जयत्कुरून्। ध्रुव एव जयस्तस्य यस्य यंता बृहन्
नला॥ ॥वैशंपायन उवाच॥ ॥ततो विराटो नृपतिः संप्रहृष्टतनूरुहः। श्रुत्वा तु विजयं तस्य कुमारस्यामितौजसः। आ
ज्ञापयित्वा दूतांस्तान्मंत्रिणः सोभ्यचोदयत्। राजमार्गाः क्रियंतां मे पताकाभिरलंकृताः। पुष्पोपहारैरर्च्यंतां देवताश्चापि
सर्वशः। कुमारयोधमुख्याश्च गणिकाश्च स्वलंकृताः। वादित्राणि च सर्वाणि प्रत्युद्यांतु सुतं मम। घंटावान्मानवः शीघ्रं मत्तम ८२

रुह्य वारणं। शृंगाटकेषु सर्वेषु समाख्यातु जयं मम। उत्तरा च कुमारीभिर्बह्वीभिः परिसंवृता। शृंगारवे
षाभरणा प्रत्युद्यातु बृहन्नडां। श्रुत्वेति वचनं पार्थिवस्य सर्वं पुरं स्वस्तिकपाणयश्च। तथा शंखाश्च तूर्याणि च
वारिजाश्चावेसिः परार्ध्याः प्रमदाः शुभाश्च। तथैव सूतमागधैश्च नंदीवाद्याः पणवास्तूर्यवाद्यं। पु
राद्विराटस्य महाबलस्य प्रत्युद्ययुः पुत्रमनंतवीर्यं॥ ॥वैशंपायन उवाच॥ प्रस्थाप्य सेनां कन्याश्च ग
णिकाश्च स्वलंकृताः। मत्स्यराजो महाप्राज्ञः प्रहृष्ट इदमब्रवीत्। अक्षानाहर सैरंध्रि कंक द्यूतं प्रवर्ततां। तं त
था वादिनं दृष्ट्वा पांडवः प्रत्यभाषत। न देवितव्यं हृष्टेन कितवेनेति नः श्रुतं। न त्वामद्य मुदा युक्तमहं देवितु
मुत्सहे। प्रियं तु ते चिकीर्षामि वर्ततां यदि मन्यसे॥ ॥विराट उवाच॥ स्त्रियो गावो हिरण्यं च यच्चान्यद्व
सु किंचन। न मे किंचित्त्वया रक्ष्यमंतरेणापि दीव्यतु॥ कंक उवाच॥ किं ते द्यूतेन राजेंद्र बहुदोषेण मानद। प्र
ाणामानद। देवने बहवो दोषास्तस्मात्तत्परिवर्जयेत्। श्रुतस्ते यदि वा दृष्टः पांडवो हि युधिष्ठिरः। राज्यं च सुम
हत्स्फीतं भ्रातॄंश्च त्रिदशोपमान्। द्यूते हारितवान्सर्वं तस्माद्द्यूतं न रोचये। अथवा मन्यसे राजन्दीव्याव यदि
स्फी।

विराट

रोच्यते॥ ॥वैशंपायन उवाच॥ प्रवर्तमाने हि द्यूते मत्स्यः पांडवमब्रवीत्। पश्य पुत्रेण मे युद्धे तादृशाः कु-
रवो जिताः। ततोब्रवीन्मत्स्यराजं धर्मपुत्रो युधिष्ठिरः। बृहन्नला यस्य यंता स कथं न विजेष्यति। इत्युक्तः
कुपितो राजा मत्स्यः पांडवमब्रवीत्। समं पुत्रेण मे षंढं ब्रह्मबंधो प्रशंससि। वाच्यावाच्यं न जानासि
नूनं मामवमन्यसे। भीष्मद्रोणमुखान्सर्वान्कस्मान्न स विजेष्यति। वयस्यत्वात्तु ते ब्रह्मन्नपराधमिमं
क्षमे। नेदृशं ते पुनर्वाच्यं यदि जीवितुमिच्छसि॥ ॥युधिष्ठिर उवाच॥ यत्र द्रोणस्तथा भीष्मो द्रौणिर्वै-
कर्तनः कृपः। दुर्योधनश्च राजेंद्र तथान्ये च महारथाः। मरुद्गणैः परिवृतः साक्षादपि शतक्रतुः। को
न्यो बृहन्नलायास्तान्प्रतियुध्येत संगतान्॥ ॥७॥ ॥यस्य बाहुबले तुल्यो न भूतो न भ-
विष्यति। अतीव समरं दृष्ट्वा हर्षो यस्योपजायते। योजयत्सहितान्सर्वान्सुरासुरमहोरगान्। तादृशेन
सहायेन स कस्मान्न विजेष्यति॥ ॥विराट उवाच॥ बहुशः प्रतिषिद्धोसि न च वाचं नियच्छसि। नियंता चे- ८२
न्न विद्येत न कश्चिद्धर्ममाचरेत्॥ ॥वैशंपायन उवाच॥ ॥

ततः प्रकुपितो राजा तमक्षेणाहनद्दृढं। मुखे युधिष्ठिरं कोपान्नैवमित्येव भर्त्सयन्। बलेन प्रतिविद्धस्य
नस्तः शोणितमागतं। तदप्राप्तं महीं पार्थः पाणिभ्यां समधारयत्। अवैक्षत च धर्मात्मा द्रौपदीं पार्श्वतः स्थि-
तां। सा वेद तमभिप्रायं भर्तुश्चित्तवशानुगा। पात्रं द्रावा सौवर्णं जलपूर्णमनिंदिता। तच्छोणितं प्रत्यगृ-
ह्णाद्यत्स्रुतं स पांडवात्। विराटोऽभ्यब्रवीत्तत्र किमेतत्क्रियतामिति। सैरंध्रि ब्रूहि तत्त्वेन मम प्रश्नमत्र-
धतः॥ ॥सैरंध्र्युवाच॥ यदि द्राणितं राजन्कंकस्य पतते क्षितौ। इदं च राष्ट्रं तद्बिंदुर्विनश्येत न संशयः
। न च द्वादश वर्षाणि वर्षयेत पुरंदरः। इति यस्य प्रवर्तेत न सस्यं जायते क्वचित्। अयं मत्स्याधिराजेंद्र पस्य तु-
रस्य च॥ ॥वैशंपायन उवाच॥ अथोत्तरः शुभैर्गंधैर्माल्यैश्च विविधैरपि। अवकीर्यमाणः संहृष्टो नगरं स्वैरमा-
गमत्। संमान्यमानः पौरैश्च स्त्रीभिर्जनपदैस्तथा। आसाद्य भवनद्वारं पित्रे संप्रत्यवेदयत्। ततो द्वास्थः
प्रविश्यैव विराटमिदमब्रवीत्। बृहन्नलासहायस्ते पुत्रो द्वार्युत्तरः स्थितः। ततो हृष्टो मत्स्यराजः क्षत्तारमिदमब्-

वीत। यद्विद्वेषेतानुनौ रूपसंदर्शनिच्छुरहंतयोः॥ स्रात्वारं धर्मराजस्तु श्रानैः कर्म्मतु पाजयत्॥ उत्तरः प्रविशाद्वक्तोन
विराट भावृहत्पाहन्नला॥ प्रतस्य हिमहाबाहो उतामतस्माद्धितं॥ याममाग्कणंकुयाद्दोणितंचाग्दर्शायत॥ अन्यत्र
संग्रामगतान्नमत्ता वदमंशायमनशक्ष्यात्र शमंकुवोमांहहै वं समाशातितं॥ विराटमिदमुमामात्सहन्या शबलवाहनं॥
इति महाभारते विराटपर्वणि॥ वैशंपायन उवाच॥ ततो राजः सुतो ज्येष्ठः प्राविशत्पृथिवींजयः॥ सोऽभिवा
द्य पितुः पादौ धर्मराजमपश्यत॥ तं चारुधिरसंसिक्तमनेकाग्रमनागसं। भूमावासीनमेकांते सैरिंध्र्या समुपस्थि
तं॥ ततः पप्रच्छ पितरं त्वरमाण इवोत्तरः॥ केनायं ताडितो राजन् केन पापमिदं कृतं॥ ॥विराट उवाच॥ मयायं ता
डितो जिह्मो नचाप्येतावदर्हति॥ प्रशस्यमाने यः शूरे त्वयि षंढं प्रशंसति॥ ॥उत्तर उवाच॥ अकार्यं ते कृतं
कर्म राजन् प्रसाद्यतामयं॥ मा त्वा ब्रह्मविषं घोरं समूलमपि निर्दहेत्॥ ॥वैशंपायन उवाच॥ स पुत्रस्य
वचः श्रुत्वा विराटो राष्ट्रवर्द्धनः॥ क्षमयामास कौन्तेयं भस्मच्छन्नमिवानलं॥ क्षमयन्तं तु राजानं पांडवः प्रत्यभाषत
धा ॥ चिरं क्षांतमिदं राजन् न मन्युर्विद्यते मम॥ यदि ह्येतत्पतेद्भूमौ रुधिरं मम नस्ततः॥ सराष्ट्रस्त्वं महाराज विनश्येथा पा ८३
न संशयः॥ न दूषयामि ते राजन्यच्च हन्याददूषकं॥ बलवंतं महाराज क्षिप्रं दारुणमाप्नुयात्॥

शोणिते तु व्यतिक्रांते प्रविवेश बृहन्नला। अभिवाद्य विराटं च कंकं चाप्युपतिष्ठत॥ क्षमयित्वा तु कौरव्यं रणादुत्तरमा
गतं। प्रशशंस ततो मत्स्यः शृण्वतः सव्यसाचिनः॥ त्वया दायादवानस्मि कैकेयीनंदिवर्द्धन। त्वया मे सदृशः पुत्रो न भूतो न
भविष्यति। पदं पदसहस्रेण यश्चरन्नापराध्नुयात्। तेन कर्णेन ते तात कथमासीत्समागमः॥ मनुष्यलोके सकले यस्य
तुल्यो न विद्यते। यः समुद्र इवाक्षोभ्यः कालाग्निरिव दुःसहः॥ तेन भीष्मेण ते तात कथमासीत्समागमः। आचार्यो वृष्णि
वीराणां पांडवानां च यो द्विजः। सर्वक्षत्रस्य चाचार्यः सर्वशस्त्रभृतां वरः॥ तेन द्रोणेन ते तात कथमासीत्समागम
। आचार्यपुत्रो यः शूरः सर्वशस्त्रभृतां वरः॥ अश्वत्थामेति विख्यातः कथं तेन समागमः॥ रणे यं प्रेक्ष्य सीदंति हृतस्वा वणि
जो यथा। कृपेणेन तेन ते तात कथमासीत्समागमः॥ पर्वतं यो ऽभिविध्येत राजपुत्रो महेषुभिः॥ दुर्योधनेन ते तात कथमासीत्समा
गमः॥ अवगाढा द्विषंतो मे सुखो वातो ऽभिवाति मां। यस्त्वं धनमथाजैषीः कुरुभिर्ग्रस्तमाहवे॥ नूनं प्रकल्प्य तान्सर्वांस्त्वया
युद्धे नरर्षभ। आच्छिन्नं गोधनं सर्वं शार्दूलेनामिषं यथा॥ ॥उत्तर उवाच॥ ॥न मया निर्जिता गावो न मया विजिताः परा
कृतं तु कर्म तत्सर्वं देवपुत्रेण केनचित्॥ स हि भीतं द्रवंतं मां देवपुत्रो न्यवारयत्॥ स चातिष्ठद्रथोपस्थे वज्रसंहननो युवा। ते

विराट

नतेविजिता गावस्मे न ते कुरवो जिताः। नस्य तत्कर्म वीरस्य न मया तात तत्कृतं। सहि शारद्वतं द्रोणं द्रोणपुत्रं च वीर्यवान्॥
सूतपुत्रं च भीष्मं च चकार विमुखं शरैः। दुर्योधनं च समरे सनागमिव यूथपं। प्रभग्नमब्रवीद्भीतं देवपुत्रो महाबलः॥
न हास्तिनपुरे त्राणं तव पश्यामि किंचन। व्यायामेन परीप्सस्व जीवितं कौरवात्मज। न मोक्ष्यसे पलायंस्त्वं राजन्युद्धे मन
ः कुरु। पृथिवीं भोक्ष्यसे जित्वा हतो वा स्वर्गमाप्स्यसि। स निवृत्तो नरव्याघ्रो मुंचन्वज्रनिभाञ्शरान्। सचिवैः संवृतो राजा रथे नाग — व्य
इव श्वसन्। तत्र मे रोमहर्षोऽभूदूरुस्तंभश्च मारिष। यदभ्रघनसंकाशमनीकं व्यधमच्छरैः। तत्प्रणुद्य रथानीकं सिंहसंहननो
युवा। कुरूंस्तान्प्रहसन्राजन्वासांस्यपहरद्बली। एकेन तेन वीरेण षड्रथाः परिवारिताः। शार्दूलेनेव मत्तेन मृगास्तृणचरा व
विराटउवाच — ने॥ ॥ कस वीरो महाबाहुर्देवपुत्रो महायशाः॥ यो मे धनमवाजैषीत्कुरुभिर्ग्रस्तमाहवे। इच्छामि तमहं द्रष्टुमर्चितुं च महाबलं
येन मे त्वं च गावश्च रक्षिता देवसूनुना॥ ॥उत्तर उवाच॥ ॥अंतर्धानं गतस्तात देवपुत्रः प्रतापवान्। स तु श्वो वा परश्वो
युधि ३ — वा मन्ये प्रादुर्भविष्यति॥ ॥वैशंपायन उवाच॥ ॥एवमाख्यायमानं तु छन्नं सत्रेण पांडवं। वसंतं तत्र नाज्ञासीद्विराटः — ८४
पार्थमर्जुनं। ततः पार्थोऽभ्यनुज्ञातो विराटेन महात्मना। प्रददौ तानि वासांसि विराटदुहितुः स्वयं। उत्तरा तु महार्हाणि

वस्त्र

विविधानि तनूनि च। प्रत्यगृह्णात्ततः प्रीता तानि वासांसि भामिनी। मंत्रयित्वा तु कौंतेय उत्तरेण रहस्तदा। इतिकर्तव्य
तां सर्वां राजन्यथ युधिष्ठिरे। ततस्तथा तद्व्यदधाद्यथावत्पुरुषर्षभः। सह पुत्रेण मत्स्यस्य प्रहृष्टो नरर्षभः॥ ॥इति महाभा
रते विराटपर्वणि॥ ॥वैशंपायन उवाच॥ ॥ततस्तृतीये दिवसे भ्रातरः पंच पांडवाः। स्नाताः शुक्लांबरधराः समये चरित
व्रताः। युधिष्ठिरं पुरस्कृत्य राजानं राजभूषिताः। अभिपद्मा यथा नागा भ्राजमाना महारथाः। विराटस्य सभां गत्वा भूमिपाला
सनेषु च। निषेदुः पावकप्रख्याः सर्वे धिष्ण्येष्विवाग्नयः। तेषु तत्रोपविष्टेषु विराटः पृथिवीपतिः। आजगाम सभां कर्तुं राज
कार्याणि सर्वशः। श्रीमतः पांडवान्दृष्ट्वा ज्वलतमिव पावकं। राजवेश्मन आयातो नृपतिर्विस्मितोऽभवत्। किमिदं कोवि
धिः स्थनयातीव पार्थिवः। मुहूर्तमिव च ध्यात्वा सरोषः पृथिवीपतिः। अथ मत्स्योऽब्रवीत्कंकं देवरूपमवस्थितं। म
रुद्गणैरुपासीनं त्रिदशानामिवेश्वरं। अहं लक्षीनिवासस्त्वं सभास्तारो मया कृतः। अथ राजासने कस्मादुपविष्टोऽस्यलं
कृतः॥ ॥वैशंपायन उवाच॥ ॥परिहासेप्सया वाक्यं विराटस्य निशम्य तत्। स्मयमानोऽर्जुनो राजन्निदं वचनमब्रवी
त्॥ ॥अर्जुन उवाच॥ ॥इंद्रस्याप्यासनं राजन्नयमारोढुमर्हति। ब्रह्मण्यः श्रुतवांस्त्यागी यज्ञशीलो दृढव्रतः। अयं विग्रहवा

दो

विराट

न्द्धर्मं पृथ्वीपालस्तं वरं एष बुध्याधिको लोके न पमो वचयणां ।। ययोस्तु विक्रामं यामे त्रैलोक्ये सचराचरे ।। नैव सन्यः प्रमादेत्रि
नवेश्यंति कस्तवता न देवा नासुराः केचिन्न मनुष्या न राक्षसाः ।। गंधर्वजक्षप्रवराः किंनरा न महोरगाः ।। दीर्घदर्शी महातेजाः पौ
रजानपदप्रियः ।। पांडवानामतिरथो यज्वा धर्मपरो वशी ।। महर्षिकल्पो राजर्षिः सर्वलोकेषु विश्रुतः ।। बलवान् स्मृतिमान्दे
क्षः सत्यवादी जितेंद्रियः ।। धनेश्वरसमस्त्यागे वशक्रोविश्रवणोपमः ।। यथा मनुर्महातेजा लोकानां परिरक्षिता ।। एवमेष महाते
जाः प्रजानुग्रहकारकः ।। अयं कुरूणामृषभः कुंतीपुत्रो युधिष्ठिरः ।। अस्य लोके स्थिता कीर्तिः सूर्यस्येवोदितप्रभा ।। संसरंति
दिशः सर्वाः रश्मयोस्य गभस्तयः ।। उदितस्येव सूर्यस्य तेजसामनुगताः स्तयः ।। एनं दशसहस्राणि कुंजराणां तरस्विनां ।। अनु
युः पृष्ठतो राजन् यावदध्यावसत्कुरून् ।। त्रिंशद्देवसहस्राणि रथाः कांचनमालिनः ।। सदश्वैरुपसंपन्नाः पृष्ठतोनुययुस्तदा ।। ए
नमष्टशताः सूताः सुमृष्टमणिकुंडलाः ।। अस्तुवन्मागधैः सार्द्धं पुराशक्रमिवर्षयः ।। एनं नित्यमुपासंति कुरवः किंकरायथा
मरैर्वराजानो धनेश्वरमिवामराः ।। एष सर्वान्महीपालान् करमाहारयत्तदा ।। वैश्यानिव महाराजो विवशान्स्ववशा
नपि ।। अष्टाशीतिसहस्राणि स्नातकानां महात्मनां ।। उपजीवंति राजानमेनं सुचरितव्रतं ।। एष वृद्धाननाथांश्च व्यंगान्पंगूंश्च मा ८५

नवान् ।। पुत्रवत्पालयामास प्रजाधर्मेण धर्मवित् ।। एष धर्मे दमे चैव क्रोधे चापि यतव्रतः ।। महाप्रसादो ब्रह्मण्यः
सत्यवादी जितेंद्रियः ।। श्रीप्रतापेन चैवास्य तप्यते ससुयोधनः ।। सबलः सहकर्णेन सौबलेन च वा विभो ।। नशक्यं नेते ह्यस्य गुणाः प्र ६
संख्यातुं नरेश्वर ।। एष धर्मपरो नित्यमनृशंसश्च पांडवः ।। एवं युक्तो महाराज पांडवः पुरुषर्षभः ।। कथं नार्हति राजार्हमासनं पृ
थिवीपतिः ।। ।। इति महाभारते विराटपर्वणि ।। ।। विराट उवाच ।। ।। यद्येष राजा कौरव्यः कुंतीपुत्रो युधिष्ठिरः ।। कतमोस्या
र्जुनो भ्राता भीमश्च कतमो बली ।। नकुलः सहदेवो वा द्रौपदी वा यशस्विनी ।। यदा द्यूतजिताः पार्था न प्राज्ञायंत ते क्वचित् ।।
अर्जुन उवाच ।। ।। य एष बल्लवो ब्रूते सूदस्तव नराधिप ।। एष भीमो महाबाहुर्भीमवेगपराक्रमः ।। एष क्रोधवशान्हत्वा प
र्वते गंधमादने ।। सौगंधिकानि दिव्यानि कृष्णायै समुपाहरत् ।। गंधर्व एष वै हंता कीचकानां महात्मनां ।। व्याघ्रानृक्षान्व
राहांश्च हतवान्स्त्रीपुरे तव ।। यश्चासीदश्वबंधस्ते नकुलोयं परंतपः ।। गोसंख्यः सहदेवश्च माद्रीपुत्रौ महारथौ ।। शृंगारवे
षाभरणौ रूपवंतौ मनस्विनौ ।। नानारथसहस्राणां समर्थौ नरर्षभौ ।। एषा पद्मपलाशाक्षी सुमध्या चारुहासिनी ।। सैरंध्री
द्रौपदी राजन् यत्कृते कीचका हताः ।। अर्जुनोहं महाराज व्यक्तं ते श्रोत्रमागतः ।। भीमादवरजः पार्थो यमाभ्यामपि चाग्रजः ।।

प्रचंडा दृढा घोणा नासा यस्येति विग्रहः। पृथुनी स्थूले दीर्घे च नेत्रे यस्य सः॥ ताम्रवर्णे हि तमायते लोचने यस्य सः। श्यामा मनयोः सौरी मूर्तिमंत

विताः स्म महाराज सुखं तव निवेशने। अज्ञातवासमुषिता गर्भवासमिव प्रजाः॥ ॥वैशंपायन उवाच॥ ॥यदार्जुनेन ते वीराः कथिताः
पंच पांडवाः। पुनरेव तदा पार्थान्निकथयामास चोत्तरः॥ ॥उत्तर उवाच॥ ॥य एष जांबूनदशुद्धगौरस्तनुर्महासिंह इव प्रवृद्धः। प्रचं
डघोणः पृथुदीर्घनेत्रस्ताम्रायताक्षः कुरुराज एषः। अयं पुनर्मत्तगजेंद्रगामी प्रचंडचामीकरशुद्धगौरः। पृथ्वायतांसो गुरुदीर्घ
बाहुर्वृकोदरः पश्यत पश्यतेनं। यस्त्वेष पार्श्वेऽस्य महाधनुष्मान्श्यामो युवा वारणयूथपोपमः। सिंहोन्नतांसो गजखेलगामी
पद्मायताक्षोऽर्जुन एष वीरः। राज्ञः समीपे पुरुषोत्तमौ तु यमाविमौ विष्णुमहेंद्रकल्पौ। मनुष्यलोके निखिले समोऽस्ति ययोर्न सौरीपावः
रूपेण कुलेन शीले। आभ्यां च पार्श्वे कनकोत्तमांगी येषा प्रभा मूर्तिमतीव गौरी। नीलोत्पलाभा सुरदेवतेव कृष्णा स्थिता मूर्ति
मतीव लक्ष्मीः॥ ॥वैशंपायन उवाच॥ ॥यदार्जुनेन ते वीराः कथिताः पंच पांडवाः। तदार्जुनस्य वैराटिः कथया
मास विक्रमं॥ ॥उत्तर उवाच॥ ॥अयं स द्विषतां हंता मृगाणामिव केशरी। अचरद्रथवृंदेषु विनिघ्नंस्तु रथान्वरान्।
अनेन विद्धो मातंगो महानेकेषुणा हतः। हिरण्यकक्षः संग्रामे दंताभ्यामगमन्महीं। अनेन विजिता गावो जिताश्च कुरवो यु ८६
धि। अस्य शंखप्रणादेन कर्णौ मे बधिरीकृतौ॥ ॥वैशंपायन उवाच॥ ॥तस्य तद्वचनं श्रुत्वा मत्स्यराजः प्रतापवान्॥

धिनीशत रासवना। गौरिति या वे पार्वतीव सर्वेश्वरी प्रकाशनादी हिर्यस्याः। मापुरदेवता नगराधिष्ठात्री देवता। हिरण्यकक्षः स्वर्ण सूत्रखलः

प्रतिपन्नः प्रतिपत्तिमान्। अर्च्याः पूज्याः। प्रत्युपानमस्याः मान्याः सम्माः॥ वाहिनीपतिरिव वाहिनीपतिः नाधिलनवात्॥ ऐन्द्रास्वाला विक्रमपितस्पत त्रा

प्रतिपत्तौ
उत्तरं प्रत्युवाचेदमभिपन्नो युधिष्ठिरः। प्रसादनं पांडवस्य प्राप्तकालं हि रोचये। उत्तरां हि प्रयच्छामि पार्थाय यदि ते मतं॥ ॥
उत्तर उवाच॥ ॥अर्च्याः पूज्याश्च मान्याश्च प्राप्तकालं च मे मतं। पूज्यंतां पूज्यमानार्हा महात्मानः पांडवाः॥ ॥विराट उवाच॥
॥ ॥अहं खल्वपि संग्रामे शत्रूणां वशमागतः। मोक्षितो भीमसेनेन गावश्च विजितास्तथा। एतेषां बाहुवीर्येण
नास्माकं जयः संख्ये। वयं सर्वे सहामात्याः कुंतीपुत्रं युधिष्ठिरं। प्रसादयामो भद्रं ते सानुजं पांडवर्षभं। यदस्माभि-
रज्ञानात्किंचिदुक्तो नराधिपः। क्षंतुमर्हति तत्सर्वं धर्मात्मा ह्येष पांडवः॥ ॥वैशंपायन उवाच॥ ततो विराटः प-
रमं प्रहृष्टः समेत्य राजा समयं चकार। राज्यं च सर्वं विससर्ज तस्मै सदंडकोशं सपुरं महात्मा। पांडवांश्च ततः सर्वा-
न्मत्स्यराजः प्रतापवान्। धनंजयं पुरस्कृत्य दिष्ट्या दिष्ट्येति चाब्रवीत्। समुपाघ्राय मूर्धानं संश्लिष्य च पुनः पुनः। युधि-
ष्ठिरं च भीमं च माद्रीपुत्रौ च पांडवौ। नातृप्यद्दर्शने तेषां विराटो वाहिनीपतिः। संप्रीयमाणो राजानं युधिष्ठिरमथाब्रवीत्। दि-
ष्ट्या भवंतः संप्राप्ताः सर्वे कुशलिनो वनात्। दिष्ट्या च पारितं कृच्छ्रमज्ञातं वै दुरात्मभिः। इदं च राज्यं नः पार्था यच्चान्यद-
पि किंचन। यद्वद्यामि तत्कार्य्यं कौंतेयाविशंकया। उत्तरां प्रतिगृह्णातु सव्यसाची धनंजयः। अयं ह्यौपयिको भर्ता त-
स्याः पुरुषसत्तमः। एवमुक्तो महाराजो धनंजयमवेक्षत॥

इति। कृच्छ्राः प्रयोगाः पारितं समापितं॥

विराट

युक्तः स्वसंबंधो दिष्ट्या मादानामस्मात् आरत सत्तमाविस्त्युच्य ॥ ॥ आचार्यवदुपमन्यत इति विश्वासगमानतिरश्चीनं । तनस्याप्यतिशंका उत्तरस्य
तनमात्रस्य स्वानतेऽविरातं नदत्तं । वयस्थाय तिष्ठ दंत्रानिमित्त यथा तत्किमतस्त्वाद । इति तस्या वतिशयः स्तुद्दं दोषद्दानमात्रेत्तः पितृत्व स्था । जितेंद्रिय
त्वं रस्य नान्त्सुद्धबढ्दिरिंद्रियं तत्रविबकं कथं क्रियत इत्यक्रम चायत्तत्त्वाद् ॥ तस्यास्व स्तुतिकाया स्वदत्तामस्य सुदृढ्ः पर स्यावाच्यो ता म त्ये वकृता

इहितस्थार्जुनो स्वावामस्यं वचनमब्रवीत् । प्रतिगृह्णाम्यहं चेमां स्नुषां दुहितरं तव । युक्त एवावयोः संबंधः कुरुमत्स्ययोः
॥ ॥ इतिमहाभारते विराटपर्वणि पतिमन्युविवाहे ॥ ॥ विराट उवाच ॥ किमर्थं पांडवश्रेष्ठ भार्यां दुहितरं मम । प्रतिग्र
हीतुं नमां त्वं मया दत्तामिहेच्छसि ॥ ॥ अर्जुन उवाच ॥ अंतःपुरेऽहमुषितः सदा पश्यन्सुतां तव । रहस्यं च प्रकाशं च वि
श्वस्ता पितृवन्मयि । प्रियो बहुमतश्चाहं नर्तको गीतकोविदः । आचार्यवच्च मामित्यं मन्यते दुहिता तव । वयस्थया तया
राजन्सह संवत्सरोषितः । अतिशंका भवेत्स्थाने तव लोकस्य वा विभो । तस्मान्निमंत्रये त्वाहं दुहितुः पृथिवीपते । शुद्धो जितें
द्रियो दांतस्तस्याः शुद्धिः कृता मया । स्नुषायां दुहितुर्वापि पुत्रे चात्मनि वा पुनः । अत्र शंकां न पश्यामि तेन शुद्धिर्भविष्यति । अ
भिशंकाद्भयाद्भीतो मिथ्याचारात्परंतप । स्नुषार्थमुत्तरां राजन्प्रतिगृह्णामि ते सुतां । स्वस्रीयो वासुदेवस्य साक्षाद्देवशि
शोर्यथा । दयितश्चक्रहस्तस्य बाल एवास्त्रकोविदः । अभिमन्युर्महाबाहुः पुत्रो मम विशांपते । जामाता तव युक्तो सो भ
र्ता च दुहितुस्तव ॥ विराट उवाच ॥ उपपन्नं कुरुश्रेष्ठे कुंतीपुत्रे धनंजये । य एवं धर्मनित्यश्च जातज्ञानश्च पांडवः । यत्कृ
त्यमन्यत्पार्थ क्रियतां तदनंतरं । सर्वे कामाः समृद्धा मे संबंधी यस्य मेऽर्जुनः ॥ ॥ वैशंपायन उवाच ॥ एवं ब्रुवति राजे

न्तु तथापि कथं शंकानिराकृतात्र तत्राह । अशुषायामिति । स्नुषायां पुत्रवधूमन्यतां न तु दुहितरमिति विस्मयः स्ततायाः उत्तरस्य अभिमन्यो विषये रतेत्तव दुहितुरतिशं
कां न पश्यामि । तेन हेतुना आह सर्वेषां न भविष्यंति । अतिप्रसंगात्कामप्रवृत्ति संबंधात् प्रियो वा वादवारा पितात् अभिशंकाशितिपाठे अभिशंका यस्मात्तद

८७

अन्वजानात्तस्य तज्ज्ञात्वा प्रेषयामास चरानिति निश्चयः । निवृत्ते समये तात उपप्लव्यं नाम नगरं । यज्ञसेनो द्रुपदः । विराटे [illegible] लाद्वा
इ कुंतीपुत्रो युधिष्ठिरः । अन्वजानीत संबंधं समये मत्स्यपार्थयोः । ततो मित्रेषु सर्वेषु वासुदेवे च पांडवाः । प्रेषयामास कौंतेयो
विराटश्च महीपतिः । ततस्त्रयोदशे वर्षे निवृत्ते पंच पांडवाः । उपप्लव्ये विराटस्य समपद्यंत सर्वशः । तस्मिन्वसंश्च बीभत्सुरा
निनाय जनार्दनं । आनर्तेभ्योऽपि दाशार्हानभिमन्युं च पांडवाः । काशिराजश्च शैब्यश्च प्रीयमाणौ युधिष्ठिरे । अक्षौहिणीभ्यां स
हितावागतौ पृथिवीपते । अक्षौहिण्या च तेजस्वी यज्ञसेनो महाबलः । द्रौपद्याश्च सुता वीराः शिखंडी चापराजितः । धृष्टद्यु
म्नश्च दुर्धर्षः सर्वशस्त्रभृतां वरः । समस्ताक्षौहिणीपाला यज्वानो भूरिदक्षिणाः । वेदावभृथसंपन्नाः सर्वे शूरास्तनुत्यजः ।
तानागतानभिप्रेक्ष्य मत्स्यो धर्मविदां वरः । पूजयामास विधिवत्सभृत्यबलवाहनान् । प्रीतोऽभवद्दुहितरं दत्वा तामभिमन्य
वे । ततः प्रत्युपयातेषु पार्थिवेषु ततस्ततः । तत्रागमद्वासुदेवो वनमाली हलायुधः । कृतवर्मा च हार्दिक्यो युयुधानश्च
सात्यकिः । अनाधृष्टिस्तथाक्रूरः सांबो निशठ एव च । अभिमन्युमुपादाय सह मात्रा परंतपाः । इंद्रसेनादयश्चैव रथै
स्तैः सुसमाहितैः । आययुः सहिताः सर्वे संवत्सरमुपोषिताः । दशनागसहस्राणि हयानां च दशायुतं । रथानामर्बु
दं संपूर्णं निखर्वं च पदातिनां । वृष्ण्यंधकाश्च बहवो भोजाश्च परमौजसः । अन्वयुर्वृष्णिशार्दूलं वासुदेवं महाद्युतिं । पारिबर्हं ददौ
कृष्णः पांडवानां महात्मनां । स्त्रियो रत्नानि वासांसि पृथक्पृथगनेकशः । ततो विवाहो विधिवद्ववृते मत्स्यपार्थयोः ॥

त्यजः ॥ इंद्रसेनो युधिष्ठिरस्य सारथिः । पारिबर्हं पारिबर्हं दायं परिबर्हं । कृष्णाचीकृष्ण श्री मदानंदस्वरूप ॥ परिबर्हं पादेश्वर्यपरिबर्हं इत्यमरः ॥

बहुर

उवावबान उवान्मदतःस्वक्रिमदिषारिचाञ्जवचाञ्चाशाकादाञाञ्चन्महारयचतुलावः॥वितालिकाःप्रातःप्रातःप्रबोधकाः॥व

विराट

ततःशंखाश्च नार्यश्च पणावानकगोमुखाः॥पार्थीःसंयुज्यमानस्य नडर्मश्यस्यावस्मनि। उक्ता वचान्मृगाशउघुर्मश्यांश्च

शानशाःपश्वन्‌।सुरामेरयपानानि भक्ष्यान्यप्यदारयन्‌।गायना ख्यानशीलाश्चनटा वितालिकास्तथा।स्तुवंतश्चाप्यु

पातिष्टन्सूतांश्च सह मागधैः॥सुदष्णांउश्च स्वकृत्य मत्स्यानां च वरस्त्रियः॥आजग्मुश्चारुसर्वांग्यः सुमृष्टमणिकुंडलाः॥व

र्णोपपन्नास्ताना र्यो रूपवत्यःस्वलंकृताः।सर्वाश्चाभ्यडवर्तंत द्रौपदी यशसा श्रिया।परिवार्योत्तिरा तास्तु राजपुत्रीमलंकृ

तां।सुतामिव महेंद्रस्य पुरस्कृत्योपतस्थिरे।तां प्रत्यगृह्णात्कौंतेयः सुतस्यार्थे धनंजयः।सोत्तरस्यानवद्यांगीं विराट

तनयां तदा।तत्रातिष्टन्महाराजो रूपमिंद्रस्य धारयन्‌।स्नुषां तां प्रतिजग्राह कुंतीपुत्रो युधिष्ठिरः।प्रतिगृह्य तु तां पार्थःपुर

स्कृत्य जनार्दनं।विवाहं कारयामास सौभद्रस्य महात्मनः।तस्मै सप्तसहस्राणि हयानां वातरंहसां।द्वेचनागशते मु

ख्ये प्रादाद्बहुधनं तदा।कृत्वाम म्यक्समिद्धाग्निमर्चयित्वा द्विजन्मनः।राज्यं बलं च कोशं च सर्वमात्मानमेव च।न्यवेदय

त्पांडवेभ्यो विराटःप्रीतिमांस्तदा।कृते विवाहे तु तदा धर्मपुत्रो युधिष्ठिरः।ब्राह्मणेभ्यो ददौ वित्तं यदुपाहरदच्युतः॥गा

सहस्राणि रत्नानि वस्त्राणि विविधानि च।भूषणानि च मुख्यानि यानानि शयनानि च।भोजनानि च दिव्यानि पानानि विवि

धानि च।

धानि च।मर्हाणि च।दारश्चपदनःरक्तःकात्यायनीवाक्त्वाधनञ्जयस्तदाःजवाःमविहितरिगाः।पञ्चलग्गेत्रामरःवहीःसक्त आदा

ध्याक्कःःजनोःसाहिअःशिक्तमिनचोर्णितमा।अस्थ्वःःविगमवम्तःाफसमाश्राणदन्ताःा

८७

स्वीपिपन्नाः शोभनवर्णविस्पः।कन्नीना वा चम्पनबन्स्त्रिमिनतवतो।उपहारयत्स्नवाशनगवतस्यावंद्या।द्विजानामनः

।हष्टिनो विशीममापितनविन्नना हानतात्रा विनाक्यमिष्टायावासुदेवदत्तविन्नदानस्य॥

स्वचं रं देवशृंगन्नरतर्षभे तिवापावः॥श्रीकंसमेवाकस्मेवाफलतोयेहनजायत।काशानवासःकजयःकवाश्रीकृ

ष्णसंगतिः॥विराटपर्वव्याख्यानंयद्धर्ममिवतत्पणं।सुविरागाननानां प्रीत्या श्रीरामचरणोर्पितं॥ स्वस्वांतध्वांतमा

तन्मदोसवसंकाशंसुष्टुजनाहतं।नगरेमत्स्यराजस्य सुमुमन्नरतर्षभ॥ ॥इति महाभारते शतसा

हस्र्यां संहितायां वैयासिक्यां विराटपर्वणि अभिमन्युविवाहः॥ ॥समाप्तं चेदं विराटपर्व॥ ॥अस्या

नंतरंमुद्योगपर्वभविता॥ ॥तस्यायमाद्यःसंधिः॥ ॥कृत्वा विवाहं तु कुरुप्रवीरा इत्यादि॥ ॥अस्मि

न्पर्वणि वृत्तान्ताः॥ ॥अज्ञातवासमयः॥ ॥सैन्ध्यवाक्यं॥ आयुधन्यासः॥ विराटनगरप्रवेशः॥ जीमूतवधः

।कीचकवधः॥ दक्षिणगोग्रहः॥ उत्तरगोग्रहः॥ अभिमन्युविवाहश्चेति वृत्तांताः॥ ॥श्रीरस्तु॥ ॥श्रीराम

स्वान्तज्ञानार्थप्रतिपत्तये। संविज्ञाननरतोमायवकाशोयंमयाकृतः॥ शांडिल्यनन्दनेनाकृतो विराटपर्वप्रकाराः॥

ध्म



८७